DIPLOMA IN SANSKRIT

Paper - I (Part - B)

# HITOPADESAM- MITRALABAHA

## Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha
Accredited at 'A' level by NAAC
Tirupati - 517 507 (A.P.)

# UNIT:I - हितोपदेशे मित्रलाभः-परिचयः

**संरचना**

१.०.परिचयः
१.१.लक्ष्याणि
१.२. कथासाहित्यम् -परिचयः
१.३ हितोपदेशः -परिचयः
१.४. हितोपदेशः -कविपरिचयः
१.५. हितोपदेशः -पाठ्यांशस्वरूपम्
१.६. हितोपदेशः-वैशिष्ट्यम्
१.७. उपसंहारः
१.८. अभ्यासः

## १.०.परिचयः

वाङ्मयं द्विविधम्;पौरुषेयम् अपौरुषेयं च इति। तत्र अपौरुषेयम् वैदिकम् इति वा अलौकिकम् इति वा व्यवहृतं भवति। चतुर्णां वेदानाम्, वेदाङ्गानाम्, उपाङ्गानां च साहित्यम् तत्र अन्तर्भवति। पुरुषनिर्मितं यत् साहित्यं तत् पौरुषेयं भवति। तच्च अ).शास्त्रम् इ). काव्यम् इति द्विप्रकारकं विद्यते। सर्वं च शास्त्रसाहित्यं दर्शनम्, कलाः, नीतिः इत्यादिरूपेण वर्गीकृतम् अस्ति। काव्यसाहित्यं तु छन्दसम् आधारीकृत्य, प्रतिपाद्यमानं विषयम् अधारीकृत्य, व्यङ्ग्यस्य प्राधान्यम् आधारीकृत्य च, बहुधा विभक्तम् अस्ति। तत्र एकैकः अपि विभागः शाखोपशाखतया अति विस्तृतं वर्तते। तत्र प्रतिपाद्यमानं विषयम् अधारीकृत्य काव्यं महाकाव्यम्, लघुकाव्यम्, चरित्रकाव्यम्, भक्तिकाव्यम्, नीतिकाव्यम्, कथाकाव्यम् इत्येवमात्मना बहुप्रकारकम् अस्ति। प्रकृते कथाकाव्य- (साहित्य) परिचयः अत्र सम्पाद्यते।

## १.१.लक्ष्याणि

कथनप्रधानत्वात् कथा भवति। अत्र कथकस्यैव प्रमुखं स्थानं विद्यते। कथकः सोत्साहं हावभावपुरस्सरं यथा वा कथां वर्णयति , कथयति, तथा पाठकः प्रथमम् आनन्दितः भवति, अनन्तरं च अन्तर्गतं च सन्देशं स्वीकर्तुम् अपि उन्समखः भवति। परं तत्र पाठकस्यापि सावधनता अपेक्षिता एव। परं पाठकस्य सावधानता सम्पादने अपि

कथकस्य स्थानं प्रभावपूर्णं विद्यते। किञ्च काव्यसाहित्यम् कान्तासम्मितम्। तत्रापि काव्यकथा- साहित्यं सन्देशम् आनन्दं च सादरं सोत्कण्ठं सरसतया सरलतया च मनस्सु आधास्यति। प्रकृते च संस्कृते कथासाहित्यं कथं विस्तृतम् अस्ति ? प्रपञ्चकथासाहित्यस्य कृते संस्कृतकथासाहित्यस्य योगदानं कीदृशम् ? इत्यादिविषयाणां बोधनम् अस्य पाठ्यांशस्य प्रधानम् उद्धेश्यम् अस्ति। एतत् पाठ्यांशस्य अध्ययनेन-

- संस्कृतस्य वाङ्मयविभागं प्रति परिचितः भवति।
- संस्कृतकथासाहित्यस्य सङ्ग्रहस्वरूपं ज्ञातुं प्रभवति।
- संस्कृतकथासाहित्ये हितोपदेशस्य स्वरूपम् अवगन्तुं पारयति।
- हितोपदेशे प्रस्तुतपाठ्यांशस्य परिमितिं पठितुं प्रभवति।
- हितोपदेशस्य वैशिष्ट्यं वक्तुं समर्थः भवति।

## १.२.कथासाहित्यम् - परिचयः

संस्कृतसाहित्ये कथासाहित्यस्य प्रमुखं स्थानम् अस्ति। विना आयासं मनस्सन्तोषाय, विवेकसम्पादनाय, आलोचनाप्रेरणाय, सदुपदेशाय, ज्ञानसमुपार्जनाय च, कथा साहित्यं समीचीनम् उपकरणं भवति। तत्र च प्रमुखं स्थानं विष्णुशर्मणः पञ्चतन्त्रस्य विद्यते। पशुपक्ष्यादीनां माध्यमेन वर्णिताभिः कथाभिः मूर्खाः राजपुत्राः षण्मासाभ्यन्तरे विवेकवन्तः सम्पन्नाः इति अयं विषयः पञ्चतन्त्रस्य प्राशस्त्यं प्रकटयति।

## १.३.हितोपदेशः-परिचयः

एतस्मिन् एव मार्गे विरचितम् अन्यत् कथाकाव्यं हितोपदेशः । अस्य कर्ता नारायणपण्डितः। पञ्चतन्त्रम् एव हितोपदेशस्य रचनायाः आधारग्रन्थः। अत्र हितोपदेशे मित्रलाभ-मित्रभेद-विग्रह-सन्धयः चत्वारः भागाःविद्यन्ते। कथाः प्रयशः पञ्चतन्त्रात् एव स्वीकृताः। कामकनीतिसारात्,चाणक्यनीतिशास्त्रात् च अनेकानि धर्मबोधकानि , नीतिपूर्णानि च वाक्यानि गृहीत्वा कविना सन्दर्भानुसारम् अत्र उट्टङ्कितानि सन्ति।

## १.४.हितोपदेशः-कविपरिचयः

नारायणपण्डितः वङ्गदेशीयः। द्वादशशतके अस्य कवेः जीवनम् आसीत् इति अयं ग्रन्थः १२शताब्दे रचितः इति साहित्यचरित्रकाराणाम् अभिप्रायः। गद्यपद्योभयचम्पूरीत्या एषा रचना कृता। प्रसादगुणगुम्फिता ललितपदविन्यासैः अलङ्कृता। द्राक्षापाकसम्भरिता च।

## १.५. हितोपदेशः -पाठ्यांशस्वरूपम्

**असाधनाः वित्तहीनाः बुद्धिमन्तः सुहृत्तमाः।**
**साधयन्त्याशु कार्याणि, काक-कूर्म-मृग-आखुवत्।।** अयं पञ्चतन्त्रस्य मित्रलाभे प्रथमः श्लोकः। अयं मित्रलाभस्य कथानां सङ्ग्राहकः। राजपुत्राणां सावधानतासम्पादकश्च। साधनं नाम उपकरणम्। वित्तं नाम धनम्। बुद्धिः नाम आलोचना।सुहृत्तमाः नाम विवेकशालिनः स्नेहिताः। तथा च साधनानाम् अभावेऽपि, धनस्य अभावेऽपि, यदि विवेचनाशालिनः स्नेहिताः भवन्ति, तदा कार्याणि काक-कूर्म-मृग-आखुवत् सत्वरं कार्याणि सिध्यन्ति, इति श्लोकस्य भावः। विष्णुशर्मा अनेन श्लोकेन मित्रलाभं प्रारभते। अयं श्लोकः राजपत्रान् श्रवणोन्मुखान् करोति। आश्चर्यं प्राप्ताः राजपुत्राः कथम् ? इति पृच्छन्ति। समाधानतया मित्रलाभः कथारूपेण आरब्धः।

चित्रग्रीवकथा;गोदावरी तीरे शाल्मलीतरूः अस्ति। तत्र पक्षिणां सङ्ग्रहणाय व्याधः तण्डुलकणान् विकीर्य जालं विस्तारयति। पक्षिणः लोभेन तण्डुलकणेषु आकृष्टाः भवन्ति। तान् वारयन् चित्रग्रीवः वृद्धकपोतः वृद्धव्याध्र - पथिककथां श्रावयति। एषा अवान्तरकथा। चित्रग्रीववचनम् अतिक्रम्य सर्वे पक्षिणः जाले पतन्ति। सर्वे पुनः चित्रग्रीवस्य उपायेन हिरण्यकस्य समीपं गच्छन्ति। तेन रक्षिताश्च भवन्ति। इयं चित्रग्रीवस्य कथा।

लघुपतनको वायसः एतत् दृष्ट्वा हिरण्यकेन मैत्रीं प्राप्तुम् इच्छति। तत् न सङ्गच्छते इति वदन् मूषकः मृग-काक-जम्बुक-कथां श्रावयति। एषा कथा अवान्तरकथा।काकः मृगं व्याधात् रक्षति। व्याधक्षिप्तेन लगुडेन जम्बुकश्च हतः भवति।।अत्रापि कथायां काकः अकस्मात् आगन्तुना मैत्री न युक्ता इति ज्ञापयन् गृध्र-मार्जाल कथां प्रस्तावयति। एषा कथा तत्रापि अवान्तरकथा। हिरण्यकः स्वस्य वृत्तान्तं वदन् चूडाकर्ण - वीणाकर्णयोः संवादात्मिकां कथां वर्णयति। तयोः संवादे चन्दनदास-लीलावत्योः कथाम् उपवर्णयति।तत्र एव काक - हिरण्यकयोः संवादे लुब्ध -शृगाल-कथा अन्या अवान्तरकथापि आगता, या चरूपेण प्रस्ताविता।

काक-मृग-मूषिक-मन्थरकाणां कथा अन्या अस्ति। अत्र काक-मूषिक-मन्थरकाः मृगेण सह मैत्रीं गच्छन्ति। एषा प्रधानकथा। मध्ये तुङ्गबल-लावण्यवत्योः कथा रूपेण प्रस्ताविता। तत्रापि पुनः अवान्तरतया हस्ति-शृगालयोः कथा प्रस्ताविता। अन्ते सर्वे काक-मूषिक-मृगाः प्रमादे पतितस्य मन्थरकस्य संरक्षणं कुर्वन्ति।

इत्थम् अत्र मित्रलाभे काक-कूर्म-मृग-आखूनां कथाः प्रस्ताविताः। सर्वाः अपि कथा नीतिपूर्णाः। व्यवारज्ञानाय एषाः कथाः बहु उपकुर्वन्ति। पाठकान् विवेकसम्पन्नान्, अवगाहनापरान् च कर्तुं प्रभवन्ति।

## १.६. हितोपदेशः-वैशिष्ट्यम्

हितोपदेशस्य प्रारम्भे एव नारायणपण्डितः हितोपदेशस्य रचना प्रयोजनम् एवं वदति-

**'श्रुतो हितोपदेशोऽयम् पाटवं संस्कृतोक्तिषु।**
**वाचां सर्वत्र वैचित्र्यम्, नीतिविद्यां ददाति च' ।।**

अयं हितोपदेशः संस्कृतोक्तिषु पाटवं सम्पादयति। सर्वत्र वाचां वैचित्र्यं प्रापयति। नीतिविद्यां ददाति।

**'यत् नवे भाजने लग्नः संस्कारो नान्यथा भवेत्।**
**कथाच्छलेन बालानां नीतिस्तदिह कथ्यते'।।**

नवीने पात्रे कृतं रेखादिकं सुस्थिरं भवति, तथैव निर्मलचित्तानां बालानां हृदि नीतिवर्तनस्य स्थिरता सम्पादनाय कथामुखेन नीतिः अत्र बोध्यते। एतदध्ययनेन बालाः नीतिवर्तना भवेयुः इति कवेराशयः। मानवस्य परिपूर्णव्यक्तित्वविकासाय विद्या आवश्यकी। विद्यावान् लभते ज्ञानम्। विनयं प्राप्नोति। युक्तायुक्त - विचक्षणाज्ञानं, लोकोपयोगितत्वं च जानाति। सा विद्या औपचारिकी अनौपचारिकी चेति द्विविधा। औपचारिकी - विद्या गुरूकुलशिक्षणे आयाति। तत्र वयः, बुद्धिविकासः, गुरूसान्निध्यं, शास्त्रादिकं च साधनानि।

अनौपचारिकी विद्या यदा कदापि, यत्र कुत्रापि प्राप्यते। तत्र पूर्वोक्तानि करणानि न भवन्ति। प्रकृतिरेव गुरूस्थाने तिष्ठति। लौकिकप्रक्रिया अत्र साधनत्वेन उपकरोति। अनैपचारिकपद्धत्या मानवः यत् ज्ञानम् आप्नोति तत्तु तस्य आजीवं तिष्ठति । प्रकृते राजपूजाः अत्यन्तं मूर्खाः । अधिकारमदेन युक्ताः, विद्यागन्धहीनाश्च । अतः तेषाम् अध्यापनाय अनौपचारिकी विद्या एव उपयुज्यते इति विष्णुशर्मा चिन्तयति। अत एव कथाकथनपद्धतिः कविना आदृता । नीतिविषयाणां, वैज्ञानिकविषयाणां च अध्यापनं कथाकथनपद्धत्या कृतम्। अत्र नीतिशास्त्रप्रवक्तारः क्रूरजन्तवः पशुपक्षिणश्च । अतिमूर्खाः अपि राजपुत्राः षण्मासाभ्यन्तरे नीतिकोविदाः आसन् इति प्रत्यक्षतः अत्र निरूपितम् अस्ति। यद्यपि एषा सरणिः मन्दानां ज्ञानदानाय स्वीकृता, परं मानवव्यक्तित्वविकासाय उपयोगभूतं नीतिसाहित्यम् अत्र प्रभूतम् अस्ति इति मध्यम - उत्तमस्तरीययोः अपि सदा उपकारं जनयति। प्रख्यातप्रपञ्च भाषासु सर्वास्वपि

हितोपदेशस्य , तदाधारभूतस्य पञ्चतन्त्रस्य च बहुशः अनुवादग्रन्थाः जाताः इत्येव अस्य वैशिष्ट्यं ख्यापयति।

**स्वावलोकनप्रश्नाः**

अ).अपौरुषेयं वाङ्मयं कथं व्यवहृतं भवति ?

इ).हितोपदेशस्य आधारः ग्रन्थः कः ?

उ).हितोपदेशस्य रचयिता कः ?

ऋ).हितोपदेशे कति भागाः सन्ति ?

## १.७. उपसंहारः

एवम् अत्र संस्कृतकथासाहित्यस्य परिचयः सम्पादितः। हितोपदेशस्य स्वरूपं प्रस्तावितम्। पाठ्यांशस्य परिचयः प्राप्तः। अत्र च १. चित्रग्रीवकथा, २. वृद्धव्याघ्र-पथिककथा, ३.मूषक-मृग-काक-जम्बुक-कथा, ४. गृध्र- मार्जाल कथा, ५. चूडाकर्ण- वीणा कर्णयोः संवादात्मिका कथा, ६. चन्दनदास-लीलावत्योः कथा ,७. काक-मृग- मूषिक-मन्थरकाणां कथा ८. हस्ति-शृगालयोः कथाः च अत्र प्रधानतया वर्ण्यन्ते इति च कथितम् । हितोपदेशस्य वैशिष्ट्यं च प्रतिपादितम्।

## १.८. अभ्यासः

अ) संस्कृते कथावाङ्मयस्य स्थानं विशदयत ?

इ) हितोपदेशस्य स्वरूपं विलिख्य, तस्य वैशिष्ट्यं च वर्णयत ?

# UNIT-II; चित्रग्रीववृत्तान्तम् (कथा-१)

**संरचना**

२.०. परिचयः
२.१. लक्ष्याणि
२.२. हितोपदेशे मित्रलाभस्य उपक्रमः
  २.२.१. कथायाः नेपथ्यम्
२.३. चित्रग्रीववृत्तान्तम्
  २.३.१. लघुपतनकस्य अनिष्टाशङ्कनम्
  २.३.२. तण्डुलकणानां कृते कपोतानां लोभनम्
२.४. अविचारितं कर्म न कर्तव्यम् -चित्रग्रीवस्य कथनम्
२.५. वृद्धव्याघ्र - पान्थयोः कथावर्णनम्
  २.५.१. वृद्धव्याघ्रस्य वृत्तान्तम्
  २.५.२. पान्थस्य संशयाधिगमनम्
  २.५.३. धर्मस्य अष्टविधत्वम्
  २.५.४. अस्थाने पान्थस्य विश्वसनम्
  २.५.५. स्वस्य अविचारितकर्मणः पान्थस्य चिन्तनम्
  २.५.६. विचारितकर्मणः महत्त्वम्
२.६. चित्रग्रीवस्य वचः श्रुत्वा, युवकपोतस्य परुषभाषणम्
२.७. लोभस्य पर्यवसानम्
२.८. चित्रग्रीवस्य सान्त्वनम्
२.९. चित्रग्रीवस्य धैर्यकथनम्
२.१०. ऐकमत्यस्य आवश्यकताबोधनम्
२.११. हिरण्यकं प्रति गमनम्
  २.११.१. चित्रग्रीव-हिरण्यकयोः सम्भाषणम्
  २.११.२. स्वेषां दुरवस्थावर्णनम्
  २.११.३. चित्रग्रीवस्य औदार्यम्
  २.११.४. चित्रग्रीवस्य आश्रितवात्सल्यम्
  २.११.५. विधिः बलीयः इति हिरण्यकस्य समाश्वासनम्
२.१२. उपसंहारः
२.१३. अभ्यासः

## २.०.परिचयः

हितोपदेशस्य आधारः पञ्चतन्त्रम्। तत्र च पञ्चतन्त्रे मित्रलाभः,मित्रभेदः सन्धिः विग्रहः काकोलूकीयं च इति पञ्च भागाः विद्यन्ते। हितोपदेशे अपि बहुशः एवम् एव। परं तत्र आदिमाः चत्वारः एव भागाः भवन्ति। तत्र मित्रलाभः प्रथमः भागः। अत्र च पाठ्यांशे चित्रग्रीवकथा बोधिता। अवान्तरतया वृद्धव्याघ्र-पान्थकथा अपि वर्णिता। स्नेह हस्तम् अभ्यर्थितवते वायसाय समाधानव्याजेन मृग-काक-शृगालानां कथा निगदिता। अकस्मात् आगन्तुना सह मैत्री न युक्ता इत्येतद्विषयवर्णनाय जरद्गवकथा च उक्ता। एवम् अत्र चतस्रः कथाः उपनिबद्धाः। कथाश्च गद्य माध्यमेन वर्ण्यन्ते। कथानां वर्णने सन्दर्भानुगुणं महाकवीनां पद्यानि च समायोजितानि सन्ति। सन्दर्भानुगुणतया पद्यनां चयनम् अपि पद्यानां सन्दर्भस्य च अनिर्वचनीयां रम्तयां आरचयति। इमाः चतस्रः अपि कथाः मानवानां व्यक्तिगतजीवनाय प्रवर्तनानियमान्, पालकानां राज्यपालनाय च आवश्यकीं राजनीतिं च बोधयन्ति।

## २.१.लक्ष्याणि

मित्राणां सम्पादनम् अस्य पाठ्यांशस्य प्रधानम् उद्देश्यम् अस्ति। मानवश्च सङ्घजीवः। सङ्घे च मानवस्य सम्बन्धाः स्नेहपूर्णाः भवेयुः। मानवानां कृते मित्रात् वा, मैत्रीतः वा, कीदृशः लाभः वर्तते, मानवः जीवने मित्राणि कथं सम्पादयेत् ? सम्पादितानि मित्राणि कथं संरक्षेत् ? तेषु प्रवर्तनं कीदृशम् ? तेषु कथं विश्वासः जननीयः ? कथं विश्वासः वर्धनीयः ? मित्राणां कृते कथम् उपकुर्यात् ? मित्रेभ्यः कथं उपकारं प्राप्नुयात् ? मैत्री कथं संरक्षणीया भवति ? कैः सह मैत्री करणीया ? कैः सह मैत्री न करणीया ? इत्यादि विषयाणाम् बोधनाय उपनिबद्धः अयं पाठ्यांशः,एतासां भावनानां पाठकानां मनस्सु आधानमस्य पाठ्यांशस्य मुख्यम् उद्देश्यम् अस्ति। एतत् पाठ्यांशस्य अध्ययनेन-

- साधु कथां शृणोति। श्रवणकौशलम् अधिगन्तुं समर्थः भवति।
- सम्यक् कथां पठति। पठनकौशलम् प्राप्तुं पारयति।
- साधु कथाम् अधीते। संस्कृतभाषापदजालं वर्धयितुं प्रभवति।
- संस्कृतवाक्यनिर्माणाय परिचितः भवति,प्रयतितः अपि भवति।
- मित्रलाभस्य भावनाम् (CONCEPT) अनुभवाय आनेतुं संसिद्धः भवति।
- वृद्धानाम् अनुभववचनानि आचरणयोग्यानि इति अवगन्तुं समर्थः भवति।
- ऐकमत्यं कथं कार्यसाधकं भवति इत्यंशं भाषितुं समर्थः भवति।
- विधेः बलीयस्त्वं लिखितुं प्रभवति।

## २.२.हितोपदेशे मित्रलाभस्य उपक्रमः

**(मूलम्)**अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण स पण्डितः अब्रवीत्...

**काव्य-शास्त्र-विनोदेन कालो गच्छति धीमताम्।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।। १ ।।**

तत् भवतां विनोदाय काक-कूर्म-आदीनां विचित्रां कथां कथयामि। राजपुत्रैः उक्तम् 'आर्य कथ्यताम्'। **(विवरणम्)** राजा, पुत्रान् विवेकशालिनः राजनीतिज्ञान् च कर्तुं पण्डितं विष्णुशर्माणं नियोजयति। विष्णुशर्मा उपस्थितः भवति। राजभवनस्य पृष्ठे अध्ययनाय वेदिकां निर्मान्ति। तत्र राजपुत्राः सौकर्यतया उपविशन्ति। वक्ष्यमाणानां कथानां श्रवणाय राजपुत्रान् उन्मुखान् करोति। विवेचनशालिनः काव्यानाम् अध्ययनेन वा,शास्त्राणाम् अध्ययनेन वा कालं यापयन्ति। तथा कालं सदुपयोगं कुर्वन्ति। मूर्खास्तु व्यसनेन उ दुरभ्यासैः वा, निद्रया वा , कलहेन वा कालं दुरुपयोगं कुर्वन्ति। अतः वयं काव्यकथाः पठामः। कालं सद्विनियोगं कुर्मः। तत्र काक-कूर्म- आदीनां विचित्राः कथाः सन्ति। ताः अहं कथयामि। सावधानतया शृण्वन्तु इति, विष्णुशर्मा राजपुत्राणां साम्मुख्यं पृच्छति। राजपुत्राश्च वयं श्रोतुं सिद्धाः स्मः। कथाः कथयन्तु इति स्वेषां सावधानतां प्रकटयन्ति।

### २.२.१.कथायाः नेपथ्यम्

**(मूलम् )**विष्णुशर्मा उवाच--- शृणुत! सम्प्रति मित्रलाभः प्रस्तूयते। यस्य अयम् आद्यः श्लोकः -

**असाधनाः वित्तहीनाः बुद्धिमन्तः सुहृत्तमाः।**
**साधयन्त्याशु कार्याणि काक-कूर्म-मृग-आखुवत् ।। २।।**

राजपुत्राः ऊचुः - 'कथम् एतत्' विष्णुशर्मा कथयति - (विवरणम्)विष्णुशर्मा राजपुत्रान् सन्दिशति। मानवः बुद्धिजीवः। सः सर्वदा बुद्ध्या कार्यं करोति। विवेकः बुद्धिं सूक्ष्मतां नयति। कार्यसाधनाय विवेचनाबुद्धिः आवश्यकी। साधनसम्पत्तिस्तु तदनन्तरम् एव। असाधनाः वित्तहीनाः अपि काक-कूर्म-मृग-आखवः यथा वा कार्याणि साधयन्ति तथा बुद्धिमन्तः अपि बुद्ध्या,विवेकेन, स्नेहेन च कार्याणि साधयन्ति। तथा भवन्तः अपि बुद्धिं सूक्ष्मं कुर्वन्तु, कार्याणि बुद्ध्या साधयन्तु इत्येवं बोधयन् चित्रग्रीवकथाम् आरभते।

## २.३.चित्रग्रीववृत्तान्तम्

२.३.१.लघुपतनकस्य अनिष्टाशङ्कनम्

**(मूलम्)** अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः। तत्र नानादिक्-देशात् आगत्य, रात्रौ पक्षिणः निवसन्ति। अथ कदाचित् अवसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि,लघुपतनकः नाम वायसः प्रबुद्धः कृतान्तम् इव द्वितीयम् आयान्तं व्याधम् अपश्यत्। तम् अवलोक्य अचिन्तयत् **'अद्य प्रातः एव अनिष्टदर्शनं जातम्, न जाने किम् अनभिमतं दर्शयिष्यति'** इति उक्त्वा तदनुसरणक्रमेण व्याकुलः चलितः। यतः-

**शोकस्थानसहस्राणि, भयस्थानशतानि च।**
**दिवसे दिवसे मूढम्, आविशन्ति ,न पण्डितम् ।। ३ ।।**

अन्यत् च,विषयिणाम् इदम्, अवश्यं कर्तव्यम्,

**उत्थायोत्थाय बोद्धव्यम्, महद् भयम् उपस्थितम्।**
**मरण-व्याधि-शोकानां, किमद्य निपतिष्यति ।। ४ ।।**

**(विवरणम् )** गोदावरी तीरे विशालः शाल्मलीतरुः अस्ति। पक्षिणः नानादेशात् तत्र आगच्छन्ति । रात्रौ निवसन्ति । एकदा लघुपतनकः नाम वायसः प्रातः काले प्रबुद्धः भवति। यमम् इव स्थितं व्याधम् पश्यति। 'अद्य प्रातः एव अनिष्टदर्शनं जातम्। किम् अनभिमतं भवति, न जाने 'इति व्याकुलचित्तः भवति। यः आलोचनां कर्तुं न पारयति सः मूर्खः भवति। तादृशम्, प्रतिदिनं सहस्रशः दुःखानि, शतशः भयानि च आवहन्ति। यः आलोचनां कर्तुं पारयति सः पण्डितः भवति। तादृशं दुःखानि वा भयानि वा किमपि कर्तुं न पारयन्ति । किञ्च वस्तुसञ्चयन- स्वभावी अवश्यम् अद्य, मरण-व्याधि-शोकानां मध्ये कीदृशं वा भयं सम्भवति इति प्रयत्नतः जानीयात्।

### २.३.२.तण्डुलकणानां कृते कपोतानां लोभनम्

**(मूलम्)** अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम्।सः च प्रच्छन्नः भूत्वा स्थितः। तस्मिन् एव काले चित्रग्रीवः नाम कपोतराजः सपरिवारः वियति विसर्पन्, तान् तण्डुलकणान् अवलोकयामास। (विवरणम्) व्याधः तण्डुलकणान् विकिरति। जालं प्रसारयति। प्रच्छन्नः भवति। अत्रान्तरे- चित्रग्रीवनामा कश्चन कपोतराजः अस्ति। परिवारेण साकं गगने गच्छन् वर्तते । सः तण्डुलकणान् पश्यति।

**स्वावलोकनप्रश्नाः**

१).लघुपतनकः कः ?

२).शोकस्थानसहस्राणि भयस्थानशतानि च कम् आविशन्ति ? मूढं वा, पण्डितं वा ?

३).कपोतराजः कः ?

## २.४.अविचारितं कर्म न कर्तव्यम् -चित्रग्रीवस्य कथनम् -

**(मूलम्)** ततः कपोतराजः तण्डुलकणलुब्धान् कपोतान् प्रति आह-कुतः अत्र निर्जने वने तण्डुलकणानां सम्भवः ? तत् निरूप्यतां तावत्। भद्रम् इदं न पश्यामि। प्रायेण अनेन तण्डुलकणलोभेन अस्माभिः अपि तथा भवितव्यम् --

**कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।**
**वृद्धव्याघ्रेण सम्प्राप्तः पथिकः सः मृतो यथा ।। ५ ।।**

कपोताः ऊचुः- ‘ कथम् एतत् ’। सः अब्रवीत् --

**(विवरणम्)** कपोताश्च तण्डुलकणेषु लुब्धाः उआशावहाः, भवन्ति। चित्रग्रीवः तादृशान् कपोतान् - निर्जनवने तण्डुलकणानां विकिरणं न सम्भवति। एतेषु लोभः हानिकरः भवति। प्रमादं जनयति। कङ्कणस्य लोभेन पथिकः व्यघ्रेण व्यापादितः। अतः सर्वथा अविचारितं कर्म न कुर्वीत-इत्येवं वदति।तत् कथम् इति कपोताः सकुतूहलं पृच्छन्ति। चित्रग्रीवः तत् कथां कथयितुं सिद्धः भवति।

## २.५.वृद्धव्याघ्र - पान्थयोः कथावर्णनम्

### २.५.१.वृद्धव्याघ्रस्य वृत्तान्तम्

(मूलम्) अहम् एकदा दक्षिणारण्ये चरन् अपश्यम्। एकः वृद्धव्याघ्रः स्नातः, कुशहस्तः, सरस्तीरे ब्रूते - ‘भो भोः पान्थाः ! इदं सुवर्णकङ्खणं गृह्यताम’।

(विवरणम्) अत्र ‘अहम्’ नाम चित्रग्रीवः। सः कदाचित् दक्षिणप्रान्त-अरण्येषु चरन् अस्ति। तत्र कश्चन वृद्धं व्याघ्रं पश्यति। सः व्याघ्रः प्रतिदिनं स्नानम् आचरति। हस्ते दर्भां धरति। सरसः तीरे उपविशति। गच्छताम् आगच्छतां च पथिकजनानां सुवर्णकङ्कणं दर्शयति। स्वीकरणाय पथिकान् पृच्छति।

## २.५.२.पान्थस्य संशयाधिगमनम्

(¨ÉÚÉÉÂ) ततः लोभाकृष्टेन केनचित् पान्थेन आलोचितम् – 'भाग्येन एतत् सम्भवति। किन्तु अस्मिन् आत्मसन्देहे प्रवृत्तिः न विधेया। यतः –

**अनिष्टात् इष्टलाभेऽपि न गतिः जायतेऽशुभा।**
**यात्रास्ते विषसंसर्गः अमृतं तदपि मृत्यवे ।। ६ ।।**

किन्तु सर्वत्र अर्थार्जने प्रवृत्तिः सन्देहः एव । तथा च उक्तम् –

**न संशयम् अनारुह्य नरः भद्राणि पश्यति।**
**संशयं पुनः आरुह्य यदि जीवति पश्यति ।। ७ ।।**

तत् निरूपयामि तावत्'। प्रकाशं ब्रूते –– कुत्र तव कङ्कणम् ? व्याघ्रः हस्तं प्रसार्य दर्शयति। पान्थः अवदत् – कथं मारात्मके त्वयि विश्वासः ? व्याघ्रः उवाच 'शृणु! रे पान्थ ! प्राक् एव यौवनदशायाम् अतिदुर्वृत्तः आसम्। अनेक–गो–मानुषाणां वधात् मे पुत्राः मृताः दाराश्च। वंशहीनश्च अहम्। ततः केनचित् धार्मिकेण अहम् आदिष्टः– 'दान–धर्मादिकं चरतु भवान्'। तत् उपदेशात् इदानीम् अहं स्नानशीलः, दाता, वृद्धः,गलित–नख– दन्तः कथं न विश्वासभूमिः ?

**(विवरणम्)** तत्र कश्चन पथिकः सुवर्णकङ्कणे आशां वहति। आकर्षितः भवति। अयं च सुवर्णावकाशः अदृष्टवशात् जायते। परम् अत्र आत्मा संशयम् उद्भावयति।तत्र तु नैव प्रवर्तेत। अनिष्टात् अपि इष्टस्य सिद्धिः कदाचित् भवत्येव। तावता किमपि अशुभम्उअरिष्टं नैव जायते। यत्र वस्तुतः विषस्य संसर्गः वर्तते,तत् अमृतम् अपि मृत्योः कारणं भवति। अपि च सर्वेषु कार्येषु धनार्जनाय प्रवर्तनं संशयास्पदमेव भवति। तथा हि – मानवः संशयमप्राप्य श्रेयांसि न अधिगच्छति। मानवः संशयान् अवश्यं प्राप्नुयात्। समर्थः विविच्य तान् संशयान् अपनुदति = अधिगच्छति। कर्मणि प्रवर्तते। साफल्यं लभते। असमर्थस्तु संशयात्मा सन् विनश्यति। मानवः संशयान् अधि–गत्य अपि यदि जीवति, तदा सः अवश्यं भद्राणि पश्यति इति मनसि चिन्तयति।तत् निरूपयितुं च सिद्धः भवति। कङ्कणं दर्शयतु इति उच्चैः पृच्छति।व्याघ्रस्य विश्वसनीयतां प्रति च सन्देहं प्रकटयति।व्याघ्रः पथिकाय कङ्कणं दर्शयति। तस्य विशावासं च जनयति।

**२.५.३.धर्मस्य अष्टविधत्वम्---**

**(मूलम् )** यतः **-इज्या- अध्ययन-दानानि तपः सत्यं धृतिः क्षमा।**
**अलोभः इति मार्गोऽयं धर्मस्य अष्टविधः स्मृतः।।८।।**

**तत्र पूर्वः चतुर्वर्गः दम्भार्थाम् अपि सेव्यते।**
**उत्तरस्तु चतुर्वर्गः महात्मन्येव तिष्ठति ।। ९।।**

मम च एतावान् लोभविरहः येन स्वहस्तस्थम् अपि सुवर्णकङ्कणं यस्मै कस्मैचित् दातुम् इच्छामि। तथापि व्याघ्रः मानुषं खादति इति लोकप्रवदो दुर्निवारः। यतः -

**गतानुगतिकः लोकः कुट्टनीम् उपदेशिनीम्।**
**प्रमाणयति नो धर्मे यथा गोघ्नम् अपि द्विजम् ।। १० ।।**

मया च धर्मशास्त्राणि अधीतानि। शृणु -

**मरुस्थल्यां, यथा वृष्टिः क्षुधार्ते भोजनं तथा।**
**दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ।। ११ ।।**

**प्रणाः यथा आत्मनोऽभीष्टाः भूतानाम् अपि ते तथा।**
**आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ।। १२ ।।**

अपरं च -

**प्रत्याख्याने च आदाने च सुखदुःखे प्रियाप्रिये।**
**आत्मौपम्येन पुरुषः प्रमाणम् अधिगच्छति ।। १३ ।।**

अन्यत् च -

**मातृवत् परदारेषु परद्रव्येषु लोष्टवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ।। १४ ।।**

त्वं च अतीव दुर्गतः। तेन तत् तुभ्यं दातुं सयत्नः अहम्। तथा च उक्तम् -

**दरिद्रान् भर कौन्तेय ! मा प्रयच्छेश्वरे धनम्।**
**व्याधितस्य औषधं पथ्यं नीरुजस्य किम् औषधैः ।। १५ ।।**

अन्यत् च -

**दातव्यम् इति यत् दानं दीयते अनुपकारिणे।**
**देशे काले च पात्रे च तत् दानं सात्त्विकं विदुः ।। १६ ।।**

तत् अत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण'-इति।

**(विवरणम्)** १.यजनम् २.अध्ययनम् ३.दानम् ४.तपसः आचरणम्, ५.सत्यस्य अनुष्ठानम्, ६.धैर्येण प्रवर्तनम्, ७.सहनम्, ८.लोभस्य अभावःउ यदृच्छालाभसन्तुष्टिः, एवं धर्मः अष्टविधः विद्यते। तत्र पूर्वाणि यजन-अध्ययन-दान-तपांसि चत्वारि अहङ्कारतृप्त्यै अपि अनुष्ठीयन्ते। परे सत्य-धृति-क्षमा-अलोभाः चत्वारः तु उत्तमेषु एव दृश्यन्ते। किञ्च मम च लोभः नास्ति। अत एव एतत् कङ्कणं यस्मै कस्मैचित् दातुम् इच्छामि। व्याघ्रः मानुषं खादति इति लोकप्रवादः अस्ति। सत्यम् एव।परं तस्मिन् विषये अहं किमपि कर्तुम् असमर्थः एव। अयं लोकः गतानुगतिकः अस्ति। पूर्वं कदाचित् एका स्त्री परिस्थितिकारणतः वेश्याजीवनं यापितवती । सैव इदानीं शुभ्रजीवनेन शुद्धा अपि जाता। परम् 'अहम् उत्तमा सती ' इति सा यदि इदानीम् अन्येषाम् धर्मवि-षयकम् उपदेशं करोति, लोकः तम् उपदेशं न स्वीकरोति। तस्याः गतं चरितम् एव अनुचिन्त्य तस्यां प्रामाण्यं न स्थापयति। एवं लोकः गतमेव अनुसृत्य, गतभावनया एव प्रवर्तते। एवं विप्रः कालप्रभात् गोध्नः जातः, पश्चात्तापम् अनुभूय शुद्धस्वभावः जातः। एवं सः पवित्रवर्तनः अपि, जनाः तं साधुशीलं न मन्वते। तस्य पूर्वचरितं गोध्नत्वम् एव मनसि निधाय तस्मिन् विषये प्रवर्तन्ते।लोकनिन्दा अनिवार्या खलु इति।

पथिक !अपि च अहं धर्मशास्त्रम् अपि पठितवान् अस्मि। ऊषरक्षेत्रे वृष्टिः यथा वा उपयोगिनी भवति, क्षुधा पीडितस्य, भोजनं क्षुधः उपशमनाय यथा वा भवति, एवं दरिद्राय कृतं दानम् अपि, फलवत् भवति। साधवः आत्मवत् सर्वभूतेषु प्रवर्तन्ते। इतरेषां तिरस्करणे वा स्वीकरणे वा,इतरेषां सुखे वा दुःखे वा, इतरेषां प्रिये वा अप्रिये वा यः आत्मना तुल्यं व्यवहरति सः प्रामाण्यम् अधिगच्छति। परस्त्रीषु यः मातृवत् प्रवर्तते, परेषां धनेषु यः लोष्टवत् उच्छिन्नघटानां खण्डेषु इव, प्रवर्तते, सर्वेषु भूतेषु आत्मनि इव प्रवर्तते ,सः पण्डितः भवति। पथिक ! प्रत्युत भवान् दरिद्रः इव अवभासते। अत एव एतत् कङ्कणं भवतः दातुम् इच्छामि। दानं सर्वत्र दरिद्रस्यैव कर्तव्यं भवति। सम्पन्नस्य कृते दानं व्यर्थम् एव भवति। औषधसेवनं रोगिणः हितम् आयोजयति।

रोगहीनस्य औषधस्वीकरणं कथम् उपकरोति। अपि च अवश्यं दातव्यम् इति बुद्ध्या समुचितप्रदेशे, समुचितकाले, यत् अनुपकारिणे दीयते तत् सात्विकं दानं भवति। तस्मात् मयि विश्वस्तः भवतु। सरसि स्नानम् आचरतु। इदं सुवर्णकङ्कणं गृह्णातु इति व्याघ्रः पथिकं प्रेरयति।

## २.५.४.अस्थाने पान्थस्य विश्वसनम् -

**(मूलम्)** ततो यावत् असौ तत् वचः प्रतीतः लोभात् सरः स्नातुं प्रविशति, तावत् महापङ्के निमग्नः पलयितुम् अक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रः अवदत् -

'अहह, महापङ्के पतितः असि। अतः त्वाम् अहम् उत्थापयामि' इति उक्त्वा शनैः शनैः उपगम्य, तेन व्याघ्रेण धृतः, स पान्थः अचिन्तयत् -

**न धर्मशास्त्रं पठतीति कारणम्, न चापि वेदाध्ययनं दुरात्मनः।**
**स्वभाव एवात्र तथातिरिच्यते, यथा प्रकृत्या मधुरं गवां पयः ।। १७ ।।**

किञ्च -

**अवशेन्द्रियचित्तानाम् हस्तिस्नानम् इव क्रिया।**
**दुर्भगाभरणप्रायः ज्ञानं भारः क्रिया विना ।। १८ ।।**

**(विवरणम्)** पथिकः व्याघ्रस्य वचांसि विश्वसति। सुवर्णकङ्कणे आशया स्नातुं सरः प्रविशति। महाकङ्के निमग्नः भवति। महापङ्कतः आत्मानम् उद्धर्तुम् असमर्थः भवति। व्याघ्रः महाकङ्के पतितं पथिकं पश्यति। एवं वदति- 'बत ! महाकङ्के निमग्नः असि। उत्थापयामि त्वाम् इति परिहासपूर्वकं वदति। पथिकस्य कण्ठं धरति। तदा पथिकः स्वस्य अविचारितकर्मत्वं प्रति चिन्तयति।

अविवेकिनः बुद्धिः एव तथा भवति। गवां पयः स्वभावतः एव यथा वा मधुरं भवति। तथा दुरात्मनः बुद्धिः अपि स्वभावात् एव दौष्ट्यं वहति। तत्र धर्मशास्त्राणाम् अनध्ययनं वा, वेदानाम् अनध्ययनं वा कारणं न भवति। परं जन्मनैव स्वभावः तादृशः भवति ।

अपि च यथा वा गजस्य स्नानक्रिया, विधवायाः स्वर्णालङ्कारधारणं च निरुपयोगम् एव, तथैव आचरणं विना केवलं ज्ञानम् अपि निरुपयोगं सत्, मानवानां भारकारि भवति।

### २.५.५.स्वस्य अविचारितकर्मणः पान्थस्य चिन्तनम्

**(मूलम्)** तत् मया भद्रं न कृतम्, यत् अत्र मारात्मके विश्वासः कृतः ।
तथाहि उक्तम् -

**नदीनां शस्त्रपाणीनां, नखिनां शृङ्गिणां तथा।**
**विश्वासो नैव कर्तव्यः, स्त्रीषु राजकुलेषु च ।। १९ ।।**

अपरं च -

**सर्वस्य हि परीक्ष्यन्ते, स्वभावा नेतरे गुणाः।**
**अतीत्य हि गुणान् सर्वान्, स्वभावो मूर्ध्नि वर्तते ।। २० ।।**

अन्यं च –

स हि गगनविहारी कल्मषध्वंसकारी, दशशतकरधारी ज्योतिषां मध्यचारी।
विधुरपि विधियोगात् ग्रस्यते राहुणासौ, लिखितमपि ललाटे प्रोज्झितुं कः समर्थः।।२१।।

इति चिन्तयन् एव असौ व्याघ्रेण व्यापादितः खादितश्च। अतः अहं ब्रवीमि 'कङ्कणस्य तु लोभेन...' इत्यादि। (विवरणम्) मया मारत्मके विश्वासः कृतः तत् न युक्तम्। वर्षेषु सत्सु नद्यः उद्धततया प्रवहन्ति। प्रवाहस्य उद्धृतिः च यदा कदापि वा वर्धेत। प्रमादाय कल्पेत। अतः नदीनां विषये विश्वासः नैव कर्तव्यः। आयुधधारिणः प्रमादवशात् वा, उन्मादवशाद्वा, उत्पातं जनयन्ति। अतः आयुधधारिणां विषये अपि विश्वासः न तथा समीचीनः। नखिनः इतरान् नखैः छिन्दन्ति। एवं शृङ्गिणः अपि शृङ्गैः क्षोभां जनयन्ति। अतः नखिनां सिंहव्याघ्रादीनाम्, शृङ्गिणां वृषभादि जन्तूनां विषये वा विश्वासः प्रमादकरः। स्त्रियः चपलचित्ताः।कदा,कम्, किं, किमर्थं, भाषन्ते इति नैव अवगतः भवति। राजानः नाम अधिकारिणः। ते अपि कदाचित् एकथा कथयन्ति। तदेव अन्यं प्रति अन्यथा ब्रुवन्ति। किं प्रमाणत्वेन स्वीकार्यम् इत्यत्र संशयः। अतः स्त्रीषु वा राजसु वा विश्वासः न श्रेयस्करः। एते कदाचित् उपकारं कुर्वन्ति। कदाचित् अपकारमपि कुर्वन्ति, कदा किं कुर्वन्ति इति न जानीमः।

सदा स्वभावाः एव परीक्ष्यन्ते। गुणास्तु न परिशीलनाय स्वीक्रियन्ते।गुणातीततया स्वभावः व्यक्तिषु जायते। गुणापेक्षया स्वभावस्यैव प्रमुखं स्थानम् अस्ति।

किञ्च चन्द्रः आकाशे विहरति। प्रमादाय अल्पः अवकाशः विद्यते।कल्मषम् (तमः) अपाकरोति। पुण्यशीलः भवति। दश शतान् करान् (किरणानि) धरति। परापतन्तं कष्टम् अपाकर्तुम् अपि पारयति।ग्रहाणां मध्ये वसति। तस्य समीचीना भद्रता व्यवस्था अस्ति। एवं बहुधा सम्पन्नः अपि अयं चन्द्रः विधियोगात् राहुणा कवलितः भवति। तथा हि – फालभागे ब्रह्मणा लिखितं प्रमार्ष्टुं कः समर्थः भवति। यावान् महापुरुषः वा भवतु, सः कर्मणा आर्जितं, ब्रह्मणा फालभागे लिखितम् अवश्यम् अनुभवेत् एव, इति एवं परितापम् अनुभवति। व्याघ्रेण गृह्णाति। व्यापादितः भवति। खादितः अपि भवति। अत्र अयं समुचितः सन्दर्भः इति मत्वा, अहं (चित्रग्रीवः) कङ्कणस्य तु लोभेन ... इति कथां श्रावितवान् अस्मि।

### २.५.६.विचारितकर्मणः महत्त्वम्

**(मूलम्)** अतः सर्वथा 'अविचारितं कर्म न कर्तव्यम् । यतः –

सुजीर्णम् अन्नम्, सुविचक्षणः सुतः, सुशासिता स्त्री, नृपतिः सुसेवितः।
सुचिन्त्य च उक्तं, सुविचार्य यत्कृतं, सुदीर्घकालेऽपि न याति विक्रियाम्।। २२ ।।

**(विवरणम्)** कङ्कणलुब्धकस्य कथा श्रवणात् अपि, येन केनापि प्रकारेण वा, कर्म सुविचार्य कर्तव्यं भवति इति ज्ञायते। तथा हि- कणशः जीर्णम् अन्नम् (भोजनम्), विवेकसम्पन्नः पुत्रः, क्रमशिक्षणायुता स्त्री, विश्वा- सपूर्णं सेवितः राजा, विचार्य उक्तं वचनम्, आलोच्य कृतं कर्म, एतानि चिरात् अपि विकारं न आप्नुवन्ति।

**स्वावलोकनप्रश्नाः**

१).भद्राणां दर्शनाय केषाम् अधिगमनम् आवश्यकं भवति ?

२).धर्मस्य अष्टविधः मार्गः कः ?

३).विश्वासः केषु नैव कर्तव्यः ?

४).क्रियां विना ज्ञानं कीदृशं भवति ?

५).सुदीर्घकालेऽपि न याति विक्रियाम् -किं किं तत् ?

## २.६.चित्रग्रीवस्य वचः श्रुत्वा, युवकपोतस्य परुषभाषणम्

(मूलम्)एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् आह - आः ! किम् एवम् उच्यते ?

**वृद्धानां वचनं ग्राह्यम् आपत्काले ह्युपस्थिते।**
**सर्वत्र एवं विचारे तु भोजनेऽपि अप्रवर्तनम् ।। २३ ।।**

यतः

**शङ्काभिः सर्वमाक्रान्तम् अन्नं पानं च भूतले।**
**प्रवृत्तिः कुत्र कर्तव्या ? जीवितव्यं कथं नु वा ? ।। २४ ।।**

**ईर्ष्यी घृणी तु असन्तुष्टः क्रोधनो नित्यशङ्कितः।**
**परभाग्योपजीवी च षडेते दुःखभागिनः।। २५ ।।**

**(विवरणम्)** चित्रग्रीवेण कथितां कङ्कणलुब्धकस्य पथिकस्य वृत्तान्तं कश्चित् युवकपोतः शृणोति। गर्वेण एवं वदति। भोः ! कुतः वृद्धः चित्रग्रीवः एवं वदति यदा वा आपदः सम्भवन्ति तदा एव वृद्धानां वचनं श्रोतव्यं भवति। सर्वत्र यदि वृद्धानां वचनं शृणुमः, स्वीकुर्मः, पालयामः, तदा वयं विशिष्य युवानः भोजने अपि प्रवृत्तिं न कुर्मः

एव। लोके अन्नपानीयानि सर्वाणि अपि शङ्कापुरस्सरम् एव प्राप्तव्यानि सन्ति। एवं सति कुत्र प्रवृत्तिं कुर्मः ? कथं वा जीवामः ? १).असूयापरः, २).दयाहीनः, ३).यः सदा असन्तृप्तिम् एव अनुभवति सः, ४).यः सर्वदा क्रोधं वहति सः,५) यः सर्वत्र सर्वकार्येषु संशयात्मा भवति सः, ६) यः इतरेषां भाग्येन (सम्पदा)जीवनं यापयति सः, एते षट् सर्वकाल– सर्वावस्थासु अपि दुःखम् एव प्राप्नुवन्ति।

## २.७.लोभस्य पर्यवसानम्

(मूलम् )एतत् श्रुत्वा सर्वे कपोताः तत्र उपविष्टाः। यतः –

**सुमहान्ति अपि शास्त्राणि, धारयन्तो बहुश्रुताः।**
**छेत्तारः संशयानां च, क्लिश्यन्ते लोभमोहिताः ।। २६ ।।**

अन्यत् च -

**लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते।**
**लोभात् मोहश्च, नाशश्च, लोभः पापस्य कारणम्।। २७ ।।**

अन्यत् च -

**असम्भवं हेममृगस्य जन्म,तथापि रामो लुलुभे मृगाय।**
**प्रायः समापन्न-विपत्ति-काले धियोऽपि पुंसां मलिनीभवन्ति ।। २८ ।।**

अनन्तरं सर्वे जालेन बद्धा बभूवुः। ततो यस्य वचनात् तत्र अवलम्बिताः तं सर्वे तिरस्कुर्वन्ति। यतः -

**न गणस्याग्रतः गच्छेत्, सिद्धे कार्ये समं फलम्।**
**यदि कार्यविपत्तिः स्यात् ,मुखरः तत्र हन्यते ।। २९ ।।**

(विवरणम्) कपोताः, युवकेन उक्तं शृण्वन्ति। सर्वे तत्र भुवि जाले पतन्ति। तथा हि- सुमहान्ति शास्त्राणि पठन्ति। बहुशास्त्रज्ञानसम्पन्नाः जायन्ते। परेषां संशयान् (समस्याः) शास्त्रानुकूलतया परिष्कुर्वन्ति, धर्मानुकूलतया च समादधति च। परम्, स्वेषां विषये तु लोभेन मोहेन आकृष्टाः भवन्ति। परं क्लेशम् अनुभवन्ति। अहो कष्टम् एतेषाम्, एते परोपदेशे एव पाण्डिताः ।

किञ्च लोभः नाम आशा। आशा, विषयेषु वा, वस्तुषु वा कामम् (इच्छाम्) जनयति। इच्छायाः असिद्धौ मनसि क्रोधः आविशति। एवम् इच्छायाः असिद्धौ परोक्षरूपेण लोभः, क्रोधम् अपि जनयति। क्रोधात् कातरताम् एति। नाशं आप्नोति। एवं सर्वथा लोभः पापस्यउ असमीचीनतायाः, अश्रेयसः कारणं भवति।

किञ्च सुवर्णमयस्य मृगस्य उत्पत्तिः कुत्रापि कदाचिदपि न सम्भवति। इमं विषयं श्रीरामः जानात्येव। तथापि सः कनकमयाय मृगाय आशावहः भवति। तथा हि – यदा विपदः परापतन्ति, तदा मानवानाम् अपि बुद्धयः विवेकात् भ्रष्टाः भवन्ति। विवेचनां कर्तुं न पारयन्ति। अपविधानम् अवलम्बन्ते। एवं मलिनाः भवन्ति।

ततः सर्वे कपोताः लुब्धकेन प्रसारिते जाले पतन्ति। आपदं निश्चिन्वन्ति। परस्परं मुखानि पश्यन्ति। तण्डुलकणानां कृते अधः भुवि पतितुम् उपदिष्टम्, कपोताः सर्वे निन्दन्ति। तथा हि – यः कोऽपि वा, समुदायस्य (दलस्य) पुरतः सोत्साहं न गच्छेत्। यदि फलं सिध्यति तर्हि सर्वेषां समानं भवति। अग्रगामिनः अधिकफलस्य दानाय अनुगामिनः न इच्छन्ति। एवं पुरतः गमने विशेषफलं किमपि न भवति। यदि कार्यस्य विपत्तिः भङ्गः नाशः वा भवति, तदा वाचालतया अग्रगामित्वं स्वीकृतवतः मरणम् एव शरणं भवति। कः अपि सहायम् न करोति। कः अपि न सहकरोति। प्रत्युत असमर्थनायकत्वम् इति निन्दन्ति।

## २.८.चित्रग्रीवस्य सान्त्वनम्

**(मूलम्)** तस्य तिरस्कारं श्रुत्वा चित्रग्रीवः उवाच – 'नायम् अस्य दोषः। यतः –

**आपदाम् आपतन्तीनां हितः अपि आयाति हेतुताम्।**
**मातृजङ्घा हि वत्सस्य स्तम्भीयति बन्धने ।। ३० ।।**

(विवरणम्) चित्रग्रीवः, कपोतैः कृतं, जाले पतनाय सूचितस्य निन्दनं, शृणोति। अयं तस्य दोषः न भवति इति सान्त्वयति। तथा हि – हितैषिणाम् उपदेशः प्रायशः सदा श्रेयसम् एव साधयति। परं कदाचित् आपदाम् आप- तनाय अपि कारणं भवति। ते लाभदृष्टिं (आहारलाभम्) मनसि निधाय एव उपदिशन्ति। परं तत्र वस्तुस्थितिः अन्या भवति। मातुः जङ्घा यद्यपि बालकस्य विलासाय एव प्रायशः भवति, परं कदाचित् सा एव मातुः जङ्घा बालकस्य पादबन्धने स्तम्भनाय अपि कारणं भवति।
(मूलम् )अन्यत् च –

**सः बन्धुः यः विपन्नानाम् आपत् उद्धरणक्षमः।**
**न तु भीत-परित्राण-वस्तु-उपालम्भ-पण्डितः ।। ३१ ।।**

**(विवरणम्)** यः, आपन्नान् आपद्भ्यः उद्धर्तुं समर्थः भवति, सः एव बन्धुः भवति। यः आपत्सु भीतानां रक्षणं परित्यज्य, आपदः कारकाणां निन्दने एव कालक्षेपं कर्तुं कुशलः भवति सः बन्धुः भवितुं न अर्हति।

## २.९.चित्रग्रीवस्य धैर्यकथनम्

(मूलम्) विपत्काले विस्मयः एव कापुरुषलक्षणम्। तत् अत्र धैर्यम् अवलम्ब्य प्रतीकारः चिन्त्यताम्। यतः –

**विपदि धैर्यम्, अथ अभ्युदये क्षमा, सदसि वाक्पटता, युधि विक्रमः।**
**यशसि च अभिरुचिः, व्यसनं श्रुतौ, प्रकृतिसिद्धम् इदं हि महात्मनाम् ।।३२ ।।**

**सम्पदि यस्य न हर्षः, विपदि विषादो, रणे च धीरत्वम्।**
**तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ।। ३३ ।।**

**अन्यत् च -**

**षड् दोषाः पुरुषेण इह, हातव्याः भूतिम् इच्छता।**
**निद्रा तन्द्रा भयं क्रोधः, आलस्यं दीर्घसूत्रता ।। ३४ ।।**

**(विवरणम्)** आपत्सु आश्चर्यस्य अधिगनमं कुच्छितपुरुषस्य लक्षणम्। वयं कुच्छिताः न भवेम। अतः वयं धैर्येण प्रतीकारं कर्तुं चिन्तयामः। तथा हि - आपत्सु दृढमनस्कता, विभवेषु संयमनम्,पण्डितसभासु वाचः पटिमा, समरे शौर्येण विजृम्भणम्, कीर्तिप्रतिष्ठासु अभिनिवेशः, शास्त्राध्ययने आसक्तिः, महात्मानः एतानि सर्वाणि अपि जन्मतः एव लभन्ते।

यः सम्पत्सु न सन्तोषम् अधिगच्छति, यः विपत्सु खेदं न प्राप्नोति, यः युद्धे च धैर्यं न जहाति, सः त्रिषु लोकेषु श्रेष्ठः भवति। तादृशं पुत्रम्, जननी विरलतया प्रसूते।

किञ्च यः जीवने वृद्धिं प्राप्तुम् इच्छति, सः निद्रां त्यजेत्। तन्द्राम्उ शारीरक-अलसत्वम्, न प्राप्नुयात्। भीतिं विसर्जयेत्। क्रोधं न वहेत्। आलस्यं (मान्द्यम्) दूरीकुर्यात्। दीर्घचिन्तनं च परित्यजेत्।

## २.१०.ऐकमत्यस्य आवश्यकताबोधनम्

**(मूलम्)** इदानीम् अपि एवं क्रियताम् । सर्वैः एकचित्तीभूय, जालम् आदाय, उड्डीयताम् । यतः -

**अल्पानाम् अपि वस्तूनां, संहतिः कार्यसाधिका।**
**तृणैः गुणत्वम् आपन्नैः, बध्यन्ते मत्तदन्तिनः।। ३५ ।।**

**संहतिः श्रेयसी पुंसां, स्वकुलैः अल्पकैः अपि।**
**तुषेणापि परित्यक्ता, न प्ररोहन्ति तण्डुलाः।। ३६ ।।**

इति विचिन्त्य पक्षिणः सर्वे जालम् आदाय उत्पतिताः।

**(विवरणम्)** भोः मित्राणि,परस्परम् निन्दनं मास्तु।वयम् इदानीम् एवं कुर्मः। वयम् एकीभवामः। जालं स्वीकुर्मः। ऊर्ध्वं गच्छामः। तथा हि - संहतिः नाम समीकरणम्। वस्तूनि अल्पानि एव भवन्तु नाम। परं तेषाम् एकत्र समीकरणम्, कार्यस्य साधनाय समर्थं भवति। गुणत्वम् आपन्नानि अल्पानि तृणानि एव , मत्तान् अपि दन्तिनः निर्बद्धुम् समर्थानि भवन्ति खलु।

किञ्च स्वसम्बन्धिभिः नीचैःउअल्पैः, अपि एकीभूय कार्यकरणं (संहतिः) मानवानां श्रेयः साधयति। तुषः तण्डुलसम्बन्धी, अल्पः एव भवति। तथापि तण्डुलः तुषं विना न प्ररोहति। अल्पेनापि तुषेण सहितः सन् एव तण्डुलः प्ररोहणाय समर्थः भवति। तुषस्य संहतिः, अत्र तण्डुलस्य प्ररोहणसामर्थ्यं ददाति।

जालस्य कृते व्याधस्य निरीक्षणम्

**(मूलम् )** अनन्तरं स व्याधः सुदूरात् जालापहारकान् तान् अवलोक्य पश्चात् धावन् अचिन्तयत् -

**संहतास्तु हरन्ति एते मम जालं विहङ्गमाः।**
**यदा तु निपतिष्यन्ति वशम् एष्यन्ति मे तदा ।। ३७ ।।**

ततः तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु सः व्याधः निवृत्तः।

(विवरणम्)अत्रान्तरे कपोताः ऐकमत्येन जालम् ऊर्ध्वम् अपहरन्ति। भूमौ, स्थित्वा किरातः जालम् अपहरतः कपोतान् पश्यति। पश्चात् कियत् दूरम् अनुधावति। किरातः कपोतान् अनुसर्तुम् असमर्थः भवति।एवं चिन्तयति। एते पक्षिणः ऐकमत्येन मम जालम् अपहरन्ति। यदा एते अधः पतन्ति, तदा एते मम वशम् आयान्ति इति आलोच्य कपोतानाम् अनुसरणात् विरमति।कपोताश्च क्रमशः दूरं गच्छन्ति। किरातः निराशया निवृत्तः भवति।

**स्वावलोकनप्रश्नाः**

१).दुःखभागिनः षट् के ?

२).क्रोधः कस्मात् प्रभवति ?

३).पापस्य कारणं किम् ?

४).कः बन्धुः भवति ?

५).भूतिम् इच्छता पुरुषेण हातव्याः षड् दोषाः के ?।

६).संहतिः कीदृशी भवति ?

## २.११.हिरण्यकं प्रति गमनम्

**(मूलम्)** अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः - 'किम् इदानीं कर्तुम् उचितम्'। चित्रग्रीवः उवाच -

**'माता मित्रं पिता चेति स्वभावात् त्रितयं हितम्।**
**कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः।। ३८ ।।**

तत् अस्माकं मित्रं हिरण्यकः नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति। सः अस्माकं पाशान् छेत्स्यति'इति आलोच्य सर्वे हिरण्यकविवरसमीपं गताः। हिरण्यकश्च सर्वदा अपायशङ्कया शतद्वारं विवरं कृत्वा निवसति। ततः हिरण्यकः कपोतावपातभयात् चकितः तूष्णीं स्थितः।

**(विवरणम्)** यदा किरातः निवृत्तः भवति, तदा कपोताः एकत्र उपविशन्ति। कर्तव्यं चिन्तयन्ति। तत्र चित्रग्रीवः - १).जननी, २).जनकः, ३).मित्रं च इति एते त्रयः स्वभावात् हितकाङ्क्षिणः वा, हितकारकाः वा भवन्ति। अन्ये तु निमित्तवशात् हितस्य उपदेष्टारः भवन्ति। मम कश्चित् मित्रम् अस्ति। सः मूषकराजः, तस्य नाम हिरण्यकः। सः गण्ड्क्याः तीरे चित्रवने निवसति। सः अस्मान् जालपाशेभ्यः मुक्तान् करोति, इति वदति। चित्रग्रीवेण उक्तं कपोताः शृण्वन्ति। सर्वे हिरण्यकस्य विवरं गच्छन्ति। हिरण्यकः अपि भद्रतादृष्ट्या विवरे शतानि द्वाराणि कृत्वा निवसति। अकस्मात् जालेन सह, विवरसमीपे कपोतानां पतनात् भयेन भ्रान्तः भवति, कम्पितः च भवति।

### २.११.१.चित्रग्रीव-हिरण्यकयोः सम्भाषणम्

**(मूलम्)** चित्रग्रीवः उवाच -'सखे। हिरण्यक! किम् अस्मान् न सम्भाषसे ? '। ततः हिरण्यकः तद्वचनं प्रत्यभि- ज्ञाय, ससम्भ्रमं बहि निस्सृत्य अब्रवीत्- 'आः पुण्यवान् अस्मि। प्रियसुहृत् मे चित्रग्रीवः समायातः --

**यस्य मित्रेण सम्भाषः, यस्य मित्रेण संस्थितिः।**
**यस्य मित्रेण संलापः ततः नास्तीह पुण्यवान् ।। ३९ ।।**

पाशबद्धान् च एतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा उवाच- ' सखे ! किम् एतत् ?'।

**(विवरणम्)** चित्रग्रीवः हिरण्यकम् आह्वयति। आत्मना सम्भाषितुं चोदयति। हिरण्यकः चित्रग्रीवस्य कण्ठस्वरं प्रत्यभिजानातिउ स्मरति। उत्साहसम्भ्रमेण विवरात् बहिः निस्सरति। चित्रग्रीवं पश्यति। चित्रग्रीवं प्रशंसति। चित्रग्रीवस्य मैत्रीलाभाय, हिरण्यकः 'मित्रेण सह सम्भाषणाय अवकाशः यस्य विद्यते, मित्रेण सह अवस्थातुम् अवकाशः यस्य वर्तते, मित्रेण सह सल्लापं कर्तुं अवकाशः यस्य जायते, तस्मात् अपरः कः पुण्यवान्

भवति' इति एवम् आत्मानं धन्यं भावयति। कपोतान् पाशबद्धान् पश्यति। क्षणं विस्मयम् एति। सखे ! किम् एतत् ? इति चित्रग्रीवं पृच्छति।

### २.११.२.स्वेषां दुरवस्थावर्णनम्

**(मूलम्)** चित्रग्रीवः अवदत् 'सखे !अस्माकं प्रक्तन-जन्म-कर्मणः फलम् एतत्।

**यस्मात् च येन च, यथा च यदा च यत् च,**
**यावत् च यत्र च, शुभ-अशुभम् आत्मकर्म।**
**तस्मात् च तेन च, तथा च तदा च तत् च,**
**तावत् च तत्र च, विधातृवशात् उपैति।। ४० ।।**

**रोग-शोक-परीताप-बन्धन-व्यसनानि च।**
**आत्मापराध-वृक्षाणां फलानि एतानि देहिनाम्'।। ४१।।**

एतत् श्रुत्वा हिरण्यकः चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरम् उपसर्पति।

**(विवरणम्)** चित्रग्रीवः- 'सखे !हिरण्क!एतत्, पूर्वजन्मनि अस्माभिः कपोतैः कृतस्य दुष्टकर्मणःउ पापस्य फलम् इति आत्मनः, अनुसारिणां च दुरवस्थां हिरण्यकाय निवेदयति। मित्र! यद् द्वारीकृत्य,येन साधनेन, यत्प्रकारतया, यस्मिन् काले, यस्मिन् प्रदेशे, यावत्परिमाणं शुभं वा अशुभं वा कर्म, पुरुषः आचरति, तद् द्वारी- कृत्यैव, तेन साधनेनैव, तत्प्रकारतयैव, तस्मिन् काले एव, तस्मिन् प्रदेशे एव, तावत्परिमाणं शुभं वा अशुभं वा आचरितस्य कर्मणः फलम् आप्नोति खलु। आत्मना (मानवेन) आचरिताः अपराधाः वृक्षसदृशाः भवन्ति। तेषाम् आत्मापराधवृक्षाणां १).रोगः, २).शोकः, ३).परितापः, ४).बन्धनम् (Arrest) ५).व्यसनानि (दुरभ्यासाः) इति एतानि पञ्च फलानि भवन्ति ' इति वदति। हिरण्यकः चित्रग्रीवेण उक्तं शृणोति। अनुपदं चित्रग्रीवस्य बन्धनं छेत्तुं सिद्धः भवति।

### २.११.३.चित्रग्रीवस्य औदार्यम्

**(मूलम्)** चित्रग्रीव उवाच-- 'मित्र ! मा मैवम्। अस्मत् आश्रितानाम् एषां तावत् पाशान् छिन्धि, तदा मम पाशं पश्चात् छेत्स्यसि। हिरण्यकोऽप्याह - अहम् अल्पशक्तिः। दन्ताश्च मे कोमलाः। तत् एतेषां पाशान् छेत्तुं कथं समर्थः ? तत् यावत् मे दन्ताः न त्रुट्यन्ति तावत् तव पाशान् छिन्द्मि। तदनन्तरम् एषाम् अपि बन्धनं यावत् शक्यं छेत्स्यामि ' इति। चित्रग्रीवः उवाच - 'अस्तु एवम्, तथापि यथाशक्त्या तेषां बन्धनं खण्डय। हिरण्यकेन उक्तम् आत्मपरित्यागेन यत् आश्रितानां परिरक्षणं तत् नीतिविदां न सम्मतम्। यतः-

**आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि।**
**आत्मानं सततं रक्षेत् दाररैपि धनैरपि ।। ४२ ।।**

अन्यत् च -

**धर्म-अर्थ-काम-मोक्षाणां प्राणाः संस्थितिहेतवः।**
**तान् निघ्नता किं न हतं, रक्षता किं न रक्षितम्।। ४३ ।।**

(विवरणम्) चित्रग्रीवः-'मित्र! एवं मा भवतु।एषा समीचीना पद्धतिः न भवति। माम् आश्रित्य एते आगताः। अतः तेषां पाशान् प्रथमं कर्तयतु। अनन्तरं मम पाशं निदानतया छेत्तुम् अर्हसि' इति निवेदयति।हिरण्यकः तस्य निवेदनं न अङ्गीकरोति, अहम् अधिकबलसम्पन्नः न अस्मि। तत्रापि मम दन्ताः अतीव कोमलाः। सर्वेषाम् अनु- यायिनां पाशान् छेत्तुम् अहम् असमर्थः एव। तथाकरणे मम दन्ताः त्रुट्यन्ति। प्रथमं भवतः अनुयायिनाम् पाशानां छेदने एव मम शक्तिः क्षीणम् एति। अनन्तरं पुनः भवतः पाशानां छेदनाय अन्यत्र गन्तव्यं भवति। मित्रे मयि सति,तादृशं कष्टं भवतः किमर्थम् ? प्रथमं भवतः पाशान् छित्वा,अनन्तरं यथाशक्ति तेषाम् अपि पाशान् छेत्स्यामि, इति चित्रग्रीवं वदति। चित्रग्रीवः पुनः अनुयायिनां पाशानां छेदनाय एव शठं वहति।

आत्मनः रक्षणम् अकृत्वा, परेषां परिरक्षणाय प्राधान्यस्य दानं नीतिविदः न अङ्गीकुर्वन्ति। आपदपेक्षया धनस्य रक्षणं प्रधानं भवति।धनापेक्षया दाराणां रक्षणं प्रधानं भवति। धनानां, दाराणां च अपेक्षया, सर्वदा आत्मनः रक्षणं प्रधानं भवति। अतः आत्मनः रक्षणं प्रति चिन्तनं प्रथमं कर्तव्यम्।

किञ्च १).धर्मः, २).अर्थः, ३).कामः, ४).मोक्षः एते चतुर्विधाः पुरुषार्थाः।एतेषाम् अनुष्ठानाय यस्य कस्यापि प्रथमं प्राणाः आवश्यकाः भवन्ति। अतः प्राणाः धर्म-अर्थ-काम-मोक्षाणां संस्थितेः हेतवः भवन्ति। तादृशान् आत्मनः प्राणान् निघ्नता मानवेन, किं हतं न भवति। तथा एव धर्म-अर्थ-काम-मोक्षाणां संस्थितिहेतून् प्राणान् रक्षता मानवेन,किं रक्षितं न भवति इति हिरण्यकः पुनः नीतिं बोधयति।

### २.११.४.चित्रग्रीवस्य आश्रितवात्सल्यम्

(मूलम्)चित्रग्रीवः उवाच 'सखे ! नीतिः तावत् ईदृशी एव। किन्तु अहम् अस्मत् आश्रितानां दुःखं सोढुं सर्वथा असमर्थः। तेन इदं ब्रवीमि। यतः --

**धनानि जीवितं चैव, परार्थे प्राज्ञः उत्सृजेत् ।**
**तन्निमित्तः वरं त्यागः, विनाशे नियते सति ।। ४४ ।।**

अयम् अपरश्च असाधारणः हेतुः -

**जाति-द्रव्य-गुणानां च, साम्यम् एषां मया सह।**
**मत् प्रभुत्वफलं ब्रूहि, कदा किं तत् भविष्यति।। ४५ ।।**

अन्यत् च -

**विना छेदनम् एवैते, न त्यजन्ति ममान्तिकम्।**
**तन्मे प्राणव्ययेनापि, जीवय एतान् ममाश्रितान् ।। ४६ ।।**

किञ्च -

**मांस-मूत्र-पुरीषा-अस्थि-निर्मिते अस्मिन् कलेवरे।**
**विनश्वरे विहायास्थां यशः पालय मित्र मे ।। ४७ ।।**

अपरं च पश्य -

**यदि नित्यम् अनित्येन निर्मलं मलवाहिना।**
**यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ।। ४८ ।।**

यतः -

**शरीरस्य गुणानां च दूरम् अत्यन्तम् अन्तरम्।**
**शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः।। ४९ ।।**

इति आकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन् अब्रवीत् - साधु मित्र ! साधु। अनेन आश्रितवात्सल्येन त्रैलोक्यस्य अपि प्रभुत्वं त्वयि युज्यते। एवम् उक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि।(विवरणम्)चित्रग्रीवः हिरण्यकेन उक्तं नीतिवचनं शृणोति। मित्रं पुनः एवं वदति। नीतिः पार्श्वे भवतु । सर्वकालेषु नीतिः तृप्तिं न ददाति।अहं तु आश्रितानां कष्टानि द्रष्टुं न पारयामि। अतः एवं वदामि। विवेकसम्पन्नः उदार- पुरुषः धनानि, प्राणान् च परेषाम् उपकाराय उत्सृजति। तथा हि - सर्वेषां मरणं ध्रुवम्। एवं मरणे नियते सति, परनिमित्तकः प्राण(त्यागः) आत्मनः श्रेयस्करः भवति खलु।

प्रथमतः अनुयायिनां बन्धनछेदने इदम् अपरं कारणम्-एते मम अनुगामिनः सर्वे ,जात्या,द्रव्येण,गुणैश्च मम समानाः एव भवन्ति। एवं स्थिते एतेषां प्रभुत्वम् अनुभवन् अहम् तेषां किमपि उपकारम् अकृत्वा, तेषां ऋणात् कदा विमुक्तः भवामि ? कथं विमुक्तः भवामि ? तेषां ऋणात् मोचनाय अयं कश्चन अवकाशः। किञ्च एते मम अनुसारिणः कपोताः, जालपाशानां बन्धनात् छेदनं विना मम सान्निध्यं त्यक्तुम् नैव उत्सहन्ते। तस्मात् मम प्राणान् व्ययीकृत्य अपि माम् विश्वस्य आगतान् एतान् यथाकथंञ्चित् समुद्धर, जीवय।

किञ्च इदं शरीरं जीर्णात् अवशिष्टं मलं वहति।अपि च ध्वंसशीलि अनित्यं च।एतादृशं शरीरं अनुयायिनां रक्षणार्थं त्यागं करोमि।एवम् अनुष्ठिते अनित्येन मलवाहिना शरीरेण, नित्यं निर्मलं यशः जायते।एवम् अनुयायिनां रक्षणार्थं यदि प्राणान् त्यजामः, तदा तेन प्राणत्यागेन किं न लब्धं भवति, कथय।

किञ्च सखे ! शरीरस्य, शरीरिणः गुणानां च अत्यन्तं दूरं विद्यते। शरीरं क्षणे नाशम् एष्यति। गुणाः तु आकल्पान्तं शाश्वतीं कीर्तिम्, प्रतिष्ठां च समुपकल्पयन्ति इति एवं चित्रग्रीवः आश्रितानां पालनस्य प्राधान्यं वर्णयति।हिरण्यकः चित्रग्रीवस्य आश्रितवात्सल्यं अवगच्छति। चित्रग्रीवं प्रशंसति।सन्तुष्टः भवति।पुलकितः भवति। सर्वेषां कपोतानां बन्धनानि

छिनत्ति। कपोतान् सर्वान् बन्धनेभ्यः मुक्तान् करोति। हिरण्यकः कपोतान् परिरक्षति।

### २.११.५.विधिः बलीयः इति हिरण्यकस्य समाश्वासनम्

(मूलम्)ततो हिरण्यकः सर्वान् सादरं सम्पूज्य आह - 'सखे ! चित्रग्रीव ! सर्वथा अत्र जालबन्धनविधौ दोषम् आशङ्क्य आत्मनि अवज्ञा न कर्तव्या । यतः-

**यः अधिकात् योजनशतात्, पश्यति इह आमिषं खगः।**
**सः एव प्राप्तकालस्तु, पाशबन्धं न पश्यति ।। ५० ।।**

अपरं च -

**शशि-दिवाकरयोः ग्रहपीडनम्, गजभुजङ्गमयोः अपि बन्धनम्।**
**मतिमातां च विलोक्य दरिद्रताम्, विधिः अहो बलवान् इति मे मतिः।।५१।।**

अन्यत् च -

**व्योमैकान्तविहारिणः अपि विहगाः सम्प्राप्नुवन्त्यापदम्**
**बध्यन्ते निपुणैः अगाधसलिलात् मत्स्याः समुद्रात् अपि।**
**दुर्नीतं किम् इह अस्ति, किं सुचरितं, कः स्थानलाभे गुणः**
**कालः हि व्यसनप्रसारितकरः गृह्णाति दूरात् अपि ।। ५२ ।।**

इति प्रबोध्य, आतिथ्यं कृत्वा, आलिङ्ग्य, च चित्रग्रीवः तेन सम्प्रेषितः यथेष्टदेशात् सपरिवारः ययौ। हिरण्यकः अपि स्वविवरं प्रविष्टः।

**यानि कानि च मित्राणि कर्तव्यानि शतानि च ।**
**पश्य मूषकमित्रेण कपोताः मुक्तबन्धनाः।। ५३ ।।**

**(विवरणम्)** बन्धनानां छेदनस्य अनन्तरं हिरण्यकः चित्रग्रीवम् उद्दिश्य 'सखे ! जाले पतनस्य आत्मनि अपराधं मा पश्यतु। आत्मनि अवज्ञाम् अपिउ अवमानम् अपि, मा करोतु। यः खगः योजनशतात् अधिकात् इह स्थितं मांसं द्रष्टुं पारयति, सः एव खगः विधिना चोदितः सन् पाशानां बन्धं द्रष्टुं नैव पारयति। अहो ! विधेः वैपरीत्यम्। एवं तत् कालस्य प्रभावम् इति ज्ञात्वा आत्मनि अवज्ञां शिथिलीकुरु।

किञ्च विधिः बलीयान् इति मे अभिप्रायः। सूर्य-चन्द्रौ प्रभावपूर्णौ। तयोः एकः दिवा प्रकाशं ददाति। अन्यः रात्रौ चन्द्रिकां विस्तारयति। तादृशौ अपि ग्रहबाधाम् अनुभवन्ति एव। गजः महान् जन्तुः। सः बन्धितुम् अशक्यः। तादृशः अपि बन्धितः भवति। सर्पः विषं वमति, दशति च। भीत्या तस्य दूरतः चरन्ति। यः कोऽपि नैव, उपसर्पति। तादृशम् अपि निगृह्णन्ति। मानवाः बुद्धिजीविनः। ते बुद्ध्या विवेकेन प्रणालिकाबद्धं जीवन्ति।तादृशाः अपि दरिद्रम् अनुभवन्ति। एतान् दृष्ट्वा विधिः अनुल्लङ्घनीयः इति अवगच्छतु।

किञ्च भूमि-अपेक्षया आकाशे प्रमादानां सम्भवाय अवकाशः अत्यल्पः। परं तत्रापि विहगाः आपदः प्राप्नुवन्ति एव। समुद्रस्य अन्तस्स्थितानां मत्स्यानां प्राणभीतिः नैव भवति। परं ते अपि निपुणैः बन्धिताः भवन्ति। कालस्य, नेतुम् अशक्यं वस्तु किमपि नास्ति। कालः स्वीयकाले सम्प्राप्ते,हस्तान् प्रसार्य सर्वम् अपि कबलीकरोति एव। एवं कालस्य कृते सर्वे विधेयाः भवन्ति एव इति बहुधा हिरण्यकः चित्रग्रीवं प्रबोधयति। अनन्तरं हिरण्यकः चित्रग्रीवस्य कपोतानां च आतिथ्यं ददाति। हिरण्यकः चित्रग्रीवम् आलिङ्गति। कपोतान् सादरं सम्प्रेषयति च। कपोताश्च स्व-अभिमतं प्रदेशं गच्छन्ति। अतः कीदृशाः वा भवन्तु, सुहृदस्तु असंङ्ख्याकाः भवेयुः। आपत्सु, मित्रेषु अन्यतमः उद्धारकः भवति। अत्र पश्यतु अल्पेन एकेन मूषिकेण शतसङ्ख्याकाः कपोताः बन्धनात् मुक्ताः भवन्ति। एवं मित्राणां सम्प्राप्त्या जीवनम् अपायरहितम्, उल्लासपूर्णं च भवति।

## २.१२.उपसंहारः

एवम् अस्यां कथायां व्याधस्य तण्डुलकणविकरणम्, तान् प्रति कपोतानां लोभनम्,सर्वत्र आशा प्रमाद- कारिणी, लोभस्य पर्यवसानानि, कष्टेषु वृद्धानां संयमनमनस्कता, आपत्सु मित्राणाम् उपयोगः, तत्रापि राज्ञः वा, नायकस्य वा कर्तव्यम्, मार्गदर्शकता, कपोतानां पाशबन्धनविमुक्तिः,विधेः बलवत्वं च इति एते अंशाः कथामा- ध्यमेन सुनिपुणं प्रतिपादिताः। एते च पाठकान् सावधानतया जीवनस्य यापनाय, जीवनस्य कृते साधु चिन्तनाय च उपकुर्वन्ति।

## २.१३.अभ्यासः

अ). चित्रग्रीववृत्तान्तं वर्णयत ?

इ). चित्रग्रीव-हिरण्यकयोः सम्भाषणं वर्णयत ?

# UNIT-III; मृग,काक जम्बुकानां वृत्तान्तम् (कथा-२)

**संरचना**


३.०.परिचयः

३.१.लक्ष्याणि

३.२.कथायाः नेपथ्यम्

३.२.१.हिरण्यकेन सह स्नेहं कर्तुं काकस्य अभिलाषः

३.२.२.भक्ष्य-भक्षकयोः स्नेहः प्रमादकरः

३.३.मृग,काक जम्बुकानां कथा

३.३.१.मृग-काकयोः सहवासः, जम्बुकस्य दुरालोचनम्

३.३.२.जरद्गव-दीर्घकर्णयोः वृत्तान्तम्

३.३.३. जरद्गव-मार्जारयोः वृत्तान्तं श्रुत्वा जम्बुकस्य असहनम्

३.३.४.मृगस्य अविवेकिता

३.४. मृगस्य संहरणाय जम्बुकस्य उपायचिन्तनम्

३.४.१.मृगस्य पाशे बन्धः

३.४.२.मृगस्य अमायकता

३.४.३.जम्बुकस्य कपटता

३.५. काकस्य स्नेहशीलता

३.५.१.जम्बुकं प्रति काकस्य दूषणम्

३.५.२.मृगसंरक्षणाय काकस्य उपायः

३.५.३.लगुडेन जम्बुकस्य मृतिः - कथायाः नीतिः

३.६.हिरण्यक-लघुपतनकयोः सम्भाषणस्य अनुक्रमः

३.६.१.हिरण्यकेन स्नेहं कर्तुं काकस्य आसक्तिः

३.७.चपलेन सह स्नेहः न कर्तव्यः

३.७.१.शत्रुणा सह स्नेहः सर्वथा न कर्तव्यः

३.८.हिरण्यकेन स्नेहकरणाय काकस्य आग्रहः

३.८.१.सुजन-दुर्जनयोः मैत्री

३.८.२.काकेन सह मैत्रीकरणाय हिरण्यकस्य सम्मतिः

३.९.उपसंहारः

३.१०.अभ्यासः

## ३.०.परिचयः

पञ्चतन्त्रम् एकं प्रसिद्धं कथाकाव्यम् अस्ति। इदं प्रपञ्चे ख्यातिम् सम्पादयति। अस्य च रचयिता विष्णुशर्मा। तद् आधारेण प्रकाशम् आप्तम् अन्यत् कथाकाव्यं हितोपदेशः।अत्र च १).मित्रसम्प्राप्तिः २).मित्रभेदः ३).सन्धिः ४).विग्रहः इति चत्वारः भागाः सन्ति।अस्य च रचयिता नारायणपण्डितः।प्रकृते इयं,हितोपदेशे-मित्रसम्प्राप्ति भा गात् स्वीकृता द्वितीया कथा।अत्र काक-मृग-जम्बुकानां कथा वर्णिता। इयं च कथा गद्य-पद्यात्मिका। 'अकस्मात् आगन्तुना सह मैत्री न कर्तव्या 'इति अंशं बोधयति। अत्र च मृग-काकयोः सत्यपूर्णं सख्यम्, जम्बुकस्य वञ्चनास्वभावश्च वर्णितः। अस्यां कथायां काकः मृगस्य संरक्षकत्वेन, जम्बुकः तस्य प्राणहारकत्वात् वञ्चकत्वेन च चित्रितः।

## ३.१.लक्ष्याणि

हितोपदेशे-मित्रसम्प्राप्तिः अन्यतमः भागः। तस्यैव मित्रलाभः इत्यपि व्यवहारः अस्ति। अस्मिन् च भागे मित्राणि कथं जायन्ते ? मित्राणि कथं उपकुर्वन्ति ? मित्राणि कीदृशानि भवन्ति ? इत्येते अंशाः अत्र बोधिताः भवन्ति। साधारणतया मानवः सङ्घजीवः। सङ्घजीवनं च बाध्यतायुतम्। साङ्घिकजीवनं मानवं समुन्नतं करोति। परं मानवः साङ्घिकजीवनाय आत्मानं संसिद्धं च कुर्यात्। तेन च साङ्घिकसम्बन्धाश्च रक्षणीयाः भवन्ति। साङ्घिक जीवनाय आत्मनः संसिद्धये,साङ्घिकसम्बन्धानां परिरक्षणाय च कतिपयविषयाणां परिज्ञानम् आवश्यकम्। तत् विषयपरि ज्ञा नाय साहित्यस्य अध्ययनम् अन्यतमं साधनं भवति।तत्रापि कथासाहित्यं समीचीनम् उपकरणम्।साङ्घिकजीवनम् अनुभवितुं वा अधिगन्तुं वा मानवसम्बन्धाश्च समीचीनाः भवेयुः।मानवीयसम्बन्धानां स्थापने,पोषणे च जागरूकता आवश्यकी।अन्यथा प्रमादः सम्भवति।मानवीयसम्बन्धानां स्थापने,पोषणे च नूतनैःपरिचयः प्रधानः अंशः। केन परिच यः करणीयः ? कीदृशः परिचयः श्रेयस्करः ? कीदृशः परिचयः प्रमादकरः ? अन्यैः स्वस्य सम्बन्धाः, स्वेन अन्येषां सम्बन्धाश्च व्यूहात्मकरूपेण स्थापनीयाः पोषणीयाश्च भवन्ति। एतत् विषयकपरिज्ञानं प्रति अवगाहनादानाय उद्दिष्टः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन -

- पाठ्यांशं सम्यक् शृणोति,श्रवणकौशलं वर्धते।
- पाठ्यांशं सम्यक् पठति,पठनकौशलम् अभिवर्धते।
- पाठ्यांशं सम्यक् पठति,पदकोशं विस्तारयति।
- पाठ्यांशं सम्यक् पठति,वाक्यरचनाकौशलं प्राप्नोति।
- 'अकस्मात् आगन्तुना सह मैत्री न युक्ता' इत्यंशम् अवगन्तुं प्रभवति।
- जम्बुकस्य वञ्चनास्वभावं पठितुं समर्थः भवति।
- मृगस्य अविवेकितायाः दुष्परिणामं श्रोतुं पारयति।

- मित्रस्य संरक्षणे काकस्य निबद्धतायाः परिचितः भवति।

## ३.२.कथायाः नेपथ्यम्

### ३.२.१.हिरण्यकेन सह स्नेहं कर्तुं काकस्य अभिलाषः

(मूलम्)अथ लघुपतनकः नाम काकः सर्व(चित्रग्रीव)वृत्तान्तदर्शी साश्चर्यम् इदम् आह- अहो हिरण्यक ! श्लाघ्यः असि। अतः अहम् अपि त्वया सह मैत्रीम् इच्छामि, अतः मां मैत्र्या अनुग्रहीतुम् अर्हसि। एतत् श्रुत्वा, हिरण्यकः अपि विवराभ्यन्तरात् आह - कस्त्वम् ? सः ब्रूते - 'लघुपतनकः नाम वायसः अहम्'।

**(विवरणम्)** तत्र वृक्षस्य उपरि लघुपतनकः अस्ति। सर्वं चित्रग्रीव-हिरण्यकयोः उदन्तं परिशीलति। आश्चर्यम् एति। हिरण्यकं प्रशंसति। हिरण्यकेन सह सख्यं कर्तुम् अभिलषति। अधः आगच्छति। हिरण्यकम् आह्वयति। स्नेहं कर्तुं पृच्छति। हिरण्यकः विवरस्य अन्ततः एव 'त्वं कः, परिचयं करोतु'इति पृच्छति। काकः अपि 'लघुपतनकः' इति उक्त्वा आत्मानं परिचिनोति।

### ३.२.२.भक्ष्य-भक्षकयोः स्नेहः प्रमादकरः

**(मूलम्)** हिरण्यकः विहस्य आह - का त्वया सह मैत्री ? यतः -

**यत् येन युज्यते लोके, बुधः तत् तेन योजयेत्।**
**अहम् अन्नम्, भवान् भोक्ता, कथं प्रीतिः भविष्यति।। ५४ ।।**

अपरं च -

**भक्ष्य-भक्षकयोः प्रीतिः विपत्तेः एव कारणम्।**
**शृगालात् पाशबद्धः असौ मृगः काकेन रक्षितः।। ५५ ।।**

वायसः अब्रवीत् -' कथम् एतत्' । हिरण्यकः कथयति -

**(विवरणम्)** हिरण्यकः लघुपतनकं अविवेकिनं जानाति। तस्य अविवेकितां परिहसति। काकेन त्वया, मूषिकस्य मम मैत्री कथं घटते ? लोके विवेकसम्पन्नः यः कोऽपि, यद्वस्तु येन युज्यते तद्वस्तु तेनैव योजयति। अहम् अन्नम्, भवान् भोक्ता। भोज्य-भोजकयोः आवयोः मैत्री कथं युज्यते ? आवयोः मैत्री कथं वर्धते ? किञ्च भोज्य-भोजकयोः मैत्री कष्टान्येव जनयति। शृगालकारणतः मृगः पाशैः बद्धः भवति। अनन्तरं काकेन परिरक्षितः भवति, इति काकं वदति। काकश्च आसक्त्या मृग-जम्बुकयोः वृत्तान्तं ज्ञातुम् इच्छति। हिरण्यकः एवं कथयति।

## ३.३.मृग,काक जम्बुकानां कथा

३.३.१.मृग-काकयोः सहवासः, जम्बुकस्य दुरालोचनम्

**(मूलम्)** अस्ति मगधदेशे चम्पकवती नाम अरण्यानी। तस्यां चिरात् महता स्नेहेन मृग-काकौ निवसतः। सः च मृगः हृष्ट-पुष्टाङ्गः विद्यते। स्वेच्छया सञ्चरन् सः केनचित् शृगालेन अवलोकितः। तं दृष्ट्वा शृगालः अचिन्तयत् - 'आः,कथम् एतत् मांसं सुललितं

भक्षयामि ? भवतु विश्वासं तावत् उत्पादयामि' इति आलोच्य, उपसृत्य अब्रवीत् - 'मित्र ! कुशलं ते ? मृगेण उक्तम् - 'कस्त्वम् ?' । सः ब्रूते- 'क्षुद्रबुद्धिः नाम जम्बुकः अहम्। अत्र अरण्ये बन्धुहीनः मृतवत् निवसामि। इदानीं त्वां मित्रम् आसाद्य पुनः सबन्धुजीवलोकं प्रविष्टः अस्मि। अधुना तव अनुचरेण मया सर्वथा भवितव्यम्' -इति। मृगेण उक्तम् - 'एवम् अस्तु' इति।

**(विवरणम्)**मगधदेशे चम्पकनामकानि अरण्यानि सन्ति।तानि च महान्ति अरण्यानि।तेषु अरण्येषु मृग-काकौ चिरकालात् महता स्नेहेन, सुखं कालं यापयतः। तयोः मृगः पुष्टानि अवयवानि वहति। सोल्लासं स्वेच्छया अरण्यं सञ्चरति। एतं च मृगं कश्चन शृगालःउ जम्बुकः, पश्यति। यथाकथञ्चित् तस्य मृगस्य मांसं खादितुम् इच्छति। अहो! अयं मृगः मनोहरः विद्यते। अतिकोमलं अस्य मांसम् अवश्यं अहं भक्षामि एव। आदौ मृगस्य मयि विश्वासं जनयिष्यामि इति मनसि चिन्तयति। मृगम् उपसर्पति। 'मित्र ! अपि कुशली त्वम्? इति वदति। मृगः अपि ' त्वं कः ? ' इति शृगालं पृच्छति। अहं जम्बुकः, मम नाम क्षुद्रबुद्धिः, अहं बन्धुहीनः सन्, अस्मिन् अरण्ये मृतवत् जीवामि। अधुना त्वाम् अहं पश्यामि। मम, त्वयि मित्रप्रीतिः वर्धते। मित्रम् आसादितवान् इति भावयामि। इतः प्रभृति अहं सबन्धुः अस्मि। सानन्दं सोल्लासं जीवामि। अतः इतः परं तव अनुचरः भवामि इति सकपटं विज्ञापयति। मृगः अपि किमपि प्रतिकूलम् अनुक्त्वा 'बाढम्' इति शृगालेन सह मैत्रीम् अङ्गी- करोति।

**स्वावलोकनप्रश्नाः**

१) चम्पकं किम् ? तत् कुत्र अस्ति ?

२) क्षुद्रबुद्धिः कः ?

## ३.३.२.जरद्गव-दीर्घकर्णयोः वृत्तान्तम्

(मूलम्)ततः पश्चात् अस्तंगते सवितरि भगवति मरीचिमालिनि, तौ मृगस्य वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिः नाम काकः मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काकः अवदत्-'सखे ! चित्राङ्ग ! कः अयं द्वितीयः ? मृगो ब्रूते- 'जम्बूकः अयम् ' अस्मत्-सख्यम् इच्छन् इह आगतः' । काकः ब्रूते- 'मित्र ! अकस्मात् आगन्तुना सह मैत्री न युक्ता। तथा च उक्तम् -

**अज्ञातकुलशीलस्य वासः देयः न कस्यचित्।**
**मार्जारस्य हि दोषेण हतः गृध्रः जरद्गवः।। ५६ ।।**

तौ आहतुः-'कथम् एतत् '। काकः कथयति-मित्र अकस्मात् आमन्तुना सह मैत्री न कर्तव्या। अज्ञातकुलशी लस्य मार्जारस्य वासः दत्वा तस्य दोषेण गृध्रः हतः।

**(विवरणम्)** किञ्चित् कालानन्तरं सायं भवति। सूर्यः अस्तं गच्छति। मृगः काकश्च उभौ मिलित्वा स्व- आवासम् आगच्छतः। तत्र चम्पकवृक्षः कश्चित् अस्ति। तस्य शाखायां सुबुद्धिः नाम काकः अस्ति। चिरकालतः सः मृगस्य मित्रं भवति। सः, मिलित्वा आगतौ मृग-जमबुकौ पश्यति। काकं ' सखे चित्राङ्ग ! द्वितीयः अयं कः ? इति पृच्छति। अयं जम्बुकः, आवयोः सख्यम् इच्छन् अत्र आगच्छति, इति मृगः काकाय कथयति। अनुपदम् एव काकः मृगम् -सखे ! नूतनतया यः आगच्छति, तेन सह अकस्मात् स्नेहकरणं न समीचीनं भवति। आगन्तुना सह मैत्री प्रमादं जनयति। कुलम् अज्ञात्वा, शीलं च अवगाहनाम् अकृत्वा यस्य कस्यापि वासः न दातव्यः। एवम् अपरिचितस्य मार्जारस्य अवकाशं दत्त्वा, गृध्रः दोषम् आचरति। तेनैव दोषेण सः गृध्रः पक्षिभिः व्यापादितः भवति इति च कथयति। मार्जारस्य अवकाशं दत्त्वा, गृध्रः कथं व्यापादितः इति ज्ञातुं मृग-जम्बुकौ इच्छतः। काकः, अकस्मात् आगन्तुना मैत्री न युक्ता इति जरद्गववृत्तान्तं श्रावयति।

**३.३.३. जरद्गव-मार्जारयोः वृत्तान्तं श्रुत्वा जम्बुकस्य असहनम्**

**(मूलम्)** जरद्गववृत्तान्तम् आकर्ण्य सः जम्बुकः सकोपम् आह- ' मृगस्य प्रथमदर्शनदिने भवान् अपि अज्ञातकुलशीलः एव खलु, तत् कथं भवता सह एतस्य स्नेहानुवृत्तिः उत्तरोत्तरं वर्धते।

**यत्र विद्वज्जनः नास्ति, श्लाघ्यः तत्राल्पधीः अपि।**
**निरस्तपादपे देशे, एरण्डोऽपि द्रुमायते।। ६९ ।।**

अन्यत् च -

**अयं निजः परः वा इति, गणना लघुचेतसाम्।**
**उदारचरितानां तु, वसुधैव कुटुम्बकम् ।। ७० ।।**

यथा अयं मृगः मम बन्धुः तथा भवान् अपि '।

**(विवरणम्)** जम्बुकः आत्मनः निन्दाव्यञ्जकं गृध्रस्य वृत्तान्तं शृणोति। काकाय क्रुध्यति। ' आदौ यः कोऽपि आज्ञातः एव भवति खलु। प्रथमदिने यदा मृगेण दृष्टः तदा त्वम् अपि अज्ञात कुलशीलः एव खलु, तथापि भवतोः स्नेहः कथं क्रमशः वर्धते ? त्वया उच्यममानम् एव मान्यम् इति वा, स्वीकार्यम् इति वा मा भावय। सकलविषयावगाहनापरः यत्र न भवति, तत्र अल्पज्ञः एव प्रशंसनीयः भवति।तथा हि-यत्र वृक्षाः अन्तरिताः भवन्ति, iÉ° ¨ÉxÉ¦ÉnùÉ ¶ÉEò®úb &(Castrer Tree ) एव महान् वृक्षः भवति खलु। त्वं अल्पज्ञत्वं मा

प्रकटय। किञ्च अयं मदीयः, अयं परकीयः इति भावना अल्पमनस्कानाम् एव भवति।ये तु विशालमनसः भवन्ति, ते तु वसुधां सर्वाम् एकम् एव कुटुम्बं भावयन्ति। त्वं मां निन्दसि, तथापि मृगः इव त्वम् अपि मम बन्धुः एव भवसि इति कोपेन वदति।

### ३.३.४.मृगस्य अविवेकिता

**(मूलम्)** मृगः अब्रवीत्-'किम् अनेन उत्तरेण सर्वैः एकत्र विश्रम्भालापैः सुखिभिः स्थीयताम्। यतः -

**न कश्चित् कस्यचित् मित्रं न कश्चित् कस्यचित् रिपुः।**
**व्यवहारेण मित्राणि जायन्ते रिपवः तथा ' ।। ७१ ।।**

काकोन उक्तम् -' एवम् अस्तु'। अथ प्रातः सर्वे यथाभिमतदेशं गताः।

**(विवरणम्)** मृगः काक-जम्बुकयोः वाग्युद्धं शृणोति। परस्परनिन्दनं मास्तु।वाक्कलहः अनावश्यकः।वयं सर्वे अत्रैव सुखं वसामः। स्वेच्छया सविनोदप्रसङ्गैः कालं यापयामः। यः कश्चिदपि ,यस्य कस्यापि स्वभावतः मित्रं न भवति। तथा एव रिपुः अपि न भवति। प्रवर्तनविधानस्य कारणतः एव मित्राणि वा, रिपवः वा जायन्ते। जन्मतः केवलं मित्राणि वा, रिपवः वा न भवन्ति इति काक-जम्बुकौ विज्ञापयति।काकः अपि मृगस्य वचनं स्वीकरोति। तथा इति वदति। प्रातः ते त्रयः स्वस्व-अभीष्टं प्रदेशं गच्छन्ति।

## ३.४. मृगस्य संहरणाय जम्बुकस्य उपायचिन्तनम्

**(मूलम्)** एकदा निभृतं शृगालः ब्रूते - 'सखे अस्मिन् वनैकदेशे सस्यपूर्णक्षेत्रम् अस्ति। तत् अहं त्वां नीत्वा दर्शयामि 'इति।तथा कृते सति,मृगः प्रत्यहं तत्र गत्वा सस्यं खादति।अथ क्षेत्रपतिना तत् दृष्ट्वा पाशः योजितः।

**(विवरणम्)** - 'मित्र! अस्मिन् अरण्ये एकस्मिन् प्रदेशे सस्येनपूर्णं क्षेत्रम् किञ्चित् अस्ति। अहम् (जम्बुकः) , मित्रं त्वाम् (मृगम्) तत्प्रदेशं नयामि।तत् सस्यपूर्णक्षेत्रं दर्शयामि' कदाचित् काकः जम्बुकं सविनोदं स्नेहेन वदति। मृगः जम्बुकेन सह सस्यपूर्णक्षेत्रं गच्छति। तत्र प्रभूतम् आहारं पश्यति। दिने दिने तत्र गच्छति।सस्यं खादति।प्रतिदिनम् एवं प्रचलति।अनन्तरं कदाचित् क्षेत्रस्य यजमानी मृगं पश्यति। 'मृगः प्रत्यहं सस्यं भक्षयति' इति अवगच्छति। जालम् आयोजयति।

**स्वावलोकनप्रश्नाः**

१) सुबुद्धिः कः ?

२) केन सह मैत्री न युक्ता ?

३) लघुचेतसां गणना कीदृशी ?

४) मित्राणि- रिपवश्च कथं जायन्ते ?

### ३.४.१.मृगस्य पाशे बन्धनम्

**(मूलम्)** अनन्तरं पुनः आगतः मृगः,पाशैः बद्धः,अचिन्तयत् -'कः माम् इतः कालपाशात् इव व्याधपाशात् त्रातुं मित्रात् (जम्बुकात्)अन्यः समर्थः ? ' अत्रान्तरे जम्बुकः तत्र आगत्य उपस्थितः, अचिन्तयत्-'फलिता तावत् कपट प्रबन्धेन मनोरथसिद्धिः। एतस्य उत्कृत्त्यमानस्य मांस-असृक्-लिप्तानि अस्थीनि मया अवश्यं प्राप्तव्यानि। तानि बाहुल्येन भोजनानि भविष्यन्ति।

**(विवरणम्)** अनन्तरदिनम् अपि मृगः यथाप्रकारं क्षेत्रम् आगच्छति। जाले पतति। जालस्य पाशैः बद्धः भवति। महत् दुःखं प्राप्नोति। इमे च व्याधपाशाः यमपाशाः इव वर्तन्ते। एतेभ्यः कः मां रक्षति ? इति मृगः चिन्ताक्रान्तः भवति। रक्षकं चिन्तयति। मित्रं शृगालं स्मरति। सः अवश्यं मां पाशेभ्यः मुक्तान् करोति इति विश्वसति। पाशबद्धः मृगः शृगालस्य आगमनाय निरीक्षते। अत्रान्तरे जम्बुकः तत्र आगच्छति। जालस्य पाशैः बद्धं मृगं पश्यति। कपटोपायेन मम (जम्बुकस्य) मनोरथस्य सिद्धिः जाता। मृगस्य ललितानि मांसेन, रक्तेन च लिप्तानि अस्थीनि अहं भक्षयिष्यामि। एतानि मम पर्याप्तानि भवन्ति इति मनसि मोदम् अनुभवति।

### ३.४.२.मृगस्य अमायकता

**(मूलम्)** मृगः तं दृष्ट्वा उल्लसितः ब्रूते-' सखे! छिन्धि! तावत् मम बन्धनम्।सत्वरं त्रायस्व माम्। यतः -

**आपत्सु मित्रं जानीयात्, युद्धे शूरम्, ऋणे शुचिम्।**
**भार्यां क्षीणेषु वित्तेषु ,व्यसनेषु च बान्धवान् ।। ७२ ।।**

अपरं च -

**उत्सवे व्यसने चैव, दुर्भिक्षे राष्ट्रविप्लवे।**
**राजद्वारे श्मशाने च, यः तिष्ठति सः बान्धवः।। ७३ ।।**

**(विवरणम्)** मृगः अपि स्वसकाशम् आगच्छन्तं जम्बुकं पश्यति। जम्बुकस्य सहायेन पाशेभ्यः मुक्तः भवामि इति धैर्यम् अनुभवति। ' सखे ! प्रियमित्र ! अहं जाले पतितः। पाशैः च बद्धः। तव आगमनाय एव अहं निरीक्षन् अस्मि। पाशेभ्यः सत्वरं मां त्रायस्व। मित्रस्य अवसरः आपत्सु एव खलु ज्ञातः भवति। शूरस्य आवश्यकता युद्धेषु एव विदितः भवति। ऋणस्य ग्रहणकाले वा, ऋणस्य दानकाले वा व्यक्तेः स्वभावस्य पवित्रता अवगमिता भवति। सम्पत्सु अपगतासु एव पत्न्याः सहनशीलता व्यक्ता भवति। दुरभ्यासेषु एव व्यक्तिषु बन्धूनां प्रवर्तनम् अवगतं भवति।

किञ्च पर्वदिनेषु यः सम्मिलितः भवति, दुरभ्यासेषु यः विवेचनां बोधयति, दुर्भिक्षपीडितकालेषु आहार- दानादिना यः सहकरोति, प्रजानाम् असन्तृप्त्या राज्ये कदाचित् विप्लवं भवति, तदा, राष्ट्रश्रेयस्साधनाय यः स्वशक्तिं धारयति, दण्डनाय राजद्वारं प्राप्तं यः रक्षति, श्मशानपर्यन्तं च यः अनुगच्छति सः बान्धवः भवति। अतः दुरवस्थापन्नं मित्रं मां पाशानां बन्धनेभ्यः मोचयतु ' इति जम्बुकं पृच्छति।

## ३.४.३.जम्बुकस्य कपटता

**(मूलम्)** जम्बुकः मुहुर्मुहुः पाशं विलोक्य अचिन्तयत्-'दृढः तावत् अयं बन्धः'इति। ब्रूते च - 'सखे! स्नायुनिर्मिता एते पाशाः। तत् अद्य भट्टारकवारे कथम् एतान् दन्तैः स्पृशामि। मित्र! यदि चित्ते न अन्यथा मन्यसे तदा प्रभाते यत् त्वया वक्तव्यम् तत् कर्तव्यम् ' इति उक्त्वा तत्समीपे आत्मानम् आच्छाद्य स्थितः सः। अनन्तरं सः काकः प्रदोषकाले मृगम् अनागतम् अवलोक्य इतस्ततः अन्विष्य तथाविधं दृष्ट्वा उवाच-'सखे किम् एतत्'। मृगेण उक्तम्- ' अवधीरित-सुहृद्वाक्यस्य फलम् एतत्। तथा च उक्तम् -

**सुहृदां हितकामानां यः शृणोति न भाषितम्।**
**विपत् सन्निहिता तस्य, स नरः शत्रुनन्दनः ।। ७४ ।।**

काकः ब्रूते - 'सः वञ्चकः क्व आस्ते ?' मृगेण उक्तम् - ' मत् मांसार्थी तिष्ठति अत्रैव '।
**(विवरणम्)** जम्बुकः मृगस्य अभ्यर्थनां शृणोति। पुनः पुनः पाशं पश्यति। पाशानां बन्धनानि सुदृढानि वर्तन्ते, इति मनसि चिन्तयति। बहिः - ' प्रियसखे! चित्राङ्ग! एते पाशाः स्नायुना निर्मिताः इव अवभासन्ते। तत्रापि अद्य भानुवासरः भवति। एतान् अद्य दन्तैः न स्पृशामि। मित्र! मनसि अन्यथा मा भावयतु। श्वः प्रभाते भवता उक्तम् अनुतिष्ठामि इति वदति। जम्बुकः, मृगस्य पुनः भाषणाय अपि अवकाशं नैव ददाति। ततः प्रस्थितः भवति। तस्य समीपे वृक्षेभ्यः निलीयते।

सायं भवति। मृगः आवासम् न आगच्छति। काकः मृगम् अनागतम् अवगच्छति। तत्रैव इतस्ततः अन्वि- ष्यति। कुत्रचित् सस्यपूर्णक्षेत्रे जाले बद्धं मृगं पश्यति। 'सखे किम् एतत्' इति मृगं पृच्छति। 'अकस्मात् आगन्तुना स्नेहः नैव कर्तव्यः' इति सुहृदः भवतः वचांसि

आदौ न अवधृतवान् खलु। मित्रवचन-अनवधारणस्य पर्यवसानम् इदम् । हितैषिणां मित्राणां वचांसि यः न शृणोति, तस्य विपदः सन्निहिताः एव भवन्ति। तादृशः शत्रूणाम् आनन्दं जनयति खलु ' इति मृगः काकं कथयति । काकः वञ्चकस्य जम्बुकस्य समाचारं पृच्छति। 'मम (मृगस्य) मांसार्थी सन् प्रायशः अत्रैव कुत्रापि तिष्ठति 'मृगः उत्तरं ददाति।

## ३.५. काकस्य स्नेहशीलता

(मूलम् )काकः ब्रूते - ' उक्तम् एव मया पूर्वम् -

**अपराधः न मे अस्ति, इति नैतत् विश्वासकारणम्।**
**विद्यते हि नृशंसेभ्यः, भयं गुणवताम् अपि ।। ७५ ।।**

**दीपनिर्वाणगन्धं च, सुहृद्वाक्यम् अरुन्धतीम्।**
**न जिघ्रन्ति न शृण्वन्ति, न पश्यन्ति गतायुषः।। ७६ ।।**

**परोक्षे कार्यहन्तारम्, प्रत्यक्षे प्रियवादिनम्।**
**वर्जयेत् तादृशं मित्रम्, विषकुम्भं पयोमुखम् ' ।। ७७ ।।**

**(विवरणम्)** जम्बुकसदृशानां दुर्मार्गाणां स्वभावम् उद्दिश्य अहं (काकः)पूर्वम् एव कथितवान् अस्मि। भवान् न श्रुतवान् असि। दुष्टानां स्वभावः एव तादृशः। अपराधः नाम विरोधः। विरोधस्य अभावः, विश्वासेन प्रवर्तितुं योग्यः न भवति। दुर्जनाः सतां निष्कारणम् एव वैरिणः भवन्ति। वैयक्तिकम् आनुकूल्यम्, प्रातिकूल्यं च दुर्जनः नैव चिन्तयति। परेषां पीडनम् एव तस्य स्वभावः। तथाहि- सज्जनाः अपि क्रूरेभ्यः राक्षसेभ्यः पदे पदे भयं प्राप्नुवन्ति एव खलु। परं मम वचः भवान् न स्वीकृतवान् असि। सहजतया आसन्नमरणाः पुरुषाः निर्वाणेन दीपात् आयान्तं गन्धं न जिघ्रन्ति। हितम् इच्छता उक्तं श्रेयोदायकं वचनं न शृण्वन्ति। अन्तरिक्षे कोटिशः विद्यमानेषु नक्षत्रेषु अरुन्धतीं च न पश्यन्ति। अपि च, यः सम्मुखे प्रियं वदति, अनुकूलतया प्रोत्सहते, पृष्ठतः प्रतिकूलतया आचरन् कार्यस्य नाशाय प्रयतते, सः वञ्चकः, पयोमुख-विषकुम्भसदृशः भवति।तादृशं नैव विश्वसेत् इति काकः जम्बुकस्य दुष्टस्वभावं पुनः पुनः निन्दति।

### ३.५.१. काकेन जम्बुकस्य दूषणम्

(मूलम्) ततः काकः दीर्घं निश्वस्य 'अरे! वञ्चक! किं त्वया पापकर्मणा कृतम्। यतः -

**संलापितानां मधुरैः वचोभिः, मिथ्योपचारैः च वशीकृतानाम् ।**
**आशावतां श्रद्दधतां न लोके, किम् अर्थिनां वञ्चयितव्यम् अस्ति।। ७८ ।।**

**उपकारिणि विस्रब्धे शुद्धमतौ यः समाचरति पापम् ।**
**तं जनम् असत्यसन्धं भगवति ! वसुधे ! कथं वहसि।। ७९ ।।**

**दुर्जनेन समं सख्यं प्रीतिं च अपि न कारयेत्।**
**उष्णो दहति चाङ्गारः, शीतः कृष्णायते करम् ।। ८० ।।**

अथवा स्थितिः इयं दुर्जनानाम् -

**प्राक् पादयोः पतति, खादति पृष्ठमांसम्, कर्णे कलं किमपि रौति शनैः विचित्रम्।**
**छिद्रं निरूप्य सहसा प्रविशति अशङ्कः सर्वं खलस्य चरितं मशकः करोति।।८१।।**

**दुर्जनः प्रियवादी च, नैतत् विश्वासकारणम्।**
**मधु तिष्ठति जिह्वाग्रे, हृदि हालाहलं विषम् ।। ८२ ।।**

**(विवरणम्)** शृगालेन मृगस्य वञ्चनाय काकः भृशं परितपति। दीर्घं निश्वसिति। वञ्चकं जम्बुकं सम्बोधयति, एवं निन्दति। 'अरे !वञ्चक !त्वं पापी,दुरालोचनपरः असि। मृगस्य कृते अपकारं चिन्तितवान् असि। भवादृशानां कृते तत् युक्तम् एव भवति। ये मधुरया वाचा सविनोदं जल्पन्ति, ये असत्यैः सेवनैः तात्कालिकतया पुरुषान् आकर्षन्ति अथवा वशीकुर्वन्ति, ये वस्तूनां समीकरणाय आशया निरीक्षन्ते एते सर्वे अपि अवश्यं वञ्चयितव्याः भवन्त्येव। किञ्च, वसुधे ! भूमातः! उपकारम् आचरन्तं, परिशुद्धमनस्कं पुण्यशीलं, यः वञ्चयति, तादृशं सत्य- द्वेषिणं कपटिनं त्वं कथं वहसि ? तं शीघ्रं संहरतु, इति काकः वञ्चकस्य दौष्ट्यं भूमात्रे निवेदयति।

किञ्च, दुष्टेन सह मैत्री न कर्तव्या।मायाविना वञ्चकेन प्रीत्या सम्भषणम् अपि न कर्तव्यम्। करः अङ्गा- रेण सख्यं प्राप्य दह्यते। सः शीततां गत्वा कृष्णः भवति। किम् अनेन बहुना उक्तेन ? दुर्जनानां प्रकृतिः एव एतादृशी। आदौ पादयोः पतति। ततः रक्तं पिबति। कष्टानि कल्पयति। तदनन्तरं रहस्यं कथयति इव शनैः कर्णे किमपि शब्दं करोति। ततश्च रन्ध्रम् / अवकाशम् अन्विष्यति। निर्भयतया तत्र प्रविशति। एवं दुष्टस्य चरितं सर्वं मशकस्य प्रवृत्तिं स्मारयति। तथा एव, प्रियं वदन् दुर्जनः नैव विश्वासार्हः भवति। तस्य जिह्वायाः अग्रे एव मधु वर्तते। मनसि तु हलाहलं विषम् अस्ति। तस्य वचनान्येव मधुराणि भवन्ति। मनस्तु विषपूर्णम् भवति इति एवं बहुशः काकः जम्बुकस्य वञ्चनां निन्दति।

**स्वावलोकनप्रश्नाः**

१) मित्रं कदा जानीयात् ?

२) बान्धवः कः ?

३) कीदृशं मित्रं वर्जयेत् ?

४) मशकः कथं खलस्य चरितं निरूपयति ?

### ३.५.२.मृगस्य संरक्षणाय काकस्य उपायः

**(मूलम्)** अथ प्रभाते क्षेत्रपतिः लगुडहस्तं प्रदेशम् आगच्छन् काकेन अवलोकितः। तम् अवलोक्य काकोन उक्तम् - 'सखे ! मृग! त्वम् आत्मानं मृतवत् सन्दर्श्य, वातेन उदरं पूरयित्वा, पादान् स्तब्धीकृत्य, तिष्ठ। यदा अहं शब्दं करोमि तदा त्वम् उत्थाय सत्वरं पलायिष्यसि। मृगः तथा एव काकवचनेन स्थितः। ततः क्षेत्रपतिना हर्षोत्फुल्ल-लोचनेन तथाविधः मृग आलोकितः। 'आः. स्वयं मृतः असि' इति उक्त्वा मृगं बन्धनात् मोचयित्वा पाशान् ग्रहीतुं सयत्नः बभूव। ततः काकशब्दं श्रुत्वा मृगः सत्वरम् उत्थाय पलायितः।

**(विवरणम्)** काक-मृगौ तत्रैव क्षेत्रे रात्रिं यापयतः। सूर्यः उदेति। प्रातः भवति।यजमानी हस्ते लगुडं धरति। क्षेत्राभिमुखम् आगच्छति। काकः आगच्छन्तं क्षेत्रपतिं पश्यति। मित्रं मृगं -'सखे! मृग! यजमानी आगच्छति। प्रमादः परापतति। आवाभ्यां सावधानतया प्रवर्तितव्यम् अस्ति। उपायेन अस्मात् प्रमादात् बहिः आगच्छावः। त्वम् आत्मानं मृतम् इव सन्दर्शयतु, वातेन उदरं पूरयतु, पादान् मा चालयतु । अहं तव उपरि चञ्च्वा लिखन् भवामि। यदा अहं शब्दं करोमि तदा त्वम् उत्तिष्ठतु। सत्वरं पलायतु, इति काकः मृगं वदति। मृगः अपि काकेन उक्तम् अनुसरति। क्षेत्रपतिः दूरतः आगच्छन् एव, मृगं, तस्य उपरि चञ्च्वा लिखन्तं काकं च पश्यति। मृगं स्वयम् एव मृतम्, चिन्तयति। हर्षेण उत्फुल्लनयनः भवति। बन्धनात् मृगं मोचयितुं जालम् अपसारयितुं प्रयत्नम् आचरति। तदैव, सावधानतया अवकाशाय निरीक्षमाणः काकः, शब्दं करोति। मृगः काकस्य शब्दं शृणोति। तत्क्षणम् उत्तिष्ठति। शीघ्रं पलायति।

### ३.५.३. लगुडेन जम्बुकस्य मृतिः - कथायाः नीतिः

**(मूलम्)** तम् उद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो हतः। तथा च उक्तम् -

**त्रिभिः वर्षैः त्रिभिः मासैः त्रिभिः पक्षैः त्रिभिर्दिनैः।**
**अत्युत्कटैः पापपुण्यैः इहैव फलम् अश्नुते ।। ८३ ।।**

अतः अहं ब्रवीमि - 'भक्ष्य-भक्षकयोः प्रीतिः...' इत्यादि ।।

**(विवरणम्)** एवं मृग-काकाभ्यां वञ्चितः क्षेत्रपतिः क्रुद्धः भवति। हस्तस्थितं लगुडं बलात् मृगम् उद्दिश्य क्षिपति। सः लक्ष्यम् अगत्वा शृगालं प्रहरति। तेन प्रहारेण शृगालः प्राणान् त्यजति। अत एव अनुभवज्ञाः - यः अत्युत्कटं पापं वा पुण्यं वा आचरति,तस्य अत्युत्कटस्य पापस्य वा, पुणयस्य वा फलम्, वर्षत्रये वा, मासत्रये वा, पक्षत्रये वा, दिनत्रये वा अस्मिन् लोके एव, अनेनैव शरीरेण अनुभवति। अतः भक्ष्य-भक्षकयोः स्नेहः प्रमादकरः, कदापि न युज्यते इति हिरण्यकः लघुपतनकाय कथयति।

**स्वावलोकनप्रश्नाः**

१) भक्ष्य-भक्षकयोः मैत्री युज्यते किम् ?

२) अत्युत्कटैः पाप-पुण्यैः कदा, कुत्र फलम् अशनुते?

## ३.६.हिरण्यक-लघुपतनकयोः सम्भाषणस्य अनुक्रमः

३.६.१. हिरण्यकेन स्नेहाय काकस्य आसक्तिः

(मूलम् )काकः पुनः आह -

**भक्षितेन अपि भवता, न आहरः मम पुष्कलः।**
**त्वयि जीवति जीवामि, चित्रग्रीव इवानघ !।। ८४ ।।**
**तिरश्चाम् अपि विश्वासः, दृष्टः पुण्यैककर्मणाम्।**
**सतां हि साधुशीलत्वात्, स्वभावो न निवर्तते।।८५।।**

किञ्च -

**साधोः प्रकोपितस्य अपि, मनः न आयाति विक्रियाम्।**
**न हि तापयितुं शक्यं, सागराम्भः तृणोल्कया।। ८६।।**

(विवरणम्)लघुपतनकः एवं मृग-शृगालयोः कथां शृणोति। पुनः अपि हिरण्यकमेवं वदति।'भो! हिरण्यक! अहं त्वां न खादामि। तव भक्षणेन अपि मम क्षुध् निवृत्ता न भवति। अतः भयं त्यज। चित्रग्रीवः इव त्वया सह एव जीवेयम्,अन्यथा तु न। पशु-पक्ष्यादिषु अपि साधुस्वभावास्सन्ति। पशु-पक्ष्यादयः अपि विश्वसनीयाः भवन्ति।संस्का- रवन्तः सज्जनास्तु जन्मनैव निबद्धतां वहन्ति। अतः ते सहजतया एव, साधु स्वभावात् न निवर्तन्ते। अपि च, साधुः कोपाविष्टः भवति। तथापि, कोपेन तस्य मनः विकारं न प्राप्नोति। अन्तरिक्षे ग्रहाः सन्ति। तदा तदा कालवशात् तेभ्यः कानिचित् शकलानि पतन्ति।तस्मिन् समये तानि अतिभयङ्करं शब्दं कुर्वन्ति।सोढुम् अशक्याम् उष्णकान्तिं च वहन्ति। तानि शकलानि उष्णकान्तिवाहकान्यपि समुद्रस्य जलं तापयितुं न शक्नुवन्ति खलु,इति लघुपतनकः हिरण्यकाय साधूनां प्रवृत्तिं विशदयति।

## ३.७.चपलेन सह स्नेहः न कर्तव्यः

(मूलम् )हिरण्यकः ब्रूते -'चपलः त्वम्। चपलेन सह स्नेहः सर्वथा न कर्तव्यः। तथा च उक्तम् -

**मार्जारः महिषः मेषः, काकः कापुरुषः तथा।**
**अविश्वासात् प्रभवन्ति एते, विश्वासः तत्र नोचितः।। ८७ ।।**

(विवरणम्) हिरण्यकः लघुपतनकस्य वचनं शृणोति। पुनः काकम् -'लघुपतनक! त्वं चपलस्वभावः। चपलस्वभावेन अपि स्नेहः सर्वथा निषिद्धः। १).मार्जारः, २).महिषः, ३).मेषः, ४).काकः, ५).कापुरुषः, एते अवि- श्वासात् एव प्रभवन्ति। अविश्वसनीयेषु तेषु विश्वासस्य स्थापनं श्रेयस्करं न भवति' इति वदति।

### ३.७.१.शत्रुणा सह स्नेहः सर्वथा न कर्तव्यः

(मूलम्)किं च अन्यत्, शत्रुपक्षः भवान् अस्माकम्। उक्तं च एतत् -

**शत्रुणा न हि सन्दध्यात्, सुश्लिष्टेनापि सन्धिना।**
**सुतप्तमपि पानीयं, शमयत्येव पावकम्।। ८८ ।।**
**दुर्जनः परिहर्तव्यः, विद्यया अलंङ्कृतः अपि सन्।**
**मणिना भूषितः सर्पः, किम् असौ न भयङ्करः।। ८९ ।।**
**यत् अशक्यं न तत्, शक्यं यत् शक्यं शक्यम् एव तत्।**
**न उदके शकटं याति,न च नौः गच्छति स्थले।। ९०**

अपरं च -

**महता अपि अर्थसारेण, यः विश्वसिति शत्रुषु।**
**भार्यासु च विरक्तासु, तदन्तं तस्य जीवनम् ।। ९१ ।।**

(विवरणम्) अहं मूषकः। त्वं काकः। काकाः मूषकाणां शत्रवः भवन्ति। अतः भवान् अस्माकम् शत्रुपक्षीयः भवसि। शत्रुणा स्नेहः सुतरां न कर्तव्यः। अङ्गीकारयोग्यः अपि सन्धिः, शत्रुणा तु न कर्तव्यः। सुतप्तं जलं दृष्ट्वा अग्निः, जलम् अपि उष्णतया एव वर्तते, तेन सह स्नेहः न प्रमादकरः, इति हेतुना यदि उष्णेन जलेन स्नेहं करोति, तदा उष्णं जलम् अपि, अग्निं किं न शमयति ? अवश्यम् शमयति एव।

अपि च, मणिना भूषितः अपि सर्पः भयङ्करः एव भवति,परिहरणीयः एव भवति। यथा वा मणिना भूषितः अपि सर्पः परिहरणीयः तथा विद्याधिकः अपि दुर्जनः प्रमादकरः एव, सः सर्वथा परिहरणीयः एव, कदाचिदपि आदरणीयः न भवति। यत् अशक्यं वर्तते, तत् कदापि शक्यं न भवति। यत् शक्यम्, तत् सर्वदा साध्यम् एव भवति। तथा हि- कदाचित् अपि उदके शकटं नैव याति। तथा एव, स्थलेउ भूम्याम् अपि, नौः गन्तुं न शक्नोति च। अपि च, यः उदात्त-आशयान् वदन्, शत्रुषु, विरक्तासु भार्यासु च विश्वासपूर्णः भवति, नाम विश्वासपूर्णं प्रवर्तनं वहति, तेनैव शत्रुणा, तया विरक्तयैव च भर्यया सः, तस्य जीवनस्य अन्तं गच्छति।

## ३.८.हिरण्यकेन स्नेहकरणाय काकस्य आग्रहः

(मूलम् )लघुपतनकः ब्रूते - 'श्रुतं मया सर्वम्। तथापि मम च एतावान् सङ्कल्पः त्वया सह सौहृद्यम् अवश्यं करणीयम् , नो चेत् अनाहारेण आत्मानं व्यापादयिष्यामि 'इति।

(विवरणम्)लघुपतनकः हिरण्यकस्य वचनानि शृणोति। 'हिरण्यक! तव वचनानि सर्वाणि अपि अदं शृणोमि। मम तु, त्वया सह अवश्यं स्नेहः करणीयः इति सुदृढः सङ्कल्पः अस्ति। अन्यथा (Other wise) अहम् आहारं न स्वीकरोमि। निराहारेण आत्मानं व्यापादयिष्यामि'इति लघुपतनकः हिरण्यकस्य सुदृढं स्व निर्णयं कथयति।

### ३.८.१.सुजन-दुर्जनयोः मैत्री

(मूलम्)तथा हि -

**मृत् घटवत् सुखभेद्यः, दुस्सन्धानश्च दुर्जनः भवति।**
**सुजनस्तु कनकघटवत्, दुर्भेद्यः च आशु सन्धेयः।।९२।**

किञ्च -

**द्रवत्वात् सर्वलोहानाम्,निमित्तात् मृग-पक्षिणाम्।**
**भयात् लोभात् च मूर्खाणाम्,सङ्गतं दर्शनात् सताम्।९३।**

किञ्च -

**नारिकेलसमाकाराः, दृश्यन्ते हि सुहृत् जनाः।**
**अन्ये बदरिकाकाराः, बहिः एव मनोहराः।। ९४ ।।**
**स्नेहच्छेदे अपि साधूनां, गुणाः न आयान्ति विक्रियाम्।**
**भङ्गे अपि हि मृणालानाम्, अनुबध्नन्ति तन्तवः ।। ९५ ।।**

अन्यत् च -

**शुचित्वं त्यागिता शौर्यं, सामान्यं सुख-दुःखयोः।**
**दाक्षिण्यं च अनुरक्तिश्च, सत्यता च सुहृद्गुणाः।। ९६ ।।**

(विवरणम्) अस्मिन् एव सन्दर्भे लघुपतनकः सज्जनमैत्रीम् एवं प्रशंसति। दुर्जनमैत्री मृत् -घटसदृशी। दुर्जनेन सह मैत्री मृत् घटवत् सुखेन भिन्नः, नाम विच्छिन्नः ,भवति। पुनः सन्धातुं च अशक्या भवति।सज्जनेन मैत्री कनककलशेन समाना भवति। यथा कनककलशः दुःखेन अपि भेत्तुम् अशक्यः,भिन्नः,नाम भग्नः अपि, सुखेन सन्धातुं योग्यः च भवति, तथा सज्जनमैत्री अपि दुर्भेद्यः, सुसन्धानश्च भवति।किञ्च लोहाः सर्वे अपि द्रवीभूय मिलन्ति, नाम स्नेहं कुर्वन्ति। पशु--पक्ष्यादयः निमित्तवशात् मित्रतां गच्छन्ति। मूर्खाः भयवशात् वा लोभकारणात् वा सख्यं कुर्वन्ति। करुणापराः सज्जनाः दर्शनमात्रात् एव स्नेहं कुर्वन्ति। स्नेहम् आप्नुवन्ति च।

किञ्च सज्जनाः नारिकेलेन,समान-आकाराः,नाम सदृशाः भवन्ति। सज्जनाः बहिः कटुतया व्यवहरन्ति। मनसि तु पवित्रवन्तः भवन्ति। मृदुशीलाः भवन्ति। स्वादुशीलाश्च

बदरीफलसदृशाः भवन्ति। बदरीफलानि बहिः एव मनोहराणि भवन्ति। अन्तः तु काठिन्यं वहन्ति, तथा दुर्जनाः बहिः मृदुस्वभाविनः भवन्ति,मनसि तु काठिन्यं वहन्ति। दुर्जनाः न विश्वसनीयाः भवन्ति। स्नेहे नष्टे अपि प्रेमपूर्णानां मनांसि विकारं न गच्छन्ति। तथाहि- भङ्गे अपि हि मृणालानाम् तन्तवः अनुबध्नन्ति एव खलु।

ÊEð SÉ;{ÉÊ;ÉÉÉ;nÉ¶É|ÉÒÉÉ;¶ÉÉçÉÂ(Sportivity) सुखेषु दुःखेषु च समानस्थितिः, सेवकजनेषु अनुकूल- प्रवर्तनम्,बन्धुजनेषुअभिमानशीलता,वास्तविकदृक्पथम्, इति एते मित्राणां गुणाः भवन्ति, इति बहुधा लघुपतनकः सज्जनमैत्रीं प्रशंसति।

**स्वावलोकनप्रश्नाः**

१) सतां स्वभावः कस्मात् न निवर्तते ?

२) कस्य स्नेहः सुखभेद्यः भवति ?

३) कस्य स्नेहः आशु सन्धेयः भवति ?

४) दाक्षिण्यम्, अनुरक्तिः,सत्यता - एते के ?

### ३.८.२.काकेन सह मैत्रीकरणाय हिरण्यकस्य सम्मतिः

(मूलम्)एतैः गुणैः उपेतः भवदन्यः मया कः सुहृत् प्राप्तव्यः, इत्यादि तद्वचनम् आकर्ण्य हिरण्यकः बहिः निस्सृत्य, आह –'आप्यायितः अहं भवताम् अनेन वचनामृतेन। तथा च उक्तम् -

**घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली**
**न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गम् अपि अर्पितम् ।**
**प्रीत्या सज्जनभाषितं प्रभवति प्रायो यथा चेतसः**
**सद्युक्त्या च पुरस्कृतं सुकृतिनाम् आकृष्टिमन्त्रोपमम्।। ९७ ।।**

अन्यत् च -

**रहस्यभेदः याच्ना च, नैष्ठुर्यं चलचित्तता।**
**क्रोधः निस्सत्यता द्यूतम् एतत् मित्रस्य दूषणम्।। ९८ ।।**

यतः -

**पटुत्वं सत्यवादित्वं, कथायोगेन बुध्यते।**
**अस्तब्धत्वम् अचापल्यं,प्रत्यक्षेण अवगम्यते ।। ९९ ।।**

अपरञ्च -

**अन्यथैव हि सौहार्दं, भवेत् तत् च अन्तरात्मनः।**
**प्रवर्तते अन्यथा वाणी, शाठ्योपहतचेतसः।। १०० ।।**

भवन्ति। दयां वहन्ति। वात्सल्यं धरन्ति। सज्जनात् इतरे दुर्जनाः तु बदरिकाकाराः

**मनसि अन्यत् ,वचसि अन्यत्, कर्मणि अन्यत् ,दुरात्मनाम् ।**
**मनसि एकम्, वचसि एकम्, कर्मण्येकम्, महात्मनाम् ।। १०१ ।।**

तत् भवतु भवतः अभिमतम् एव ' इति उक्त्वा हिरण्यकः मैत्र्यं विधाय, भोजनविशेषैः वायसं सन्तोष्य विवरं प्रविष्टः। वायसः अपि स्वास्थानं गतः। ततः प्रभृति तयोः अन्योन्य- आहारप्रदानेन कुशलप्रश्नैः विस्रम्भ- आलापैश्च कालः अतिवर्तते।

(विवरणम्)भवान् एवंविधैः सद्गुणैः गुणैः उपेतः भवति। अतः भवन्तम् अपहाय अन्येन केन अहं स्नेहं करोमि इति लघुपतनकः हिरण्यकं स्नेहपूर्णं वदति।हिरण्यकः लघुपतनकस्य तद्वचनं शृणोति। बहिः निस्सरति। लघुपतनकम् एवं वदति।'लघुपतनक !अहम् अपि भवतः अनेन वचनामृतेन आप्यायितः अस्मि। सज्जनस्य भाषितं चेतः आकर्षति। युक्तियुक्तं भवति। मनस्सु प्रीतिं जनयति। श्रोतॄन् सुखयति। एवं सज्जनस्य भाषितं यथा वा सुखयति, तथा सुशीतलजलैः स्नानं वा, मुक्तावल्याः धारणं वा, अङ्गम् अङ्गम् अर्पितं श्रीखण्डस्य विलेपनं वा न सुखयति, नैव प्रभावयति च। किञ्च १.रहस्यानां प्रकाशनम्, २.दान-आदानादिकम् (Transaction), ३.परुषभाषणम्, ४.चित्तचाञ्चल्यम्, ५.क्रोधस्य अधिगमनम्, ६. असत्यभाषणम्, ७.द्यूतक्रीडनम्, इति एतानि सप्त च मैत्री घातुकानि भवन्ति। अतः स्नेहम् इच्छता पुरुषेण एतानि अवश्यं त्यक्तव्यानि भवन्ति। मित्रस्य सामर्थ्यम्,सत्यप्रवर्तनं च कालक्रमेण अवगन्तुं प्रभवामः। स्थिरता, क्रियाशीलकता तु दैनन्दिनिकजीवने साक्षात् एव द्रष्टुं पारयामः।

अपि च-वञ्चकेषु, सौहार्दंउ बहिः सम्बन्धस्थापनम्, सर्वत्र,स्वभावात्उ मनसि स्थितात् भिन्नम् एव भवति। एकं चिन्तयन्ति। अपरं कथयन्ति। अन्यम् आचरन्ति। ते च एवं शाठ्येन जीवन्ति। तेषां हृदयस्थम् अन्यत् भवति। वदनात् आगच्छत् वचः अन्यत् भवति। मनसि, वचसि, कर्मणि च एतेषां शुद्धिः न भवति। एतादृशाः त्रिकरणेषु शुद्ध्या हीनाः दुरात्मानः भवन्ति। स्नेहशालिनः तु त्रिकरणशुद्ध्या व्यवहरन्ति। मनसि, वचसि, कर्मणि च एकतां साधयन्ति। नियमशीलाः महापुरुषाः भवन्ति।

अतः भवतः यत् अभिमतम्,मया (हिरण्यकेन)सह स्नेहकरणम्, तत् एव भवतु' इति हिरण्यकः लघुपतनकं वदति।हिरण्यकः लघुपतनकेन स्नेहं करोति। विशेषभोजनेन वायसं सन्तोषयति। ततः हिरण्यकः विवरं प्रविशति। वायसः अपि स्वास्थानं गच्छति। ततः प्रभृति हिरण्यक-लघुपतनकौ अन्योन्यम् आहारं स्वीकुरुतः। अन्योन्यमाहारं ददतः। परस्परं क्षेमसमाचारं जानीतः। विनोदेन सल्लापं कुरुतः। आनन्देन कालं यापयतः च।

**स्वावलोकनप्रश्नाः**

१) क्रोधः,निस्सत्यता,द्यूतम् - एतत् किम् ?

२) मनसि,वचसि,कर्मणि ,च ऐक्यं केषां भवति ?

## ३.९.उपसंहारः

एवम् अस्यां कथायां मृग-काकयोः स्नेहः,शृगालस्य वञ्चनास्वभावः. मृगस्य अविवेकः, मित्रस्य संरक्षणे काकस्य निबद्धता, इत्येते अंशाः सरलं बोधिताः। सरसं प्रस्ताविताः च। मृग-काकयोः स्नेहः आदर्शप्रायः, शृगालः वञ्चकः, कपटशीलः, एवम् एतेषां स्वभावं च सुनिपुणं विश्लिष्य, पाठकः जीवने साधुसम्बन्धान्स्थापयितुं प्रयत्नशीली भवति।

## ३.१०.अभ्यासः

अ).जम्बुकस्य वञ्चनास्वभावं वर्णयत ?

इ).मृगस्य रक्षणे काकस्य निबद्धतां वर्णयत ?

उ).काक-मृग-जम्बुकानां स्वभावं सविमर्शं विश्लेषणं कुरुत ?

* * *

# UNIT- IV; जरद्गवस्य वृत्तान्तम् (कथा- ३)

संरचना

४.०.परिचयः
४.१.लक्ष्याणि
४.२.कथायाःनेपथ्यम्
४.३.जरद्गवस्य वृत्तान्तम्
४.३.१मार्जारस्य परिचयः -जरद्गवस्य तर्जनम् च
४.३.२.मार्जारस्य वञ्चनाप्रगल्भता
४.३.२.१.गृहस्थधर्मः
४.३.३.गृध्रस्य असौकर्यम्
४.३.४.विश्वासस्य जननाय मार्जारस्य प्रयत्नः
४.३.४.१.अहिंसायाः प्राभवस्य वर्णनम्
४.३.५मार्जारदुर्वृत्तस्य जरद्गव-व्यापादनं फलम्
४.४.उपसंहारः
४.५.अभ्यासः

## ४.०.परिचयः

प्रपञ्चप्रसिद्धं कथाकाव्यं हि पञ्चतन्त्रम् । अस्य च रचयिता विष्णुशर्मा। एतद् आधारेण रचितम् अन्यत् कथा काव्यं हितोपदेशः। अत्र च १).मित्रलाभः २).मित्रभेदः ३).सन्धिः ४).विग्रहः इति चत्वारः भागाः सन्ति।अस्य रचयिता नारायणपण्डितः। प्रकृते इयं, हितोपदेशे-मित्रलाभभागात् स्वीकृता तृतीया कथा। अत्र जरद्गव-दीर्घकर्णयोः (गृध्र-मार्जारयोः) कथा वर्णिता। लघुपतनकः हिरण्यकं स्वेन स्नेहं कर्तुं पृच्छति। भक्ष्य-भक्षकयोः स्नेहः न युज्यते इति काक- मृग-जम्बुकवृत्तान्तम् उदाहरति।तत्र मृगः जम्बुकेन स्नेहं करोति। जम्बुकम् आवासम् आनयति च। तदा काकः मृगं प्रति 'अज्ञातकुलशीलस्य वासः देयः न कस्यचित्'इति अंशं बोधयति। अत्र मार्जारः वञ्चकः। जरद्गवः अज्ञातकुलशीलस्य आश्रयदाता। मर्जाराय आश्रयं दत्त्वा जरद्गवः पक्षिभिः व्यापादितः भवति। एतत्कथायाः विस्तृतः परिचयः अत्र भवति।

## ४.१.लक्ष्याणि

मानवः बुद्धिजीवः। तथैव सः सङ्घजीवोऽपि। सङ्घे जीवनम् अपि न तथा सुलभम्। सङ्घे जीवितुं सम्बन्धाः स्थापनीयाः, पोषणीयाश्च। मानवाश्च साधवः, असाधवश्च

भवन्ति। असाधुषु अपि अपकारिणः, कृतघ्नाः, अलसाः, द्रोहिणः वञ्चकाश्च भवन्ति। अभ्युदयमानवस्य एतेषां सम्पर्कः अनावश्यकः त्याज्यश्च। कदाचित् तेषां सम्पर्कः अपि अनिवार्यः भवति। तदा पुरुषेण विवेकेन प्रवर्तितव्यं भवति। सुखेन साङ्घिकजीवन-उपयोगि विवेकप्रबोधनाय एव अयं पाठ्यांशः उद्दिष्टः। एतत् पाठ्यांशस्य अध्ययनेनः -

- श्रवण-पठन-भाषण-कौशलानां वर्धनं भवति।
- पाठ्यांशं सम्यक् पठति,पदकोशं वर्धयति,वाक्यरचनाकौशलं साधयति च।
- मार्जानस्य(दीर्घकर्णस्य) वञ्चनास्वभावं पठितुं समर्थः भवति।
- जरद्गवस्य(गृध्रस्य) अविवेकितायाः दुष्परिणामं श्रोतुं पारयति।
- गृहस्थधर्मान् पठितुं समर्थः भवति।
- अहिंसायाः प्रभावम्अवगन्तुं पारयति।

## ४.२.कथायाः नेपथ्यम्

(मूलम्) ततः पश्चात् अस्तंगते सवितरि भगवति मरीचिमालिनि,तौ मृग-जम्बुकौ वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिः नाम काकः मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काकः अवदत्-'सखे चित्राङ्ग ! कः अयं द्वितीयः ? मृगो ब्रूते-'जम्बूकः अयम् 'अस्मत्-सख्यम् इच्छन् इह आगतः'। काकः ब्रूते- 'मित्र ! अकस्मात् आगन्तुना सह मैत्री न युक्ता।

तथा च उक्तम् -

**अज्ञातकुलशीलस्य, वासः देयः न कस्यचित्।**
**मार्जारस्य हि दोषेण, हतः गृध्रः जरद्गवः ।। ५६ ।।**

तौ आहतुः - 'कथम् एतत् ' । काकः कथयति -

(विवरणम्) किञ्चित् कालानन्तरम्, सायं भवति। सूर्यः अस्तं गच्छति। मृगः काकश्च उभौ मिलित्वा, निवासम् आगच्छतः। तत्र चम्पकवृक्षः कश्चित् अस्ति। तस्य शाखायां सुबुद्धिः नाम काकः अस्ति। चिरकालतः सः मृगस्य मित्रं भवति। सः मिलित्वा आगतौ मृग-काकौ पश्यति। काकं 'सखे चित्राङ्ग ! द्वितीयः अयं कः ? इति पृच्छति। अयं जम्बुकः, आवयोः सख्यम् इच्छति। अतः इह आगच्छति, इति मृगः काकाय कथयति। अनुपदम् एव काकः मृगम् - सखे !नूतनतया यः आगच्छति, तेन सह अकस्मात् स्नेहकरणं न समीचीनं भवति। आगन्तुना सह मैत्री प्रमादं जनयति। कुलम् अज्ञात्वा, शीलम् अज्ञात्वा यस्य कस्यापि वासस्य कृते अवकाशः नैव देयः। एवम् अपरिचितस्य मार्जारस्य अवकाशं दत्त्वा गृध्रः दोषम् आचरति। तेनैव दोषेण सः गृध्रः पक्षिभिः व्यापादितः भवति, इति च कथयति। मार्जारस्य अवकाशं दत्त्वा गृध्रः कथं व्यापादितः इति ज्ञातुं मृग-जम्बुकौ इच्छतः। मृगः गृध्रस्य वृत्तान्तम् एवं कथयति।

## ४.३.जरद्गवस्य वृत्तान्तम्

(मूलम्) अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः। तस्य कोटरे दैवदुर्विपाकात् गलित- नख-नयनः जरद्गवः नाम गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तत्-वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चित् उद्धृत्य ददति। तेन असौ जीवति। अथ कदाचित् दीर्घकर्णः नाम मार्जारः पक्षिशावकान् भक्षितुं तत्र आगतः। ततः तम् आयान्तं दृष्ट्वा पक्षिशाबकैः भयार्तैः कोलाहलः कृतः। तत् श्रुत्वा जरद्गवेन उक्तम् – 'कः अयम् आयाति ' ? दीर्घकर्णः गृध्रम् अवलोक्य सभयम् आह - 'हा, हतेऽस्मि ! यतः-

**तावत् भयस्य भेतव्यं, यावत् भयम् अनागतम्।**
**अगतं तु भयं वीक्ष्य, नरः कुर्यात् यथोचितम्।। ५७ ।।**

(विवरणम्) भागीरथी नाम गङ्गा। तस्याः तीरप्रान्ते 'गृध्रकूटम्' इति नामकः कश्चन पर्वतः अस्ति। तस्मिन् गृध्रकूटपर्वते पर्कटीनामकः वृक्षविशेषः कश्चित् अस्ति। तत्र पर्कटीवृक्षस्य कोटरे कश्चन गृध्रः प्रतिवसति। तस्य नाम जरद्गवः। दुरदृष्टवशात् तस्य दृष्टिः अपगता। नखाः च गलिताः। एवं दुरवस्थाम् अनुभवन् जरद्गवः पर्कटीवृक्षस्य कोटरे कालं यापयति। तत्-वृक्षवासिनः इतरे पक्षिणः तस्य दुरवस्थां पश्यन्ति। सानुभूतिं प्रदर्शयन्ति। स्वेषाम् आहारात् किञ्चित् उद्धृत्य जरद्गवाय ददति। तेन असौ जीवति। जरद्गवश्च प्रत्युप- कारतया पक्षिणां शाबकान् पालयति। तस्य एवं कालं गच्छति।

एवं स्थिते कदाचित् कश्चन मार्जारः तत्र आगच्छति। तस्य च नाम दीर्घकर्णः। सः दुरुद्देशेन तत्र आगतः। तत्र पक्षिणां शाबकाः सन्ति खलु। तान् खादितुम् अत्र आगच्छति। वृक्षवासिनः पक्षिशाबकाः आगच्छन्तं मार्जारं पश्यन्ति। भीताः भवन्ति। आर्त्या कोलाहलं कुर्वन्ति। गृध्रः कोलाहलं शृणोति। कः अयम्, आगच्छति ? इति पृच्छति। अनूह्यतया मार्जारः तत्र गृध्रं पश्यति, बिभेति। 'अहो ! दौर्भाग्यम्, हतः अस्मि। भवतु, धैर्येण अभिमुखः भवामि।तथा हि- यावत् भयं न भवति, तावत् एव भयस्य भेतव्यं भवति। यदा भयं समापतति, तदा मानवः सन्दर्भानुगुणं यत्किञ्चित् आत्मनः रक्षकं प्रतीकारं कुर्यात् एव खलु ' इति चिन्तयति।

**स्वावलोकनप्रश्नाः**

१) पर्कटीवृक्षः कुत्र अस्ति ?

२) जरद्गवः कः ?

३) मार्जारः कः ?

४) आगतं भयं वीक्ष्य नरः किं कुर्यात् ?

**४.३.१.मार्जारस्य परिचयः -जरद्गवस्य तर्जनम् च**

(मूलम्)अधुना अस्य सन्निधाने पलायितुम् अक्षमः। तत् यथा भवितव्यं तत् भवतु। तावत् विश्वासम् उत्पाद्य अस्य समीपं गच्छामि,इति आलोच्य,उपसृत्य, अब्रवीत् -'आर्य त्वाम् अभिवन्दे'। गृध्रः अवदत् - ' कस्त्वम् ' ? सः अवदत्- 'मार्जारोः अहम्'। गृध्रः ब्रूते- ' द्रुतम् अपसर। नो चेत् हन्तव्यः भविष्यसि मया'।

(विवरणम्)इदानीम् गृध्रस्य सकाशात् पलायितुम् अहं न शक्नोमि। किं कुर्मः ? तस्मात् येन प्रकारेण भविष्यति तत् भवतु, गृध्रस्य समीपं गच्छामि। आदौ गृध्रस्य विश्वासम् जनयामिइति चिन्तयति। गृध्रस्य समीपं गच्छति।'श्रीमन् ! तत्र भवन्तम् अभिवादये' इति गृध्रम् अभिनन्द्य नमस्करोति। ' त्वं कः ' ? इति गृध्रः पृच्छति। 'अहं मार्जारः ' दीर्घकर्णः समादधाति। गृध्रः सावधानः भवति। कण्ठम् उच्चैः करोति। 'अनुपदम् एव शीघ्रम् अस्मात् प्रदेशात् अपसरतु, अन्यथा अहं त्वां मारयिष्यामि ' इति भाययन् , गृध्रः आग्रहेण वदति।

**४.३.२.मार्जारस्य वञ्चनप्रगल्भता**

(मूलम्)मार्जारः अवदत् - 'श्रूयतां तावत् अस्मत् वचनम्। ततः यद्यहं वध्यः तदा हन्तव्यः। यतः-

**जातिमात्रेण किं कश्चित्, हन्यते पूज्यते क्वचित्।**
**व्यवहारं परिज्ञाय वध्यः, पूज्यः अथवा भवेत् '।। ५८ ।।**

(विवरणम्) मार्जारः कपटस्वभावी। कपटेन स्वस्य अभीष्टं साधयितुम् आगतः वञ्चकः अयम्। गृध्रं वञ्च- यितुं एवम् उपक्रमते। श्रीमन् ! आदौ मम वचनं शृणोतु। श्रवणात् अनन्तरम् अपि हन्तुम् योग्यः इति यदि अहं निरूपितः भवामि, तदा अवश्यं मारयिष्यसि एव। तथा हि-जातिमात्रेण यः कश्चित् अपि मानवः, यत्र कुत्रापि,हन्तुं योग्यः न भवति। जन्मनैव पूजयितुम् अपि अर्हः न भवति। प्रथमं गुणपूर्णं व्यक्तेः साधुप्रवर्तनं वयं जानीमः। एवं व्यक्तेः व्यवहारं ज्ञात्वा, अयं वध्यः वा,अथवा पूज्यः वा इति निर्णयः अनन्तरं कर्तव्यः भवति।

**४.३.२.१गृहस्थधर्मः**

(मूलम्)गृहस्थधर्मश्च एषः -

**अरौ अपि उचितं कार्यम्, आतिथ्यं गृहम् आगते।**
**छेत्तुः पार्श्वगतां छायां, न उपसंहरते द्रुमः।। ५९ ।।**

यदि वा धनं नास्ति तदा प्रीतिवचसा अपि अतिथिः पूज्यः एव। यतः -

**तृणानि भूमिः उदकं, वाक् चतुर्थी च सूनृता।**
**एतानि अपि सतां गेहे, न उच्छिद्यन्ते कदाचन ।। ६० ।।**

अपरं च -

**निर्गुणेषु अपि सत्त्वेषु, दयां कुर्वन्ति साधवः।**
**न हि संहरते ज्योत्स्नां, चन्द्रः चण्डालवेश्मनः।। ६१ ।।**

अन्यत् च -

**अतिथिः यस्य भग्नाशो गृहात् प्रतिनिवर्तते।**
**सः तस्मै दृष्कृतं दत्त्वा पुण्यम् आदाय गच्छति ।। ६२ ।।**

अन्यत् च -

**उत्तमस्यापि वर्णस्य, नीचः अपि गृहम् आगतः।**
**पूजनीयः यथायोग्यं, सर्वदेवमयः अतिथिः ‘।। ६३ ।।**

(विवरणम्)अत्र गृध्रं वञ्चयितुं मार्जारः धर्मान् उपदिशति। गृध्रं विश्वासयति। तस्मिन् एव भागतया अतिथिषु गृहस्थस्य प्रवर्तनं वर्णयति। गृहम् आगते शत्रौ अपि उचितम् आतिथ्यं कुर्यात्। अत्र वृक्षः एव दृष्टान्तः भवति। तथा हि - आत्मानं (वृक्षम्) छेत्तुं कश्चित् आगच्छति। आत्मानं छिनत्ति इति कृत्वा छेदकः वृक्षस्य  शत्रुः भवति। वृक्षः, तादृशस्यापि छायां दत्त्वा, सत्करोति एव खलु। छेत्तुम् आगतः इति कृत्वा वृक्षः छेदकस्य कृते छायां न उपसंहरते।

किञ्च गृहम् आगतम् अतिथिं सत्कर्तुं, हस्ते धनं न भवति, तदा विनोदवचसा वा,उल्लास-उक्त्या वा अतिथिः पूजनीयः भवति। १).तृणानि (तृणसम्पत्तिः, धान्यानि) २).भूमिः (फलसम्पत्तिः) ३).उदकं (निर्मलं जलम्)  ४).सूनृता वाक् (सत्यं प्रियं हितं च वचः) एतानि चत्वारि कदाचन अपि उदारपुरुषाणां गृहेषु न अभावं यान्ति।

किञ्च करुणापराः उदारपुरुषाः गुणहीनेष्वपि व्यक्तिषु प्रेम-वात्सल्यादिकं प्रदर्शयन्त्येव। तथा हि-चन्द्रः संस्कारम् अनापन्नानां गृहेषु अपि स्वीयां ज्योत्स्नां वितनोति एव। संस्कारेण हीनाः इति कृत्वा तत्र चन्द्रः ज्योत्स्नां न उपसंहरते खलु। अपि च, गृहस्थः, गृहम् आगतम् यम् अतिथिं न सत्करोति, प्रत्युत यस्य अतिथेः आशां भग्नं कृत्वा प्रेषयति, निराशया प्रतिनिवृत्तः सः अतिथिः गृहस्थस्य पुण्यं स्वीकृत्य , दुष्कृतंउपापम्,दत्त्वा गच्छति इत्यर्थः। किञ्च अनागरिकः नागरिकाणां गृहं यदि आगच्छति, सः अपि मनःपूर्वकम् आदगणीयः भवति। कुतः इति चेत् गृहम् आगतः अतिथिः भवति। अतिथिः सर्वदेवस्वरूपः। सर्वदेवस्वरूपः अतिथिः यस्मिन् कस्मिन् रूपे वा भवतु , सः पूजार्हः एव भवति इति एवं बहुधा गृहस्थस्य धर्मान् अस्मिन् सन्दर्भे वर्णयति।

### ४.३.३.गृध्रस्य   असौकर्यम्

(मूलम्)गृध्रोऽअवदत्-‘मार्जारो हि मांसरुचिः। पक्षिशाबकाश्च अत्र निवसन्ति।तेन अहमेवं ब्रवीमि’ इति।

(विवरणम्)गृध्रः मार्जारस्य गृहस्थाश्रमस्य धर्माणाम् उपन्यासं शृणोति। किञ्चिदिव असौकर्यम् अनुभवति। आग्रहस्य उद्धृतिं शिथिलयति। ‘सामान्यतया मार्जारः मांसरुचिः भवति खलु। तत्रापि अत्र  पक्षिशाबकाः वर्तन्ते। अतः प्रमादः सम्भवति इति मया एवं

तर्जितम्। धर्मवेत्ता भवान् अन्यथा मा चिन्तयतु' इति मार्जारं सान्त्वयितुं प्रयत्नं करोति।

## ४.३.४.विश्वासस्य जननाय मार्जारस्य प्रयत्नः

(मूलम्) तत् श्रुत्वा मार्जारः भूमिं स्पृष्ट्वा कर्णौ स्पृशति। ब्रूते च –'मया धर्मशास्त्रं श्रुत्वा वीतरागेण इदं दुष्करं व्रतं चान्द्रायणम् अध्यवसितम्।

(विवरणम्) मार्जारः गृध्रस्य वचः शृणोति। शान्तम् पापम्, शान्तम् पापम्, इति एवम् अर्थम् अवगमयन् भूमिं स्पृशति। कर्णौ पिदधाति। बहिः एवं वदति।श्रीमन् ! अहं धर्मशास्त्रम् अधीतवान्। तेन वीतरागश्च सम्पन्नः। अनन्तरम् दुःखेनापि आचरितुम् असाध्यं चान्द्रायणव्रतं धृतवान् अस्मि।

### ४.३.४.१.अहिंसायाः प्राभवस्य वर्णनम्

(मूलम्)परस्परं विवदमानानाम् अपि धर्मशास्त्राणाम् 'अहिंसा परमो धर्मः' इत्यत्र ऐकमत्यम्। यतः-

**सर्वहिंसानिवृत्ताः ये, नराः सर्वसहाश्च ये।**
**सर्वस्य आश्रयभूताश्च, ते नराः स्वर्गगामिनः।। ६४ ।।**
**एकः एव सुहृद्धर्मः, निधने अपि अनुयाति यः।**
**शरीरेण समं नाशं, सर्वम् अन्यत्तु गच्छति ।। ६५ ।।**
**यः अत्ति यस्य यदा, मांसम् उभयोः पश्यत अन्तरम्।**
**एकस्य क्षणिका प्रीतिः, अन्यः प्राणैः विमुच्यते।। ६६ ।।**
**मर्तव्यम् इति यद् दुःखं, पुरुषस्य उपजायते।**
**शक्यते नानुमानेन, परेण परिवर्णितुम् ।। ६७ ।।**

शृणु पुनः -

**स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते।**
**अस्य दग्धोदरस्य अर्थे कः कुर्यात् पातकं महत् ।। ६८ ।।**

एवं विश्वस्य सः मार्जारः तरुकोटरे स्थितः।

(विवरणम्) अनेकेषु विषयेषु धर्मशास्त्रकाराणां मतभेदाः सन्ति। परम् 'अहिंसा परमः धर्मः' इत्यत्र एका भिप्रायं प्रकटयन्ति। तादृशः महिमान्वितः अस्ति अहिंसासिद्धान्तः। ये नराः सर्वविधाभ्यः हिंसाभ्यः निवृत्ताः भवन्ति, ये च मानवाः सर्वं सहन्ते,ये च मानवाः सर्वस्य आश्रयदातारश्च भवन्ति ते नूनं पुण्यशीलाः भवन्ति। स्वर्गं गच्छन्ति, स्वर्गे वसन्ति। किञ्च, सुहृद्धर्मः एकः एव मरणे अपि अनुयाति। अन्यत् सर्वं शरीरेण समं नाशं गच्छति। यदा यः यस्य मांसम् अत्ति तदा तयोः उभयोः महत् अन्तरं विद्यते। यः मांसम् अत्ति तस्य क्षणकालं, नाम भोजनपर्यन्तं तृप्तिः वा, प्रीतिः वा विद्यते। अन्यः तु प्राणैः विमुच्यते। पुरुषस्य मरणभयम् अधिकम्। मनसि जायमानं मरणभयम् उद्दिश्य परेण वर्णितुं न शक्यते। उदरस्य पूर्तिः कृष्यादिकं विना स्वयम् एव उत्पन्नेन शाकेनापि कर्तुं शक्यते खलु, तुच्छ-उदरपोषणाय पक्षिशाबकानां हननरूपं घोरं पातकं कः करोति, इति अनेकधा उक्त्वा

मार्जारः गृध्रं विश्वासयति। गृध्रः मार्जारं कोटरे स्थातुम् अवकाशं ददाति च।

४.३.५.मार्जारदुर्वृत्तस्य जरद्गव-व्यापादनं फलम्

(मूलम्)ततः दिनेषु गच्छत्सु,पक्षिशावकान् आक्रम्य कोटरम् आनीय प्रत्यहं खादति।येषाम् अपत्यानि खादितानि तैः शोकार्तैः विलपद्भिः इतस्ततः जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जारः कोटरात् निस्सृत्य बहिः पलायितः। पश्चात् पक्षिभिः इतस्ततः निरूपयद्भिः तत्र तरुकोटरे शावकानाम् अस्थीनि प्राप्तानि। अनन्तरं ते ऊचुः – ' अनेनैव जरद्गवेन अस्माकं शाबकाः खादिताः ' इति निश्चित्य सर्वैः पक्षिभिः गृध्रः व्यापादितः। अतः अहं ब्रवीमि – 'अज्ञातकुलशीलस्य...'इत्यादि।

(विवरणम्) कालः गच्छति। वञ्चनानिपुणः मार्जारः तु प्रत्यहं पक्षिशावकान् आक्रमति। कोटरं नयति, खादति च। दिनानि गच्छन्ति। पक्षिणाम् अपत्यानि न दृश्यन्ते। पक्षिणां मातापितरौ, शाबकानाम् अदर्शनेन विलपन्ति। शाबकाः किम् अभवन् इति ज्ञातुम् इच्छन्ति। इतस्ततः अन्विष्यन्ति। मार्जारः पक्षिणां शाबकान्वेषणं जानाति। कोटरात् बहिः निस्सरति। पलायति च। अनन्तरं पक्षिणः तीव्रम् अन्विष्यन्ति। तरोः कोटरे शाबकानाम् अस्थीनि पश्यन्ति। जरद्गवः एव शाबकान् खादितवान्, इति निश्चिन्वन्ति। सर्वे पक्षिणः जरद्गवं व्यापादयन्ति। अतः शीलं वा कुलं वा अज्ञात्वा कस्यचन अपि वासः नैव दातव्यः, इति अहं (काकः सुबुद्धिः) कथयामि।

**स्वावलोकनप्रश्नाः**

१) वध्यः वा, पूज्यः वा कथं भवति ?

२) आतिथ्यं कथं कार्यम् ?

३) भग्नाशः अतिथिः गृहात् कथं प्रति निवर्तते ?

४) 'अहिंसा परमो धर्मः' इत्यत्र केषाम् ऐकमत्यम् अस्ति ?

५) गृध्रः कैः व्यापादितः ?

## ४.४.उपसंहारः

एवम् अस्यां कथायां जरद्गवस्य (गृध्रस्य) अविवेकिता, मार्जारस्य वञ्चनास्वभावः, वञ्चनास्वभावेऽपि समयस्य स्फूर्तिः अप (FALSE) विनयम्, पुरोवर्तिषु विश्वासजननम्, विश्वासजननाय आवश्यकं वाक्पाटवम्, धर्मशास्त्राणां परिचयः, पुरोवर्तिषु अपि आत्मसु अपराधभावजननम् इत्यादिविषयाः, हृदयाकर्षकतया अभिवर्णिताः। एते विषयाः पाठकान् 'अज्ञातव्यक्तिषु अप्रमत्तान्' कर्तुं प्रभवन्ति।

## ४.५.अभ्यासः

अ).जरद्गववृत्तान्तं वर्णयत ?

इ).विश्वासजननाय मार्जारः किं किम् उवाच ?

उ).अहिंसायाः प्राशस्त्यं वर्णयत ?

ऋ).गृहस्थधर्मः कीदृशः, वर्णयत ?

* * *

# UNIT-V; हिरण्यकवृत्तान्तम् (कथा - ४)

संरचना

५.० परिचयः
५.१.लक्ष्याणि
५.२ कथायाः नेपथ्यम्
५.२.१अन्यत्र गमनाय काकस्य(लघुपतनकस्य) अभ्यर्थनम्
५.२.२.पुनः आलोचनाय हिरण्यकस्य प्रार्थनम्
५.२.२.१.मन्थरकस्य व्यक्तित्वम्
५.२.३.हिरण्यकेन आत्मनः अपि आगमननिवेदनम्
५.२.४. आवासस्थानम् एवं भवेत्
५.२.५.अभ्यागतस्य प्राशस्त्यम्
५.२.६.हिरण्यकस्य परिचयः
५.३. हिरण्यकवृत्तान्तम् (कथा-४)
५.३.१.चूडाकर्णस्य वृत्तान्तम्
५.३.२.सर्वं कार्य- कारणभावमूलकम्
५.३.३.चन्दनदासः - लीलावत्योः वृत्तान्तम्
५.३.४.हिरणयकस्य उत्प्लवने धनस्य प्रभावः
५.३.५.मतिमतः अप्रकाश्यानि
५.३.६.मनस्विनः स्वभावः
५.३.७.दारिद्र्यस्य दुष्प्रभावः
५.३.८.अर्थितायाः दुर्भरता
५.३.९.लोभस्य पर्यवसानम्
५.३.१०.तृप्तेः प्राशस्त्यम्
५.३.११.परिच्छेदस्य(विवेकस्य)प्राशस्त्यम्
५.३.१२.धर्मजीवनम् आवश्यकम्
५.३.१३.उपार्जितानां वित्तानां,त्यागः एव हि रक्षणम्
५.३.१४.क्रिया(उत्साह उ प्रयत्न)शीलकतायाः आवश्यकता
५.३.१५.स्थानबलं महत्
५.३.१६.स्थानस्य च न तथा प्राबल्यम् अस्ति
५.३.१७.दुःखानि सुखानि च स्वीकर्तव्यानि एव
५.३.१८.प्रतिभा-प्रतापादिकं जन्मसिद्धम्
५.३.१९.धने लोभः न तथा समीचीनः

५.३.२०.सतां प्रशंसनम्

५.४.उपसंहारः

५.५.अभ्यासः

## ५.०.परिचयः

संस्कृतकाव्यसाहित्यम् अतिमहत्। तत्रापि कथासाहित्यं विस्तृतं वर्तते। तत्र हि पञ्चतन्त्रं जगत्प्रसिद्धम्। अस्य च रचयिता विष्णुशर्मा। तद्-आधारेणैव नारायणपण्डितेन हितोपदेशः रचितः। अत्र तु मित्रलाभ-मित्रभेदः - सन्धिः-विग्रहाख्याः चत्वारः भागाः सन्ति। प्रकृते इयं,हितोपदेशे-मित्रलाभभागात् स्वीकृता चतुर्था कथा। अत्र हिर ण्यकस्य कथा वर्णिता। लघुपतनक-हिरण्यकौ स्नेहितौ भवत। तौ मिलित्वा मन्थरकस्य सकाशम् आगच्छतः। मन्थरकः लघुपतनक-हिरण्यकौ सत्करोति। अनन्तरं स्वस्थानं परित्यज्य लघुपतनकेन सह अत्र आत्मनः आग- मनस्य कारणं पृच्छति। हिरण्यकश्च तयोः स्वस्य वृत्तान्तं कथयति। एवम् अयं पाठ्यांशः। हिरण्यकवृत्तान्तस्य ख्यापकः भवति।

## ५.१.लक्ष्याणि

जीवनं हि एका कला। जीवनस्य हि लक्ष्यम् आनन्दः। तत्साधनाय जीवनम् अस्माभिः DESIGN करणीयम्। तस्य कृते बुद्धेः उपयोगः आवश्यकः भवति। मानवस्य जीवने केचन विषयाः कालवशात् परापतन्ति। केचन विषयाः स्वयं कृतानि भवन्ति। स्वयं कृतेषु अपि कानिचित् सुखदायकानि भवन्ति। कानिचित् दुःखदायकानि च भवन्ति। कानिचित् प्रशंसार्हाणि भवन्ति। अपराणि कानिचित् निन्द्यानि भवन्ति। मानवः सुख-दुःखयोः, निन्दा- प्रशंसयोः सर्वत्र समानमनस्कः भवेत्। समानमनस्कता मानवं तापत्रयात् मुक्तं करेति। मानवस्य आनन्दं च प्रसादयति। आनन्द-मयं च जीवनं मानवस्य आरोग्यम्, आयुष्यम्, अनुगृह्णाति। एतत्परम्परां प्रति अवगाहनां दातुम् उद्दिष्टः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन -

- भाषागतानां चतुर्णां श्रवण-पठन-भाषण-लेखनकौशलानां वर्धनं भवति।
- पाठ्यांशं सम्यक् पठति,पदकोशं वर्धयति,वाक्यरचनाकौशलं साधयति च।
- हिरण्यक(मूषिक)-मन्थरकयोः परस्परचर्चां श्रोतुं प्रभवति।
- हिरण्यक(मूषिकस्य)सुखमयं दुःखमयं च जीवनं पठितुं पारयति।
- धनस्य दुष्प्रभावं भाषितुं समर्थः भवति।
- सर्वं कार्य-कारणभावमूलकम् इति लिखितुं पारयति।
- अतिसञ्चयनस्य दुष्परिणामान् अवगन्तुं समर्थः भवति।
- सज्जनसाङ्गत्यस्य अभ्युदयकरत्वं प्रति लिखितुं समर्थः भवति।

## ५.२ कथायाः नेपथ्यम्

५.२.१अन्यत्र गमनाय काकस्य(लघुपतनकस्य) अभ्यर्थनम्

(मूलम्)एकदा लघुपतनकः हिरण्यकम् आह - 'सखे ! कष्टतर-लभ्य-आहारम् इदं स्थानं परित्यज्य स्थानान्तरं गन्तुम् इच्छामि।

(विवरणम्) काक-मूषिकयोः मैत्री भवति। अन्योन्य-सल्लापैः सरस-सम्भाषणैश्च कालं यापयतः। कदाचित् काकः लघुपतनकः 'हे मित्र ! अत्र आहारसमस्या तीव्रतरा वर्तते। कष्टेन अपि आहारं प्राप्तुं नैव शक्यते। इमं प्रदेशं त्यजामि। देशान्तरं गन्तुम् इच्छामि' इति वदति।

**५.२.२.पुनः आलोचनाय हिरण्यकस्य प्रार्थनम्**

हिरण्यकः ब्रूते - 'मित्र क्व गन्तव्यम् ? तथा च उक्तम् -

**चलति एकेन पादेन, तिष्ठति एकेन बुद्धिमान्।**
**न असमीक्ष्य परं स्थानं पूर्वम् आयतनं त्यजेत् ।। १०२ ।।**

वायसः ब्रूते-'अस्ति सुनिरूपितस्थानम्' । हिरण्यकः अवदत् -'किं तत्' । वायसः ब्रूते- 'अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः। तत्र चिरकाल-उपार्जितः प्रियसुहृत् मे मन्थराभिधानः कच्छपः धार्मिकः प्रतिवसति।

(विवरणम्)काकस्य वचनं श्रुत्वा मूषिकः- 'मित्र! कुत्र गन्तुम् इच्छसि ? पुनः पुनः स्थावरस्य चालनं न युक्तं भवति। बुद्धिमान् पुरुषः एकस्मिन् प्रदेशे एव चरति।एकस्मिन् (नीति)मार्गे एव चलति। एकस्मिन् एव वचसि तिष्ठति। गन्तुम् अभिलषितं प्रदेशं कियत् युक्तम्, कियत् अयुक्तम् इति युक्त-अयुक्तौ अविचार्य, पूर्वं स्थितं स्थानं नैव त्यजति इति सन्दिशति। 'मित्र! हिरण्यक!तथा न भवति। साधु विचार्य एव गन्तुमिच्छामि। सौकर्यकरःप्रदेशः कश्चित् अस्ति'इति काकः समादधाति।'सः प्रदेशः कः ? इति हिरण्यकः आसक्त्या पृच्छति 'मित्र!दण्डकारण्येषु किञ्चित् सरः अस्ति। तस्य कर्पूर गौरम् इति नाम वर्तते। तत्र, मम बाल्ये एव मैत्रीम् आप्तः कच्छपः निवसति। सः मम प्रियं मित्रम्। तस्य नाम मन्थरकः। सः धर्मजीवनः, क्रमशिक्षणयुतं जीवनं यापयति' इति, काकः, गन्तुम् अभिलषितं प्रदेशम् उद्दिश्य, हिरण्यकाय कथयति।

**५.२.२.१.मन्थरकस्य व्यक्तित्वम्**

(मूलम् )यतः -

**परोपदेशे पण्डित्यं, सर्वेषां सुकरं नृणाम्।**
**धर्मे स्वीयम् अनुष्ठानं, कस्यचित्तु महात्मनः ।। १०३ ।।**

सः च भोजनविशेषैः मां संवर्धयिष्यति।

(विवरणम्)किञ्च काकः स्वप्रियमित्रस्य मन्थरकस्य व्यक्तित्वम् उद्दिश्य हिरण्यकाय इतः अपि अधिकम् एवं कथयति। मित्र! सामान्यतया, सहजतया च मानवाः परेषाम्

उपदेशने पाण्डित्यं प्रदर्शयन्ति। ये धर्मं साक्षात् आचरणपर्यन्तं नयन्ति, तादृशाः महात्मानः विरलतया भवन्ति। तादृशेषु मम प्रियमित्रं मन्थरकः अन्यतमः अस्ति। यदि अहं तत्प्रदेशं गच्छामि, तत्र सः विशेषभोजननानि सम्पाद्य, मम समर्पयति। मम आहारसमस्यां निवारयति। तथा मां संवर्धयिष्यति - इति एवं वर्णयति।

५.२.३.हिरण्यकेन आत्मनः अपि आगमननिवेदनम्

(मूलम्)हिरण्यकः अपि आह- 'तत् किम् अत्र अवस्थाय मया कर्तव्यम्।

(विवरणम्)'मित्र!लघुपतनक!अहम् अत्र एकाकी कथं स्याम् ? मम अपि अयं प्रदेशः असौकर्यकरः एव वर्तते।

५.२.४. आवासस्थानम् एवं भवेत्

(मूलम्)यतः - **यस्मिन् देशे न संमानम्, न वृत्तिः, न च बान्धवः।**
**न च विद्यागमः कश्चित्, तं देशं परिवर्जयेत् ।। १०४ ।।**

अपरञ्च - **लोकयात्राऽभयं,लज्जा,दाक्षिण्यं,त्यागशीलता।**
**पञ्च यत्र न विद्यन्ते,न कुर्यात् तत्र संस्थितिम् ।।१०५ ।।**
**तत्र मित्र! न वस्तव्यं यत्र नास्ति चतुष्टयम् ।**
**ऋणदाता, च वैद्यश्च, श्रोत्रियः, सुजला नदी ।। १०६ ।।**

ततः माम् अपि तत्र नय' इति।

(विवरणम्)यस्मिन् प्रदेशे गौरवं न भवति, जीवनयापनाय उद्योगावकाशः न भवति, आपत्सु सान्त्वनाय बान्धवाः च न भवन्ति, यत्र विद्यासम्पादनाय कलाशालादयः उपायाश्च न भवन्ति, सः प्रदेशः अवश्यं वर्जनीयः एव भवति। यत्र १).जीवनायापनोपायाः (उद्योगावकाशाः) न भवन्ति २).भद्रता, रक्षणं च न भवति, ३).गौरव- अभिमानादीनि न भवन्ति, ४).परिजनेषु वात्सल्यं न भवति, ५).यत्र परस्परं दान-आदानादिकं प्रति औदार्यं (त्यागशीलता।) न प्रदर्शयन्ति, तत्र वासः नैव कर्तव्यः।

किञ्च १).यत्र ऋणं दातुं कोऽपि न भवति, २).यत्र चिकित्सां कर्तुं वैद्यः न भवति, ३).यत्र सकलेषु शास्त्रविषयेषु अवगाहनापरः विद्यासम्पन्नः पण्डितः न भवति, ४).यत्र पातुम् आरोग्यकरं नदीजलं न भवति, एवम् एतानि चत्वारि यत्र न भवन्ति तत्र न वस्तव्यम्। एवम् अयं प्रदेशः वस्तुम् अयोग्यः अस्ति। अतः अहम् अपि त्वया सह आगच्छामि, माम् अपि तत्र नयतु ' इति हिरण्यकः लघुपतनकं पृच्छति।

## ५.२.५.अभ्यागतस्य प्राशस्त्यम्

(मूलम्)अथ वायसः तत्र, तेन मित्रेण सह विचित्र-आलापैः सुखेन तस्य सरसः समीपं ययौ। ततः मन्थरः दूरात् अवलोक्य लघुपतनकस्य यथोचितम् आतिथ्यं विधाय मूषकस्य अतिथिसत्कारं चकार। यतः -

**बालः वा ,यदि वा वृद्धः, युवा वा, गृहम् आगतः।**
**तस्य पूजा विधातव्या, सर्वस्य अभ्यागतः गुरुः।। १०७ ।।**

**गुरुः अग्निः द्विजातीनाम्, वर्णानां ब्राह्मणो गुरुः।**
**पतिः एकः गुरुः स्त्रीणाम्, सर्वस्य अभ्यागतो गुरुः।। १०८ ।।**

(विवरणम्)अनुपदम् लघुपतनक-हिरण्यकौ सविनोदं सल्लपन्तौ मन्थरकस्य सरस्समीपं गच्छतः। सरसः समीपे मन्थरकः दूराद् एव लघुपतनक-हिरण्यकौ पश्यति। लघुपतनकं समुचितरीत्या स्वीकरोति (Receive)। हिरण्यकं च अतिथिम् इव सम्मानयति। तथा हि- बालः वा भवतु, वृद्धः वा भवतु, युवा वा भवतु, यदि गृहम् आगतः भवति, तस्य अवश्यं पूजा विधातव्या एव। कुत इति चेत्, गृहम् आगतः अभ्यागतः भवति। अभ्यागतः सर्वः अपि अतिथिरीपेण आगतः विष्णुः एव खलु। अतः अभ्यागतः सर्वेषां गुरुः, गौरवनीयः माननीयः च भवति। किञ्च ब्रह्मणानाम् अग्निः गुरुः भवति। ब्राह्मणेतराणां वर्णानां ब्राह्मणः गुरुः भवति। महिलानां पतिः गुरुः भवति। एवम् एकैकस्य एकैकः गुरुः विद्यते। परम् अतिथिरूपेण आगतः अभ्यागतः तु सर्वेषां गुरुः, अतः गौरवनीयः माननीयश्च भवति। अत एव मन्थरकः हिरण्यकं सत्करोति।

**स्वावलोकनप्रश्नाः**

१) कं देशं परिवर्जयेत् ?

२) कुत्र संस्थितिं न कुर्यात् ?

३) 'न वस्तव्यं यत्र नास्ति चतुष्टयम्'-तत् चतुष्टयं किम् ?

४) पतिः एकः कासां गुरुः भवति ?

### ५.२.६.हिरण्यकस्य परिचयः

(मूलम्)वायसः अवदत्-'सखे! मन्थर! सविशेषपूजाम् अस्मै विधेहि। यतः अयं पुण्यकर्मणा धुरीणः कारुण्यरत्नाकरः हिरण्यकनाम मूषिकराजः। एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेनापि सर्पराजः न कदाचित् कथयितुं समर्थः स्यात्, इति उक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान्।

(विवरणम्)लघुपतनकः आत्मना साकम् आगतं हिरण्यकं विशिष्य पूजयितुं मन्थरकाय सूचयति। मन्थरक ! अयं मन्थरकः विशेषपूजनाय अर्हः अस्ति। अयं पुण्यशीलः, पुण्यकर्माणि आचरति। दयासमुद्रः, सानुभूत्या सर्वेषां कष्टानि अपनुदति। अस्य च नाम हिरण्यकः। आदिशेषः जिह्वानां सहस्रद्वयेन अपि अस्य गुणान् कीर्तितुं समर्थः न भवति। तादृशः विशेषगुणसम्पन्नः अयम् इति चित्रग्रीवोपाख्यानं वर्णयति।

## ५.३. हिरण्यकवृत्तान्तम्

५.३.१.चूडाकर्णस्य वृत्तान्तम्

(मूलम्)मन्थरकः सादरं हिरण्यकं सम्पूज्य आह 'भद्र आत्मनः निर्जन-वनागमन-कारणम् आख्यतुम् अर्हसि ' इति। हिरण्यकः अवदत् 'कथयामि। श्रूयताम्- अस्ति 'चम्पक'अभिधानायां नगर्यां परिव्रजकावसथः। तत्र चूडाकर्णः नाम परिव्राट् प्रतिवसति। सः च भोजनावशिष्ट भिक्षान्नसहितं भिक्षापात्रं नागदन्तके अवस्थाप्य स्वपिति। अहं च तदन्नम् उत्प्लुत्य प्रत्यहं भक्षयामि। अनन्तरं तस्य प्रियसुहृत् वीणाकर्णः नाम परिव्राजकः समायातः। तेन सह कथाप्रसङ्गावस्थितः मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णः भूमिम् अताडयत्। वीणाकर्णः उवाच - 'सखे ! किमिति मम कथाविरक्तः, अन्यासक्तः भवान् '। चूडाकर्णेन उक्तम् -' मित्र! नाहं विरक्तः,किन्तु पश्य ! अयं मूषिकः मम अपकारी सदा पात्रस्थमन्नम् उत्प्लुत्य भक्षयति।

(विवरणम्)लघुपतनकेन यथा उक्तं तथैव मन्थरकः हिरण्यकं विशिष्य पूजयति। सः कदाचित् हिरण्यकं ' मित्र! किमर्थं भवान् सौकर्यकरं तं प्रदेशं परित्यज्य निर्मानुष्यंउ मनुष्यसञ्चारहीनम्, इदम् अरण्यमागतः असि। कारणं कथयतु ' इति पृच्छति। अनन्तरं हिरण्यकः निर्जनारण्यागमनाय कारणम् एवं कथयितुम् आरभते।चम्पकनगरे परिव्राजकानां मठः कश्चित् अस्ति। तत्र चूडाकर्णः नाम परिव्राट् प्रतिवसति। सः च प्रतिदिनं भोजनानन्तरं अवशिष्टम् अन्नं पात्रे निदधाति। तत् भिक्षान्नपात्रं नागदन्तके अवस्थापयति, स्वपिति। अनन्तरम् अहं (हिरण्यकः) तत्र उत्प्लुत्य प्रत्यहं तत्रत्यम् अन्नं भक्षयामि। एकदा चूडाकर्णस्य सुहृत् वीणाकर्णः आगच्छति। उभयोः कथाप्रसङ्गः प्रचलति। अन्यासक्तं चूडाकर्णं 'किमर्थं भवान् कथाश्रवणे अन्यमनस्कः भवसि 'इति पृच्छति।

चूडाकर्णः--'न अहं कथायाम् अन्यमनस्कः। अयं मूषिकः प्रत्यहम् उत्प्लुत्य पात्रस्थं भिक्षान्नं भक्षयति। तत् अहं पश्यामि'-इति वदति।

**स्वावलोकनप्रश्नाः**

१) चम्पकनगर्यां परिव्राट् कः ?

२) चूडाकर्णस्य सुहृत् कः ?

३) चूडाकर्णः भिक्षापात्रं कुत्र अवस्थपयति ?

४) मूषिकः किं करेति ?

५) चूडाकर्णः किमर्थं भूमिं ताडयति ?

**५.३.२.सर्वं कार्य-कारणभावमूलकम्**

(मूलम्) 'कथं मूषिकः स्वल्पबलः अपि एतावत् दूरम् उत्पतति। तदत्र केन अपि कारणेन भवितव्यम्' इति वीणाकर्णः चिन्तयति। तथा च उक्तम् –

**अकस्मात् युवती वृद्धं, केशेषु आकृष्य चुम्बति।**
**पतिं निर्दयम् आलिङ्ग्य, हेतुः अत्र भविष्यति ।। २०९ ।।**

चूडाकर्णः पृच्छति – कथम् एतत्। वीणाकर्णः कथयति –

(विवरणम्)वीणाकर्णः नागदन्तकं पश्यति।'मूषिकः क्षुद्रःउ बलहीनः, अपि एतावत् दूरं कथं उत्पतति। अत्र अवश्यं किमपि कारणं भवति। कारणं विना मूषिकः एतत् दूरम् उत्प्लवितुं समर्थः भवति। जगत् सर्वं कार्य- कारण-पुरस्सरम् एव प्रचलति। कुतः इति चेत् कदाचित् युवती भार्या अकस्मात् वृद्धं स्वपतिं केशेषु आकर्षति। चुम्बति। सरभसम् आलिङ्गति। अकस्मात् युवती भार्या किमर्थं वृद्धं स्वपतिं तथा करोति। तत्र अपि किञ्चित् कारणं अस्ति ' इति वीणाकर्णः कथयति। चूडाकर्णः वृद्धपतेः वृत्तान्तं ज्ञातुम् इच्छुः भवति। वीणाकर्णः च वृद्धपतेः कथां एवं श्रावयति।

**५.३.३.चन्दनदासः - लीलावत्योः वृत्तान्तम्**

गौडदेशे कौशाम्बी नाम नगरी अस्ति । तस्यां कश्चित् वणिक् निवसति । तस्य नाम चन्दनदासः । सः महाधनः वृद्धः च। परम् अतिकामुकः । धनदर्पात् लीलावतीं नाम्नीं कन्यां विवाहं करोति। सा यौवनवती। तस्याः सन्तोषय सः समर्थः न भवति। चन्दनदासः तु भार्यायाम् अधिकम् अनुरागं वहति। लीलावती तु यौवनदर्पात् कुलमर्यादाम् अतिक्रामति। केनापि अपरेण वणिक् पुत्रेण व्यभिचरति।

एकदा लीलावती पर्यङ्के स्वप्रियेण वणिक्पुत्रेण सह विस्रम्भालापं कुर्वती आस्ते। अत्रान्तरे पतिः चन्दन- दासः आगच्छति।अकस्मात् उपस्थितं पतिं पश्यति,सहसा सा उत्तिष्ठति। केशेषु आकृर्षति, पतिं गाढमालिङ्गति, चुम्बति च। एतस्मिन् अवसरे जारः पलायितः भवति।

तस्याः अलिङ्गनं दृष्ट्वा समीपवर्तिनी कुट्टिनी 'कुतः अकस्मात् इयम् एनम् अद्य एवम् आलि- ङ्गितवती' अत्र अवश्यं किमपि कारणं भवति, इति चिन्तयति। पश्चात् तस्य कारणम् अवगच्छति। कुट्टिनी रहसि लीलावतीं दण्डयति च। लीलावती जारस्य पलायनार्थं वृद्धपतिं सरभसं केशेषु गृह्णाति। सरभसम् आलिङ्गति। पत्युः ग्रहणे, चुम्बने, आलिङ्गने च जारस्य पलायनं कारणम्। एवम् एव मूषिकस्य उत्प्लवने अपि किञ्चित् कारणं भविष्यति वीणाकर्णः च चन्दनदासस्य कथां श्रावयति।

**५.३.४.हिरणयकस्य उत्प्लवने धनस्य प्रभावः**

(मूलम्) मूषिकबलोपष्टम्भेन केन अपि कारणेन अत्र भवितव्यम्। क्षणं विचिन्त्य परिव्राजकेन उक्तम् – 'कारणं च अत्र धनबाहुल्यम् एव भविष्यति। यतः –

**धनावान् बलवान्, लोके सर्वः सर्वत्र सर्वदा।**
**प्रभुत्वं धनमूलं हि, राज्ञाम् अपि उपजायते ।। १२३ ।।**

ततः खनित्रम् आदाय, तेन विवरं खनित्वा, चिरसञ्चितं मम धनं गृहीतम्। ततः प्रभृति निजशक्तिहीनः सत्व-उत्साहरहितः स्वाहारम् अपि उत्पादयितुम् अक्षमः सत्रासं मन्दं मन्दम् उपसर्पन् चूडाकर्णेन अवलोकितः। ततः तेन उक्तम् -

**धनेन बलवान् लोके,धनात् भवति पण्डितः।**
**पश्य एनं मूषिकं पापम्,स्वजातिसमतां गतम्।। १२४।।**

किञ्च -

**अर्थेन तु विहीनस्य, पुरुषस्य अल्पमेधसः।**
**क्रियाः सर्वाः विनश्यन्ति, ग्रीष्मे कुसरितो यथा।। १२५।।**

अपरञ्च -

**यस्य अर्थाः तस्य मित्राणि, यस्य अर्थाः तस्य बान्धवाः।**
**यस्य अर्थः सः पुमान् लेके यस्य अर्थाः सः हि पण्डितः। १२६।**

अन्यत् च -

**अपुत्रस्य गृहं शून्यम्,सन्मित्ररहितस्य च।**
**मूर्खस्य च दिशः शून्याः,सर्वशून्या दरिद्रता ।। १२७ ।।**

अपि च -

**दारिद्र्यात् मरणात् वापि दारिद्र्यम् अवरं स्मृतम्।**
**अल्पक्लेशेन मरणम्, दारिद्र्यम् अतिदुस्सहम्।।१२८ ।।**

अपरञ्च -

**तानि इन्द्रियाणि अविकलानि तदेव नाम,**
**सा बुद्धिः अप्रतिहता वचनं तदेव ।**
**अर्थोष्मणा विरहितः पुरुषः सः एव,**
**अन्यः क्षणेन भवति इति विचित्रम् एतत् ।। १२९ ।।**

(विवरणम्)उत्प्लवने मूषिकस्य बलदायकं किमपि कारणम् अत्र किञ्चित् अस्ति वीणाकर्णः क्षणं चिन्तयति। 'धनबाहुल्यम् एव मूषिकस्य उत्प्लवने कारणं भविष्यति। यतः हि, लोके यस्य धनं अस्ति सः एव सर्वत्र सर्वदा बलवान् भवति। राज्ञाम् अपि धनस्य, मूलतः (कारणतः) एव खलु आधिपत्यम् (प्रभुत्वम्) अपि लभ्यते' इति चूडाकर्णं वदति। अनन्तरं खनित्रम् आददाति। तेन विवरं खनति। चिरकालात् सञ्चितं मम (हिरण्यकस्य) धनराशिं गृह्णाति। ततः प्रभृति अहं शक्तिहीनः दुर्बलः जातः। सत्वेन हीनः सन् निष्क्रियः च सञ्जातः। उत्साहेन च रहितः सन् निर्वीर्यः सम्पन्नः। आहारम् अपि सम्पादयितुम् असमर्थः अस्मि। कथं जीवेयम् इति भीत्या मन्दं मन्दं उपसर्पन् अस्मि।तदा चूडाकर्णः मां (हिरण्यकम्) पश्यति। धनेन हीनं मां दृष्ट्वा परिहसति। तथा हि- लोके प्राणिनः धनेन

बलवन्तः भवन्ति। धनप्रभावेणैव पण्डितः इति व्यवहृतः अपि भवति। अतः एव धनराशेः नाशेन मूषिकः दैन्यं प्राप्य अल्पत्वम् अनुभवति, पश्यतु, इति मां (हिरण्यकम्) परिहसति। किञ्च, अर्थेन विहीनः,नाम धनम् आर्जयितुम् वा, संरक्षितुं वा अशक्तः पुरुषः। तथा च धनसम्पादनाय वा, धनसंरक्षणाय वा आवश्यकी बुद्धिः यस्य नास्ति तादृशस्य अल्पमेधसःउ धनहीनस्यउ अविवेकिनः, पुरुषस्य सर्वाणि अपि कर्माणि ग्रीष्म-ऋतौ कुल्याः (अल्पप्रवाहाः) इव नाशम् एष्यन्ति।

अपरञ्च,यस्य, अर्थाःउ धनानि, भवन्ति तस्य एव मित्राणि अपि भवन्ति। यस्य, अर्थाःउ धनानि, भवन्ति तस्य एव बान्धवाः अपि वर्तन्ते।यस्य,अर्थाःउ धनानि, भवन्ति सः एव पुरुषः इति च व्यवह्रियते। यस्य,अर्थाःउ धनानि, भवन्ति सः एव पण्डितः अपि भवति।

अन्यत् च,यस्य पुत्राः न भवन्ति, तस्य गृहं शून्यम् अवभासते। यस्य सन्मित्राणि न भवन्ति, तस्य अपि गृहं शून्यम् इव भासते। यस्य बुद्धिः प्रसरणशीलतां त्यजति सः मूर्खः भवति। तादृशस्य मूर्खस्य सर्वाः दिशः शून्याः भासन्ते।एवम् एव यस्य धनं न विद्यते तं जनाः दरिद्रः इति व्यवहरन्ति। तादृशस्य दरिद्रस्य गृहं शून्यं भवति। दिशश्च शून्याः भवन्ति। सर्वम् अपि शून्यं भवति।

अपि च,दारिद्र्यं नीचमेव।तथैव मरणमपि नीचमेव। परं दारिद्र्य-मरणयोः मध्ये दारिद्र्यं नीचातिनीचं स्मृतम् अस्ति। यतः हि मरणम् अल्पक्लेशेन अथवा विना आयासेन वा अधिगन्तुं शक्यम्। दारिद्र्यं तु दुर्भरम् अतिदुस्सहं च।

अपि च, वैकल्यरहितानि तानि एव इन्द्रियाणि, व्यवहाराय क्रियमाणः शब्दप्रयोगः अपि सः एव। अप्रतिहता बुद्धिः अपि सा एव। अर्थस्य ऊष्मणा विरहितः पुरुषः अपि सः एव। तादृशः पुरुषः केवलं धनस्य अभावेन क्षणकाले एव अन्यःउ अन्यादृशः प्रभावहीनः दरिद्रः भवति इति महत् आश्चर्यं जनयति खलु। एवं चूडाकर्णः बहुधा मां परिहसति।

**स्वावलोकनप्रश्नाः**

१) मित्राणि कस्य भवन्ति ?

२) सर्वशून्या का ?

३) अतिदुस्सहं किम् ?

४) मतिमान् कान् न प्रकाशयेत् ?

**५.३.५.मतिमतः अप्रकाश्यानि**

(मूलम्)तत् सर्वम् आकर्ण्य मया आलोचितम् - मम अत्र अवस्थानम् अयुक्तम् इदानीम्। यत् च अन्यस्मै एतत् वृत्तान्तकथनं तदपि अनुचितम् । यतः -

**अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।**
**वञ्चनं च अपमानञ्च मतिमान् न प्रकाशयेत् ।। १३० ।।**

अपि च -

**आयुः वित्तं गृहच्छिद्रं मन्त्र-मैथुन-भेषजम्।**
**तपो-दान-अपमानं च नव गोप्यानि यत्नतः ।। १३१ ।।**

तथा च उक्तम् -

**अत्यन्तविमुखे दैवे,व्यर्थे यत्ने च पौरुषे।**
**मनस्विनो दरिद्रस्य वनात् अन्यत् कुतः सुखम्।। १३२ ।।**

(विवरणम्) परिहासपूर्क चूडाकर्णेन उक्तं तत् सर्वम् अहं श्रुतवान्। मम (हिरण्यकस्य) अत्र अवस्थानम् इदानीम् अयुक्तम्,एतत् मम वृत्तान्तस्य अन्यस्मै कथनम् अपि अनुचितम् इत्यपि चिन्तितवान्। यतः हि -मतिमान् अ).धनस्य नाशम्, इ).मनसः तापम्, उ).गृहे प्रवर्तमानानि दुष्टानि कर्माणि, ऋ).वञ्चनम्, लृ).अवमानम्, एतानि पञ्च न प्रकाशयति।

अपि च, मतिमता अ).आयुः, इ).वित्तम्, उ).गृहच्छिद्रम्, ऋ).मन्त्रम्, लृ).मैथुनम्, ए).भेषजम्, ओ).तपः, ऐ).दानम्, औ).अपमानम्, एतानि नव यत्नतः गोप्यानि भवन्ति।

अत एव, यस्य दैवं प्रतिकूलतया वर्तते, यस्य च पुरुषप्रयत्नः विफलः भवति, तादृशस्य अभिमानशालिनः दरिद्रस्य वनं विहाय,कुत्र सुखं लभ्यते।प्रशान्तजीवनाय वनगमनादृते अन्यः उपायः नास्ति इति कथयन्ति खलु।

**५.३.६.मनस्विनः स्वभावः**

(मूलम्)अन्यत् च -

**मनस्वी म्रियते कामम्,कार्पण्यं तु न गच्छति।**
**अपि निर्वाणम् आयाति,न अनलो याति शीतताम्।। १३३ ।।**

किञ्च -

**कुसुमस्तबकस्येव द्वे वृत्ती तु मनस्विनः।**
**सर्वेषां मूर्ध्नि वा तिष्ठेत्, शीर्यते वने अथवा ।। १३४ ।।**

(विवरणम्)अयम् अपरः विषयः अवगन्तव्यः अस्ति। मनस्वी नाम अभिमानशीली। अभिमानशीली यदि दरिद्रः भवति, तर्हि तस्य दुरवस्था अनिर्वर्णनीया भवति। मनस्वी जीवितं त्यक्तुम् अपि सिद्धः भवति, परं कदाचित् अपि दैन्यं (दारिद्र्यम्) न प्राप्नोति। तथा हि- अनलः नाम अग्निः, सः, यदि अवसरः तदा निर्वाणम् अपि आयाति। परं (अग्नौ) जीवति सति, शीततां तु न गच्छति खलु।

किञ्च ,कुसुमस्तबकः नाम पुष्पाणां गुच्छम्। पुष्पाणां गुच्छस्य द्वे विधाने स्तः। सर्वेषां शिरसाम् अधिरोहणम् एकं विधानम्, यस्य कस्यापि दृष्टौ अपतित्वा वने एव शीरणं द्वितीयं विधानम्। अभिमानशाली अपि कुसुमस्तबकस्य इव सर्वेषां मूर्ध्नि वा तिष्ठति। सर्वेषां समादरणीयः भवति। सर्वैः प्रशंस्यः भवति। लब्धप्रतिष्ठः भवति। अथवा यस्य कस्यापि दृष्टौ अपतित्वा एव,येन केनापि अलक्षितः एव,बहिः अनागत्यैव,प्रतिष्ठाम् अलब्ध्वा एव जीवितं त्यजति। अभिमानशाली तु दरिद्रः मा भवतु।

५.३.७.दारिद्र्यस्य दुष्प्रभावः

(मूलम् )यत् च अत्रैव याच्नया जीवनं तत् अतीव गर्हितम् । यतः -

वरं विभवहीनेन प्राणैः, सन्तर्पितः अनलः।
**नोपचारपरिभ्रष्टः, कृपणः प्रार्थितः जनः।। १३५ ।।**
**दारिद्र्यात् ह्रियम् एति, ह्रीः परिगतः सत्त्वात् परिभ्रश्यते,**
**निस्सत्त्वः परिभूयते,परिभवात् निर्वेदम् आपद्यते।**
**निर्विण्णःशुचम् एति,शोकनिहतःबुद्ध्या परित्यज्यते,**
**निर्बुद्धिः क्षयम् एति,अहो निधनता सर्वापदाम् आस्पदम्।।१३६ ।।**

किञ्च -

**वरं मौनं कार्यम्, न च वचनम् उक्तं यत् अनृतं ,**
**वरं क्लैब्यं पुंसाम्, न च परकलत्राभिगमनम् ।**
**वरं प्राणत्यागः, न च पिशुनवाक्येषु अभिरुचिः,**
**वरं भिक्षाशित्वम्, न च परधनास्वादनसुखम् ।। १३७ ।।**
**वरं शून्या शाला, न च खलु वरः दृष्टवृषभः,**
**वरं वेश्या पत्नी, न पुनः अविनीता कुलवधूः।**
**वरं वासः अरण्ये ,न पुनः अविवेकाधिपपुरे,**
**वरं प्राणत्यगः, न पुनः अधमानाम् उपगमः ।। १३८ ।।**

(विवरणम्)अथवा अत्र एव भिक्षां कृत्वा जीवितुम् अपि सिद्धः अस्मि। परं तद् अपि निन्द्यम् एव सम्पन्नम्। यतः हि - धनेन विना जीवनापेक्षया अग्निषु आहुतिः वरं भवति। दारिद्र्यकारणतः लज्जितः भवति। लज्जया आत्मनः बलं, आत्मनि विश्वासश्च क्षीयते। आत्मनि विश्वासहीनः पुरुषः निस्सत्त्वः सन् सर्वैः तिरस्क्रियते। परिभवः नाम तिरस्कृतिः अथवा अवमानं वा भवति। अवमानात् निर्वेदम्उनिरुत्साहं प्राप्नोति। निरुत्साहेन शोकम् अनुभवति। शोकेन बुद्धिः विकला भवति। बुद्धिहीनः सम्पद्यते। बुद्धिहीनः विवेकभ्रष्टः भवति। तेन जीवितं नाशयति। मानवस्य जन्म लब्ध्वा, किमपि असाधित्वा एव जीवितात् विरमते। एवं निर्धनता नाम धनस्य अभावः, नाम दरिद्रता सर्वासाम् आपदां निलयं भवति।

किञ्च, अनृतं नाम असत्यम्, तस्य कथनापेक्षया मौनेन अवस्थानं मानवस्य श्रेयस्करं भवति। परेषां कलत्राणि अभिगन्तुम् या इच्छा अस्ति तदपेक्षया पुरुषाणां नपुंसकत्वेन जन्म क्षेमदायकं भवति। पिशुनता नाम लुब्धता, तस्य प्रसङ्गे अभिरुचि-अपेक्षया प्राणत्यागः पुरुषस्य पुण्यप्रदः भवति। परेषां धनैः सुखस्य अनुभवः, तदपेक्षया भिक्षां कृत्वा अशनं जीवने बाध्यतां शिक्षयति। अहंङ्कारनिरासाय , विवेकवर्धनाय च उपकुरुते। दुष्टैः वृषभैः पूरणापेक्षया शून्या गोशाला वृथा व्ययम् अपनुदति। अविनीतायाः कुलवध्वाः अपेक्षया वेश्या पत्नी सम्मानार्हा भवति। अविवेकप्रतिष्ठिते प्रदेशे निवासापेक्षया अरण्ये वासः मनसः प्रशान्ततां ददाति। अधमानां समीपं गत्वा तेषां सहायस्य अभ्यर्थनापेक्षया प्राणत्यगः प्रतिष्ठाकरः भवति।

**५.३.८.अर्थितायाः दुर्भरता**

(मूलम्)अपि च -

**सेवा इव मानम् अखिलं, ज्योत्स्ना इव तमः,जरा इव लावण्यम् ।**
**हरिहरकथा इव दुरितं, गुणशतम् अपि अर्थिता हरति ।। १३९ ।।**

इति विमृश्य, तत् किम् अहं परपिण्डेन आत्मानं पोषयामि, कष्टं भोः,तत् अपि द्वितीयं मृत्युद्वारम्।यतः -

**पल्लवग्राहि पाण्डित्यम्,क्रयक्रीतञ्च मैथुनम्।**
**भोजनञ्च पराधीनं तिस्रः पुंसां विडम्बनाः।। १४० ।।**

अपरञ्च -

**रोगी,चिरप्रवासी, परान्नभोजी, परावसथशायी।**
**यः जीवति तत् मरणं यत् मरणं सः अस्य विश्रामः।। १४१।।**

इति आलोच्य अपि, लोभात् पुनः अर्थं ग्रहीतुं प्रयत्नम् अकरवम् ।

(विवरणम्)सेवाउदास्यम्, अखिलं मानम्उसमस्तं गौरवं हरति। ज्योत्स्नाउ चन्द्रप्रकाशः, तमःउ अन्धकारं हरति। जराउ वृद्धाप्यम्, लावण्यम्उ सौन्दर्यं हरति। हरिहरकथाउ विष्णुकथा,शिवकथा च दुरितम्उ पापं हरति। तथा अर्थिताउ याचनावृत्तिः गुणशतम्उएतादृशान् शतगुणान् अपि,हरतिउ नाशयति, इति अहं विमृष्टवान् अस्मि। ततः ,परेषाम् अन्नस्य भोजनेन जीवनं यापयितुम् अपि सिद्धः भवामि। परेषाम् अन्नेन भोजनम् अपि कष्टं भवति। तत् द्वितीयं मृत्युद्वारं भवति। तथा हि- अ).पल्लवानां ग्रहणायउ चयनाय अपेक्षितम्, पाण्डित्यम्उ नैपुण्यम्, इ).क्रयक्रीतम्उ क्रेतुं योग्येन वस्तुना क्रीतम्, मैथुनम्उ सम्भोगः, उ). पराधीनं भोजनम्उ परेषाम् अधीने स्थित्वा भोजनस्य स्वीकरणम् एताः तिस्रः पुंसां गौरवहीनाय भवन्ति।

अपि च, अ).व्याधिग्रस्तः, इ).प्रयाणव्याजेन परत्र बहुकालं यापयन् पुरुषः, उ).परेषाम् अन्नस्य भोजनेन यः जीवनं यापयति सः, ऋ).परेषां गृहप्राङ्गनेषु शयितुम् इच्छति सः,एते चत्वारः विद्यन्ते। एतेषां चतुर्णां जीवनं यत् विद्यते, तत् जीवनं तेषां मरणम्

एव भवति। एतेषां चतुर्णां मरणं यत् विद्यते, तत् मरणं तेषां विश्रान्तिस्थानं सुखप्रदं च भवति, इति च आलोचितवान्। यथाकथञ्चित् धनस्य आर्जनम् एव श्रेयस्करम् इतिचिन्तितवान्। पुनः लोभात् धनस्य सम्पादनाय एव प्रयतितवान् अस्मि।

**५.३.९.लोभस्य पर्यवसानम्**

(मूलम्)यथा च उक्तम् -

लोभेन बुद्धिः चलति, लोभः जनयते तृषाम्।
तृषार्तः दुःखम् आप्नोति,परत्र इह च मानवः।। १४२ ।।

ततः अहं मन्दं मन्दम् उपसर्पन् तेन वीणाकर्णेन जर्जरवंशखण्डेन ताडितश्च,अचिन्तयम् –

(विवरणम्) लोभस्य पर्यवसानानि अपि विपरीतानि एव भवन्ति। तथा हि- लोभेनउ आशया,बुद्धिःउ विवेकः, चलतिउ भ्रष्टा भवति। लोभःउ आशा, तृषाम्उ इच्छानां परम्पराम्, जनयतेउ सृजति। तृषार्तः = इच्छानां परम्परया पीडितः जनः, अस्मिन् लोके, परलोके च, दुःखम्= कष्टम्, शोकं च, आप्नोतिउ अनुभवति, इति एवम् आलोचनां कुर्वन् अस्मि। मन्दं मन्दम् उपसरन् च अस्मि। तदा वीणाकर्णः मां पश्यति। जर्जरवंशखण्डं गृह्णाति। मां ताडयति च। तदा अहम् एवं चिन्तितवान्।

**स्वावलोकनप्रश्नाः**

१) .यत्नतः गोप्यानि कति ? तानि कानि ?

२) .सर्वापदाम् आस्पदं किम् ?

३) .जरा कं हरति ?

४). का गुणशतं हरति ?

५) बुद्धिः केन चलति ?

५.३.१०.तृप्तेः प्राशस्त्यम्

(मूलम्) **धनलुब्धः ह्यसन्तुष्टः नियतात्मा अजितेन्द्रियः।**
**सर्वाः एव आपदः तस्य, यस्य तुष्टं न मानसम्।। १४३ ।।**

तथा च -

**सर्वाः सम्पत्तयः तस्य सन्तुष्टं यस्य मानसम्।**
**उपानद्गूढपादस्य ननु चर्मावृता एव भूः।। १४४ ।।**

(विवरणम्) वीणाकर्णेन ताडितः हिरण्यकः एवं चिन्तयति। इमौ श्लोकौ तृप्तेः

प्राशस्त्यं वर्णयतः। इमौ श्लोकौ तृप्तेः प्राशस्त्यं वर्णयतः। तथा हि- आशया यः धनं सम्पादयितुम् इच्छति सः, असन्तृप्त्या यः धनं सम्पादयितुम् इच्छति सः,यः आत्मानं नियन्त्रयति सः,यः इन्द्रियाणि न जयतिउन वशे करोति, सः, यस्य मानसम् नैव तुष्टं भवति सः, एते पञ्च जनाः, सर्वाः आपदः एव प्राप्नुवन्ति। सर्वदा शोकम् एव अनुभवन्ति। एवम् एव पूर्वोक्तस्य व्यतिरेकतया, यस्य मनः सर्वदा सन्तृप्तिं, सन्तोषं वा अनुभवति, तस्य सर्वाः सम्पत्तयः एव भवन्ति। तथाहि- पादौ सकलस्य शरीरभारस्य वाहकौ भवतः। तादृशयोः पादयोः रक्षणं केवलं चर्मणा कृताभ्यां पाद - रक्षाभ्याम् एव क्रियते। तावतैव तृप्तस्सन् पादयोः पदं शरीरस्य आरोग्यं ददाति।

अपरञ्च

**सन्तोष-अमृत-तृप्तानांयत् सुखं शान्तचेतसाम्।**
**कुतः तत् धनलुब्धानाम् इतश्चेतश्च धावताम्।।**

अपि च-

**तेन अधीतं,श्रुतं तेन, तेन सर्वम् अनुष्ठितम्।**
**येन आशाः पृष्ठतः कृत्वा,नैराश्यम् अवलम्बितम् ।।१४६।।**

(विवरणम्) किञ्च सन्तोषः अमृतेन समानः भवति। तेन सन्तोषामृतेन तृप्ताः प्रशान्तमनस्काः भवन्ति। तादृशैः यत् सुखम् अनुभूयते, तत् सुखम् इतः ततः धावतां धनलुब्धानां कुतः भवति ? कथं भवति ? किञ्च -यः आशाः जहाति, यः नैराश्यम् अवलम्बते, सः एव अध्यायी भवति, सः एव शास्त्रवेत्ता भवति, सः एव आचरण-आत्मकज्ञानवान् भवति।

(मूलम्)अपि च-

**असेवितेश्वरद्वारम् अदृष्टविरहव्यथाम्।**
**अनुक्तक्लीबवचनं धन्यं कस्यापि जीवनम् ।। १४७ ।।**

यतः -

**न योजनशतं दूरम् , वाह्यमानस्य तृष्णया ।**
**सन्तुष्टस्य करप्राप्ते अपि अर्थे भवति नादरः ।। १४८ ।।**

(विवरणम्) किञ्च यः ईश्वरस्यउ प्रभोःउ अधिकारिणः गृहं , कार्य सम्पादनाय न प्रविशति, यः प्रियायाः वियोगबाधां न अनुभवति,क्लीबसम्बन्धिवचः न वदति, तादृशस्य कस्य वा जीवनं धन्यं न भवति ? तृष्णया वाह्यमानस्य योजनशतम् अपि दूरम् न भवति।असन्तुष्टस्य करप्राप्तेउहस्तगते, अपि अर्थे उ वस्तुनि वा, धने वा आदरः न भवति।

**५.३.११.परिच्छेदस्य(विवेकस्य)प्राशस्त्यम्**

(मूलम्) तत् अत्र अवस्था-उचितकार्य-परिच्छेदः श्रेयान् ।

**कः धर्मः ? भूतदया,किं सौख्यम् ? अरोगिता जगति जन्तोः।**
**कः स्नेहः ?सद्भावः,किं पाण्डित्यम् ?परिच्छेदः।। १४९।।**

तथा च -

**परिच्छेदः हि पाण्डित्यं यदा आपन्नाः विपत्तयः।**
**अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे।। १५० ।।**
**त्यजेत् एकं कुलस्य अर्थे,ग्रामस्य अर्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्य अर्थे,स्वात्मार्थे पृथिवीं त्यजेत्। १५१**

(विवरणम्)तत्उतस्मात् कारणात् , अत्र = एतादृशेषु सन्दर्भेषु,समयानुकूलं विचिन्त्य, समुचितः कार्य- अकार्यनिर्णयःउविवेकः,एव श्रेयसम् आरचयति।अयमेव अंशः प्रश्न-उत्तरपूर्वकेन अनेन पद्येन सूचयति। धर्मः कः ? इति प्रश्नः। भूतदयाउजीवकारुण्यम्, अहिंसा प्रशस्तः धर्मः इति समाधानस्य आशयः। सौख्यं किम् ? सुखकरं, सुखप्रदं च वस्तु वा, विषयः वा कः ? इति प्रश्नस्य आशयः। जगतिउ लोके, जन्तोः उमानवस्य, अरोगिताउ आरोग्यं सुखं जनयति इति समाधानस्य तात्पर्यं भवति। स्नेहः कः ? लोके मानवस्य बुद्ध्या स्निह्यमानःउ चिन्तनेन सङ्गम् आनीयमानः पदार्थः कः ? इति प्रश्नस्य आशयः। लोके मानवस्य, बुद्ध्या स्निह्यमानः पदार्थः सद्भावः = सदालोचनम्,
इति समाधानस्य भावः। लोके मानवस्य प्रज्ञायाःउ पाण्डित्यस्य, मानं किम् ? इति प्रश्नस्य आशयः। लोके मानवस्य प्रज्ञायाः मानं, परिच्छेदः = विवेकः, विषयविश्लेषणसामर्थ्यं भवति इति समा- धानस्य आशयः भवति।किञ्च, परिच्छेदः = विवेकः, विषयविश्लेषणसामर्थ्यम् एव पाण्डित्यं भवति। तत्पाण्डित्यं मानवं विपदः तारयति। अपरिच्छेदकर्तॄणाम्उ अविवेकिनाम्उ अनिमृश्य कार्यकारिणां पदे पदे विपदः भवन्ति। कुलस्य निमित्तम् यत्किञ्चित् एकं त्यजेत्, ग्रामस्य निमित्तम् कुलं त्यजेत्। जनपदस्यउ ग्रामसमुदायस्य निमित्तं ग्रामं त्यजेत्, स्वस्य निमित्तं पृथिवीं त्यजेत्। एवं सर्वम् अपि त्यक्त्वा आत्मोद्धरणं कर्तव्यम् इति भावः।

**स्वावलोकनप्रश्नाः**

१) केन सर्वम् अनुष्ठितं भवति ?

२) सौख्यं किम् ?

३) पाण्डित्यं किम् ?

४) कस्य अर्थे पृथिवीं त्यजेत् ?

(मूलम्) अपरञ्च-

**पानीयं वा निरायासम्, स्वादु अन्नं मा भयोत्तरम्।**
**विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ।। १५२ ।।**

इति आलोच्य अहं निर्जनवनम् आगतः । यतः -

**वरं वनं व्याघ्र-गजेन्द्र-सेवितम्, द्रुमालयम्, पक्व-फल-अम्बु-भोजनम्।**
**तृणानि शय्या, परिधानवल्कलम्, न बन्धुमध्ये धनहीनजीवनम् ।। १५३ ।।**

ततः अस्मत् पुण्योदयात् अनेन मित्रेण अहं स्नेहानुवृत्त्या अनुगृहीतः।अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्गः एव मया प्राप्तः । यतः -

**संसारविषवृक्षस्य द्वे एव रसवत्फले।**
**काव्यामृतरस-आस्वादः, सङ्गमः सुजनैः सह ।। १५४ ।।**

(विवरणम्)अपि च - आयासेन विना प्राप्यं जलम्, भयापहंउपश्चात् भयशङ्कारहितम्, स्वादु उ रुचिकरं भोजनं च, यत्र लभ्यते, सः प्रदेशः, आनन्ददायकः भवति।आनन्ददायकं तं प्रदेशं विचिनोमि इति आलोच्य जनरहितं वनप्रदेशम् आगतवान् अस्मि। तथा हि- अस्मिन् वने व्याघ्राः सन्ति। गजेन्द्राश्च वर्तन्ते। तस्मात् मार्जालादिभ्यः तत्र भयं न विद्यते। द्रुमाः सन्ति। ते आहारार्थं पक्व-फलानि ददाति। पातुं निर्मलं जलं ददाति। मृदुतृणानि शय्या भवति। वल्कलं परिधानं उ वस्त्रं, भवति। किञ्च अत्र बन्धूनां मध्ये धनहीनजीवनं यापयामि इति चिन्तनम् अपि न भवति। ततः अपि अधिकतया, मम अदृष्टवशात् भवादृशस्य स्नेहम् अपि प्राप्तः अस्मि। सः च पुण्यवशात् स्वर्गतुल्यं वर्तते। तथाहि- संसारः कश्चन विषवृक्षः। तस्यापि विषवृक्षस्य, द्वे रसवत्फले फले भवतः। तयोः काव्यामृतरस-आस्वादः एकः, सुजनैः सह सङ्गमः द्वितीयः, खलु इति हिरण्यकः साधुसङ्गतिं प्रशंसति।

५.३.१२. धर्मजीवनम् आवश्यकम्

(मूलम्)मन्थरः उवाच -

**अर्थाः पादरजोपमाः, गिरिनदी-वेगोपमं यौवनम्,**
**आयुष्यं जललोलबिन्दुचपलम्,फेनोपमं जीवितम्।**
**धर्मं यः न करोति निन्दितमतिः स्वर्गार्गलोद्घाटनम्,**
**पश्चात् तापयुतःजरापरिगतः शोकाग्निना दह्यते।१५५ ।**

(विवरणम्)मन्थरकः हिरण्यकस्य वचः शृणोति। धार्मिकजीवनस्य आवश्यकतम्,पुण्यसम्पादनस्य महिमानं च एवं ख्यापयति। तथाहि - जीविते सम्पदः पादरजसः तुल्याः। प्रक्षालनात् पादरजः अपनुदति। एवं व्ययकरणेन सम्पदः अपि गच्छन्ति,नश्यन्ति। यौवनम्,गिरेः नदीनां वेगस्य समानम्। गिरेः नदीनां प्रवाहः वर्षर्तौ एव उद्धृतः भवति, तात्कालिकः इत्यर्थः। एवं यौवनस्य मदोद्धतिः अपि तात्कालिकी एव। आयुष्यं जलबिन्दुः इव चपलं भवति। अनिश्चितिकरम् इत्यर्थः। फेनस्य इव जीवितस्य

वृथा उद्गमनम् अधिकम्। एवं स्थिते,यः निन्दितमतिः सन्, स्वर्गस्य प्रापकं धर्मं न आचरति, सः पश्चात् वार्धक्यं प्राप्य, तापयुतः भवति। शोकाग्निना दह्यते च। अतः धर्म जीवनम्, पुण्यसम्पादनं च आवश्यकम् इति मन्थरकः कथयति।

५.३.१३. उपार्जितानां वित्तानां , त्यागः एव हि रक्षणम्

(मूलम्)युष्माभिः अतिसञ्चयः कृतः। तस्य अयं दोषः, शृणु -

**उपार्जितानां वित्तानां त्यागः एव हि रक्षणम्।**
**तटाक-उदर-संस्थानां परिवाहः इव अम्भासाम् ।। १५६ ।।**

अन्यच्च-

**यत् अधोऽधः क्षितौ वित्तं निचखान मितम्पचः।**
**तत् अधोनिलयं गन्तुं चक्रे पन्थानम् अग्रतः ।। १५७ ।।**

अन्यच्च -

**निजसौख्यं निरुन्धानः यः धनार्जनम् इच्छति।**
**परार्थभारवाही इव क्लेशस्य एव हि भाजनम् ।। १५८ ।।**

(विवरणम्)किञ्च भवता अतिसञ्चयः कृतः। तस्य पर्यवसानानि एव इमानि भवदुक्तानि सर्वाणि। तथाहि - तटाकस्य उदरेउअन्तः, स्थितानां जलानां प्रवाहः इव, सम्पादितानाम् अपि धनानाम्, वितरणम् एव समुचितं रक्षणं भवति। किञ्च यः मितव्ययकरः पुमान्, यस्मात् वित्तं क्षितौ अधोऽधः भद्रतया स्थापयति, तस्मात्, तत् धनं अपि अधोनिलयं गन्तुं अग्रतः पन्थानम् आरचयति। अपि च, यः आत्मनः सुखं निर्लक्षीकृत्य, धनस्य आर्जनाय एव प्रयतते, तस्य प्रयत्नः परार्थम् एव भवति, न तु आत्मने, एवं परेषाम् अर्थसमायोजनाय प्रयतमानः अयं क्लेशस्य एव भाजनं भवति हि। अपेक्षितात् अधिकस्य सम्पादनं दुःखाय एव भवति। धनस्य वितरणम् एव श्रेयः

(मूलम्) अपरञ्च -

**दान- उपभोग-हीनेन धनेन धनिनः यदि।**
**भवामः किं न तेन एव धनेन धनिनः वयम् ? ।। १५९ ।।**

अन्यच्च -

**न देवाय,न विप्राय, न बन्धुभ्यः,न च आत्मने।**
**कृपणस्य धनं याति वह्नि-तस्कर-पार्थिवैः ।। १६० ।।**

अपि च -

**दानं भोगः नाशः तिस्त्रः गतयः भवन्ति वित्तस्य।**
**यः न ददाति,न भुङ्क्ते,तस्य तृतीया गतिः भवति।। १६१ ।।**
**असम्भोगेन सामान्यं कृपणस्य धनं परैः।**
**अस्य इदम् इति सम्बन्धः हानौ दुःखेन गम्यते ।। १६२ ।।**
**दानं प्रियवाक् सहितम्,ज्ञानम् अगर्वम्,क्षमान्वितं शौर्यम्।**
**वित्तं त्यागनियुक्तम्,दुर्लभम् एतत् चतुष्टयं लोके। १६३।**

(विवरणम्)यत् धनं दानं न कुर्मः,यत् धनं न अनुभवामः, तादृशेन यदि धनिनः भवामः, तादृशां धनिनां धनेन इतरेषां कः वा लाभः विद्यते।किञ्च देवेभ्यः वा,विप्रेभ्यः वा,बन्धुभ्यःवा,आत्मने वा अनुपयुक्तं कृपणस्य यत् धनं विद्यते तत्, वह्निना दह्यते वा। तस्करैः अपह्रियते वा। पार्थिवैः कररूपेण गृह्यते वा।

अपि च, वित्तस्य दानं, भोगः, नाशः, इति तिस्रः गतयः भवन्ति। परं,यः इतरेभ्यः न ददाति, स्वयं न भुङ्क्ते, तस्य धनस्य, तृतीया नाशः गतिः भवति एव।

अपि च, अननुभवेन लुब्धकस्य धनं सामान्यं भवति।तत् उद्दिश्य यः कोऽपि न गभीरतया न वदति। एषः न खादति। न ददाति। सदा सञ्चिनोति एव।अस्य अर्थस्य किं फलं भवति इति परिहासं कुर्वन्ति। परम् अस्य मरणानन्तरम् अपि 'इदं धनम् अस्य' सम्बन्धस्य कथनम् अपि परैः दुःखेन क्रियते।

किञ्च, लोके, प्रियवाचा सहितं दानम्, गर्वरहितं ज्ञानम्, क्षमान्वितं शौर्यम्,त्यागनियुक्तं वित्तं, एते चत्वारः दुर्लभाः भवन्ति,इति मन्थरकः धनस्य वितरणम् एव श्रेयस्करं भवति इति, हिरण्यकाय कथयति।

**स्वावलोकनप्रश्नाः**

१) कुत्र धनहीनजीवनं न वरम् ?

२) अ)काव्यामृतरसास्वादः इ)सल्लापः सज्जनैः सह -एते द्वे के ?

३) उपार्जितानां वित्तानां रक्षणं किम् ?

४) वित्तस्य कति गतयः सन्ति ?

५) फेनोपमं किम् ?

५.३.१४.क्रिया(प्रयत्न)शीलकतायाः आवश्यकता

(मूलम्) तत् सखे ! सर्वदा त्वया सोत्साहेन भवितव्यम्। यतः -

**शास्त्राणि अधीत्य अपि भवन्ति मूर्खाः, यस्तु क्रियावान् पुरुषः सः विद्वान् ।**
**सुचिन्तितं च औषधम् आतुराणां, न नाममात्रेण करोति अरोगम्।। १७१ ।।**

अन्यच्च -

**न स्वल्पम् अपि अध्यवसायभीरोः करोति विज्ञानविधिः गुणं हि ।**
**अन्धस्य किं हस्ततलस्थितः अपि प्रकाशयति अर्थम् इह प्रदीपः ।। १७२।।**

तत् अत्र सखे ! दशाविशेषे शान्तिः करणीया। एतम् अपि अतिकष्टं त्वया न मन्तव्यम्।

यतः -

(विवरणम्)तस्मात् कारणात्, सखे ! सर्वदा त्वम् उत्साहवान् भवेः । तथा हि- लोके पुरुषाः शास्त्राणि पठन्ति। तथापि मूर्खाः भवन्ति। अतः यः पठति सः पण्डितः न भवति। परं, यः क्रियावान् भवति, सः पुरुषः विद्वान् भवति। सुचिन्तितं सुनिर्धारितम् एव, आतुराणाम् औषधं भवति। किन्तु नाममात्रेण औषधम् अरोगम् न करोति खलु। किञ्च अध्यवसायभीरोः विज्ञानविधिः स्वल्पम् अपि गुणं करोति हि। नाम अवगन्तुः ग्रहणपाटव-सामर्थ्यम् अल्पम् अपि विषयं गुणसम्पन्नं करोति। विशिष्टग्रहणसामर्थ्यस्य अभावात् एव,अन्धस्य हस्ततलस्थितः प्रदीपः इह अर्थं न प्रकाशयति खलु। तत् उतस्मात् कारणात्, सखे! अत्र प्रशान्तमनस्कः भवतु। एतम् अपि अतिकष्टं त्वया न मन्तव्यम्। तथा हि -

**५.३.१५.स्थानबलं महत्**

(मूलम्) **राजा कुलवधूः विप्राः मन्त्रिणश्च पयोधराः।**
**स्थानभ्रष्टाः न शोभन्ते दन्ताः केशाः नखाः नराः।। १७३ ।।**
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ।

(विवरणम्) अत्र भवान् प्रशान्तमनस्कः भवतु। अस्मात् अपि अन्यत्र गन्तुं मा आलोचनां करोतु। पुनः पुनः स्थानचलनं न तथा समीचीना पद्धतिः। तथाहि- राजा, कुलवधूः, ब्राह्मणाः, मन्त्रिणः, मेघाः, दन्ताः, केशाः, नखाः, नराः, एते स्थानात् भ्रष्टाः सन्तः न शोभन्ते इति विज्ञाय, मतिमान् स्वस्थानं न परित्यजेत्,इति मन्थरकः हिरण्यकस्य पुनः पुनः स्थानचलनं वारयति।

**५.३.१६.स्थानस्य च न तथा प्राबल्यम् अस्ति**

(मूलम्) कापुरुषवचनम् एतत्। यतः -

स्थानम् उत्सृज्य गच्छन्ति सिंहाः सत्पुरुषाः गजाः।
तत्रैव निधनं यान्ति काकाः कापुरुषाः मृगाः।। १७४ ।।
को वीरस्य मनस्विनः स्वविषयः,को वा विदेशःतथा,
यं देशं श्रयते, तमेव कुरुते बाहुप्रतापार्जितम्।
यत् दंष्ट्रा-नख-लाङ्गल-प्रहरणः सिंहो वनं गाहते,
तस्मिन् एव हतद्विपेन्द्ररुधिरैःतृष्णां छिनत्ति आत्मनः। १७५।

अपरञ्च - **निपानम् इव मण्डूकाः सरः पूर्णम् इव अण्डजाः।**
**सोद्योगं नरम् आयान्ति विवशाः सर्वसम्पदः।। १७६ ।।**

(विवरणम्) अपि च पुनः पुनः स्थानचलनं न समीचीनम् इति एतत् कुत्सितपुरुषाणां वचनम्। तथा हि-सिंहाः, उद्योगिनः सत्पुरुषाः, गजाः च, स्थानम् उत्सृज्य,जीवनार्थम् अन्यत्र गच्छन्ति। उन्नतप्रमाणैः युतं जीवनं यापयन्ति एव। परं काकाः, अलसाः कापुरुषाः,साहसहीनाः मृगाः च तत्रैव निधनं यान्ति। अतः, मनस्विनः वीरस्य स्वविषयः

कः? विदेशः कः ? बाहुबलेन प्रतापेन यं देशं जयति तमेव देशं श्रयते, तत्रैव उद्योगं कुरुते। यस्मिन् वने सिंहः दंष्ट्राभ्यां नखैः, लाङ्गलैः, वनं गाहते, तस्मिन् एव वने द्विपेन्द्रान् हन्ति। हतद्विपेन्द्रानां रुधिरैः आत्मनः तृष्णां शमयति च।विवेकेनैव स्थानात् स्थानान्तरं गन्तव्यं भवति इति मन्थरकः स्वस्य अभिप्रायं प्रकटयति।

**५.३.१७.दुःखानि सुखानि च स्वीकर्तव्यानि एव**

(मूलम्)अन्यच्च -

**सुखम् आपतितं सेव्यम्, दुःखम् आपतितं तथा।**
**चक्रवत् परिवर्तन्ते,दुःखानि च सुखानि च ।। १७७ ।।**

अन्यच्च -

**उत्साहसम्पन्नम् अदीर्घसूत्रम्,क्रियाविधिज्ञं व्यसनेषु असक्तम्।**
**शूरं कृतज्ञं दृढसौहृदञ्च लक्ष्मीः स्वयं याति निवासहेतोः।। १७८ ।।**

(विवरणम्)इतः परम्, यस्य कस्यापि, जीविते दुःखानि सुखानि च समम् एव स्वीकर्तव्यानि भवन्ति इति मन्थरकः, हिरण्यकम् उपदिशति। तथा हि - समापन्नं सुखम् अनुभोक्तव्यम् एव। तथा आपतितं दुःखम् अपि तृप्त्या स्वीकर्तम् एव। दुःखानि वा, सुखानि वा शाश्वतं न भवन्ति।एतानि चक्रवत् कदाचित् उच्चैः गच्छन्ति कदाचित् नीचैः गच्छन्ति। अतः सुखानाम् अनुभवने यादृशी स्फूर्तिः भवति, तादृशी स्फूर्तिः दुःखानाम् अनुभवने भवेत्।

अपि च, लक्ष्मीः, उत्साहेन सम्पन्नम्,यः कार्याणि सुदीर्घं न चिन्तयति तम्, कार्यकरणस्य विधानं यः जानाति तम्, दुर्व्यसनेषु असंसक्तम्, पराक्रमशालिनम्, यः कृतं जानाति = स्मरति, तम्,स्नेहशीलिनं च,निवासहेतोः स्वयं याति,इति मन्थरकः हिरण्यकं उत्साहेन स्थातुम् उपदिशति।

**५.३.१८.प्रतिभा-प्रतापादिकं जन्मसिद्धम्**

(मूलम्) विशेषतश्च -

**विना अपि अर्थैः वीरः स्पृशति बहुमानोन्नतिपदम्**
**समायुक्तः अपि अर्थैः परिभवपदं याति कृपणः।**
**स्वभावात् उद्भूतां गुण-समुदाय-अवाप्तिविषयाम् ।**
**द्युतिं सैंहीं किं श्वा धृतकनकमालः अपि लभते ?।। १७९ ।।**

धनवान् इति हि मदः मे किं गतविभवे विषादम् उपयामि
कर-निहत-कन्दुक-समाः पातोत्पाताः मनुष्याणाम् ।। १८० ।।

(विवरणम्) अपि च,अर्थैः विना अपि, शूरः पुरुषः उत्साहेन बहुमानोन्नतिपदं प्राप्नोति। अर्थैःसमायुक्तः अपि लुब्धकः अवमानं प्राप्नोति।वस्तुतः गुणानां समुदायैः प्राप्यम्,परम तस्य तु स्वभावात् एव जातं, सिंहस्य प्रतापम्,शुनकः किं स्वर्णमालाधरणेन लभते ? सिंहस्य प्रतापं प्रयत्नशतेनापि शुनकः न प्राप्नोति।

किञ्च, 'धनवान् इति हि मदः' मम किमर्थम्, अहं तादृशं गर्वं नैव वहामि। अहं सर्वदा गतविभवेषु, विषादम्उसानुभूतिं उपयामिउगच्छामि। तथा हि- मनुष्याणाम् पातोत्पाताः उच्च-नीचाः करे निहतस्य कन्दुकस्य समानाः भवन्ति। करस्थः कन्दुकः कदाचित् उच्चैः भवति। कदाचित् नीचैः च भवति।

**५.३.१९.धनलोभः न तथा समीचीनः**

(मूलम्)अपरञ्च -

**अभ्रच्छाया,खलप्रीतिः,नवसस्यानि,योषितः।**
**किञ्चित् कालोपभोग्यानि यौवनानि धनानि च ।। १८२ ।।**

अपि च - सखे ! .

**येन शुक्लीकृता हंसाः,शुकाश्च हरितीकृताः।**
**मयूराः चित्रिताः येन सः ते वृत्तिं विधास्यति ।। १८३ ।।**

अपरञ्च - सतां रहस्यं शृणु, मित्र !

**जनयनति आर्जने दुःखम्, तापयन्ति विपत्तिषु।**
**मोहयन्ति च सम्पत्तौ, कथम् अर्थाः सुखावहाः।। १८४ ।।**

अपरञ्च -

**धर्मार्थं यस्य वित्तम् , इह वरं तस्य निरीहता।**
**प्रक्षालनात् हि पङ्कस्य दूरात् अस्पर्शनं वरम् ।। १८५ ।।**

(विवरणम्)अपि च- धनसम्पादनं सर्वथा,सर्वदा दुःखकरम् एव। तथा हि- मेघानां छाया, खलानां प्रीतिः, नवसस्यानि, योषितः,यौवनानि, धनानि च किञ्चित् कालम् एव उपभोक्तुम् अर्हानि भवन्ति। किञ्च,सखे !यस्मात् कारणात्, दैवेन हंसाः शुक्लीकृताः, भगवता शुकाश्च हरितीकृताः, मयूराः च चित्रिताः ,तस्मात् कारणात्, भगवान् एव तव अपि जीवनस्य वृत्तिं विधास्यति। किञ्च, मित्र ! सतां रहस्यं कथयामि, शृणु, धनानि आर्जने दुःखं जनयन्ति। विपत्तिषु तापं जनयन्ति। सम्पत्तिकाले मोहं च जनयन्ति, एवम्, आर्जने दुःखजनकाः, विपत्तिषु जनकाः, सम्पत्सु मोहजनकाश्च अर्थाः कथं सुखावहाः भवन्ति ? दुःखकराः इत्यर्थः।

किञ्च, यः केवलं धर्मकार्याचरणाय एव वित्तं सम्पादयति, तर्हि तस्य पुरुषस्य इह लोके, धनस्य निरीहणम्एवउ धनस्य अनार्जनम्, एव वरम्। सम्पाद्य वितरणापेक्षया असम्पादनम् एव श्रेयस्करः भवति।पङ्कस्य प्रक्षालनापेक्षया दूरात् अस्पर्शनम् एव वरम्।

(मूलम्) यतः -

**यथा ह्यामिषम् आकाशे पक्षिभिः,श्वापदैः भुवि।**
**भक्ष्यते सलिले नक्रैः,तथा सर्वत्र वित्तवान् ।। १८६ ।।**
**राजतः,सलिलात्, अग्नेः,चोरतः,स्वजनात् अपि।**
**भयम् अर्थवतां नित्यम्,मृत्योः प्राणभृताम् इव ।। १८७ ।।**

तथा हि - **जन्मनि क्लेशबहुले किं नु दुःखम् अतः परम्,**
**इच्छासम्पत् यतः नास्ति,यत् च इच्छा न निवर्तते।। १८८ ।।**

(विवरणम्)धनी सर्वत्र, सर्वैः, सर्वदा भक्ष्यते एव खलु। तथाहि- यथा वा आकाशे पक्षिभिः, भुवि श्वापदैः, सलिलेउ जले,नक्रैःउ मकरैः, आमिषम्उ मांसं च भक्ष्यते, तथा सर्वत्र आकाशे, भुवि, सलिले च वित्तवान् भक्ष्यतेउ पीड्यते।यथा प्राणभृताम् मृत्योः भयम् अस्ति, तथा अर्थवतां, राजतः, सलिलात्, अग्नेः, चोरतः, स्वजनात् अपि नित्यम् भयम् अस्ति। मानवः इच्छासम्पदं न त्यजति, इच्छाः च मानवं न त्यजन्ति। क्लेशबहुलेउ दुःखभूयिष्ठे, अस्मिन् जन्मनि, अतः परं दुःखं किं नु विद्यते ?

(मूलम्)अन्यच्च - भ्रातः ! शृणु -

**धनं तावत् असुलभम्,लब्धं कृच्छ्रेण रक्ष्यते।**
**लब्धनाशः यथा मृत्युः तस्मात् एतत् न चिन्तयेत् ।। १८९ ।।**
**तृष्णां च इह परित्यज्य, कः दरिद्रः ? कः ईश्वरः ?**
**तस्याश्चेत्प्रसरो दत्तो दास्यञ्च शिरसि स्थितम् ।। १९० ।।**

अपरञ्च - **यद्यद् एव हि वाञ्छेत,ततो वाञ्छा प्रवर्तते।**
**प्राप्तः एव अर्थतः सः अर्थः, यतः वाञ्छा निवर्तते ।। १९१ ।।**

किं बहुना ! पक्षपातेन मया एव सह अत्र कालो नीयताम् । यतः -

**आमरणान्ताः प्रणयाः,कोपाः तत्क्षणभङ्गुराः।**
**परित्यागाश्च निस्सङ्गाः भवन्ति हि महात्मनाम् ।। १९२ ।।**

इति श्रुत्वा लघुपतनकः ब्रूते ' धन्योऽसि। मन्थर ! सर्वथा श्लाध्यगुणः असि।'

(विवरणम्) अपि च भ्रातः ! शृणु -धनस्य सम्पादनम् एव तावत् न सुलभं न भवति। सम्पादितम् अपि कृच्छ्रेणउकष्टेन पाल्यते। सम्पादितस्य धनस्य नाशः मृत्युसमानः। सम्पादने,सम्पादितस्य पालने,सम्पादितस्य नाशे क्लेशकरस्य धनस्य चिन्तनम् एव न कुर्यात्। यदि वयम् अस्मिन् लोके तृष्णांउ आशां परित्यजामः,तर्हि दरिद्रः कः भवति ? ईश्वरः च कः भवति ? यदि तृष्णाम् आराधयामः, नाम तृष्णां विस्तारयामः,तदा दत्तः दीयमानं दास्यमानञ्च सर्वं भाग्यं शिरसि स्थितम् एवउपाताललोकाधीनम् एव।अत्र शिरसि स्थितम् इत्यनेन वामनेन अनुष्ठितं बलिनः पातालप्रापणं परामृश्यते। किञ्च, यत् यत् वाञ्छति, तत् तत् वाञ्छा अधिका भवति। सः यदा अर्थतःउवस्तुतः, प्राप्तः भवति तदा एव वाञ्छा अपि निवर्तते। अन्यथा सा वञ्छा अग्रे अपि प्रसरति एव। अहम् एवं कियत् वदामि। भवतु, स्नेहानुपातिना मया सह एव भवान् अत्र कालं नयतु। तथा हि -महात्मनाम् उविशालहृदयानां प्रणयाःउ प्रेमसम्बन्धाः, मरणानन्तरम् अपि वर्तन्ते। महात्मनां प्रेमसम्बन्धाः अमराः इत्यर्थः। कोपाःउ तापाः, उष्णोदके उष्णम् इव, तत्क्षणभङ्गुराःउ तात्कालिकाः भवन्ति। परित्यागाश्च निस्सङ्गाः भवन्ति इति मन्थरकेण उक्तं लघुपतनकः शृणोति। ' धन्यः असि। मन्थर ! त्वं सर्वथा प्रशंसनीयः खलु ' इति वदति।

**५.३.२०.सतां प्रशंसनम्**

(मूलम्)यतः -

**सन्तः एव सतां नित्यम्, आपत्-उद्धरण-क्षमाः।**
**गजानां पङ्कमग्नानाम्, गजाः एव एव धुरन्धराः।। १९३ ।।**
**श्लाघ्यः सः एकः भुवि मानवानाम्,सः उत्तमः,सत्पुरुषः,सः धन्यः।**
**यस्य अर्थिनः वा शरणगताः वा नाशाभिभङ्गात् विमुखाः प्रयान्ति।। १९४ ।।'**

तत् एवं ते स्वेच्छा-आहार-विहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति।

(विवरणम्)तथाहि- नित्यं सतांउ महताम्, आपदः उद्धरणे क्षमाः, सन्तःउ महान्तः एव भवन्ति।पङ्के मग्नानां गजानाम् उद्धरणे गजाः एव धुरन्धराःउ समर्थाः, न तु अन्ये। याचकाः वा, शरणं गताः वा, यस्य सकाशम् आगत्य, आशायाःउअभीष्टस्य, असिद्ध्या विमुखाः न प्रयान्ति, भुवि, मानवानां मध्ये, सः एकः ,श्लाघ्यः सः एकः एव उत्तमः, सः एकः एव सत्पुरुषः, सः एकः एव धन्यः, इति हिरण्यकः, स्नेहस्य दातारं मन्थरकं धन्यं प्रकटयति। तदा प्रभृति ते स्वेच्छया आहारार्थं विहरन्ति। सन्तोषेण सुखेन च निवसन्ति।

## ५.४.उपसंहारः

एवम् अस्यां कथायां हिरण्यकः(मूषकः)स्वेन अनुभूतानि कष्टानि नष्टानि सुखानि दुःखानि च सविमर्शं प्रस्ता वयति।कदाचित् मन्थरकः,कदाचित् तत्रतत्र लघुपतनकश्च हिरण्यकस्य जीवनघटनानि विश्लेषयतः च। सर्वम् अपि कार्य-कारणभावमूलकम्,स्त्रीणां यौवनमदविलासाः, धनस्य प्रभावः ,दारिद्र्यस्य दुर्भरता, मनस्विनः प्रशंसा, अधमानां सेवनं प्रति गर्हणम्, लोभस्य दुष्परिणामाः,सन्तोषस्य महत्ता,परिच्छेदस्य प्राधान्यम् इति अंशाः अत्र प्रस्तुताः। एते च अंशाः पाठकानां जीवनोपयोगिजागरूकतां शिक्षितुं प्रभवन्ति।

## ५.५.अभ्यासः

अ).हिरण्यकस्य वृत्तान्तं विशदयत ?

इ).धनस्य दरिद्रस्य च प्रभावः कीदृशः ?

इ).लोभस्य सन्तोषस्य च प्रभावः कीदृशः ?

* * *

# UNIT- VI
# चन्दनदास - लीलावत्योः वृत्तान्तम् (कथा - ५)

संरचना


६.०.परिचयः
६.१.लक्ष्याणि
६.२.कथायाः - नेपथ्यम्
६.२.१. सर्वं कार्य- कारणभावमूलकम्
६.३.चन्दनदास - लीलावत्योः वृत्तान्तम्
६.३.१.वृद्धपतिः चन्दनदासः
६.३.२.युवती लीलावती
६.३.३.स्त्रीणाम् अप्रतिष्ठाकराः विषयाः
६.४.उपसंहारः
६.५.अभ्यासः


## ६.०.परिचयः

संस्कृतसाहित्यं हि सनातनम्। तथापि वैविध्यभरितम्। तत्र पुराणाणि वर्तन्ते। काव्यानि विद्यन्ते। आख्या- यिकाश्च भवन्ति। रूपकाणि सन्ति। सूत्राणि सन्ति। स्तोत्राणि सन्ति। कथाश्च विराजन्ते। कथाप्रक्रियायाम् अपि प्रशस्ततमं वाङ्मयम् आविर्भूतम्। संस्कृतकथासाहित्यं हि अन्तर्जातीयख्यातिम् आर्जितम्। संस्कृतकथाकाव्यानि बहूनि प्रसिद्धप्रपञ्चभाषासु अनूदितानि सन्ति। तेषु हितोपदेशः एकः। तस्मिन् मित्रलाभ-मित्रभेद-सन्धि-विग्रहाख्याः चत्वारः भागाः सन्ति।प्रकृते इयं कथा मित्रलाभात् स्वीकृता। अत्र चन्दनदास-लीलावत्योः वृत्तान्तं वर्णितम्। चन्दनदासः वृद्धपतिः। लीलावती युवतीभार्या। साधारणतया युवत्यः वृद्धपतिं नैव अभिलषन्ति। परं कदाचित् युवतीभार्या लीलावती, वृद्धपतिं चन्दनदासं केशेषु गृहीत्वा अकस्मात् आलिङ्गितवती। तथा करणाय किमपि कारणम् अवश्यं भवति एव। सा किमर्थं तथा कृतवती ? तस्य समाधानभूता च इयं कथा अत्र प्रस्तूयते।

## ६.१.लक्ष्याणि

जगत् सर्वं कार्य-कारणभावमूलकम्। प्रति कार्यस्य अपि कारणम् अवश्यं भवत्येव। कारणं विना किमपि कार्यं न भवति, नाम किमपि न जायते, किमपि न प्रचलति, न वा नश्यति च। अयं च प्रकृतेः नियमः।अयं विषयः एव विज्ञानशास्त्रज्ञैः चर्या-प्रतिचर्या

सिद्धान्तत्वेन प्रतिपाद्यमानः अस्ति। एकैका चर्या स्वीयां प्रतिचर्यां वहत्येव इति तस्य मौलिकः अभिप्रायः। अत्र कारणस्य चर्या इति, कार्यस्य प्रतिचर्या इति च शास्त्रकाराणां व्यवहारः। एतत् अभिप्रायकः अयं च प्रकृतेः नियमः, कथामाध्यमेन, जीवनसङ्घटनपुरस्सरं कमनीयतया अभिवर्णितः। अत्र च प्रधानतया, प्रकृतेः अयं नियमः, नित्यजीवने कथं समन्वितः भवति इत्यंशस्य अवबोधनाय उद्दिष्टः अयं पाठ्यांशः। एतत्पाठ्यांशस्य अध्ययनेन-

- श्रवण,पठन,भाषण,लेखन,कौशलानां प्रावीण्यम् अधिगन्तुं समर्थः भवति।
- चन्दनदासस्य मदनायत्तचित्ततां पठितुं पारयति।
- स्त्रियः नष्टावहान् प्रमादकरान् च विषयान् अधिकृत्य परिचितः भवति।
- जारेण सम्बन्धगोपनाय लीलावत्याः कपटतानैपुण्यं लिखितुं पारयति ।
- लीलावत्या वृद्धपतेः आलिङ्गने,जारेण सम्बन्धगोपनम् एव हेतुः इति अवगन्तुं प्रभवति।

## ६.२.कथायाः - नेपथ्यम्

चूडाकर्ण-वीणाकर्णौ सुहृदौ। उभयोः संल्लापे चूडाकर्णः अन्यासक्तः भवति । तस्य कारणं किमिति वीणाकर्णः पृच्छति । नागदन्ताधिष्ठिते पात्रे स्थितम् अन्नं मूषकः उत्प्लुत्य भक्षयति। अतः अन्यमना आसम् इति चूडाकर्णः वदति। मूषिकोत्प्लवनस्य किमपि कारणं भवेत् इति वीणाकर्णः वदति। तत् एतत् वीणाकर्णः कथामुखेन वक्तुम् उपक्रमते।

### ६.२.१ .सर्वं कार्य- कारणभावमूलकम्

(मूलम्)सर्वं कार्य-कारणभावमूलकं खलु। मूषिकस्य उत्प्लवने अपि, किमपि कारणम् अवश्यं भविष्यति इति वदन् ,सर्वस्य अपि कार्य-कारणभावमूलकत्वं बोधयन्तीं सरसाम् एतां कथां वीणाकर्णः प्रस्तावयति।

**अकस्मात् युवती वृद्धं केशेषु आकृष्य चुम्बति।**
**पतिं निर्दयम् आलिङ्ग्य हेतुः अत्र भविष्यति ।। २०९ ।।**

चूडाकर्णः पृच्छति - कथम् एतत्। वीणाकर्णः कथयति -

(विवरणम्) वीणाकर्णः नागदन्तकं पश्यति।'मूषिकः क्षुद्रःउ बलहीनः, अपि एतावत् दूरं कथं उत्पतति। अत्र अवश्यं किमपि कारणं भवति। कारणं विना मूषिकः एतत् दूरम् उत्प्लवितुं समर्थः भवति। जगत् सर्वं कार्य- कारण-पुरस्सरम् एव प्रचलति। तत्र च उदाहरणं चन्दनदासवृत्तान्तम्। तथाहि- कदाचित् युवती भार्या अकस्मात् वृद्धं स्वपतिं केशेषु आकर्षति। चुम्बति। सरभसम् आलिङ्गति। अकस्मात् युवती भार्या किमर्थं वृद्धं स्वपतिं तथा करोति। तत्र अपि किञ्चित् कारणं अस्ति ' इति वीणाकर्णः कथयति। चूडाकर्णः वृद्धपतेः वृत्तान्तं ज्ञातुम् इच्छुः भवति। वीणाकर्णः च वृद्धपतेः कथां एवं श्रावयति।

## ६.३.चन्दनदास - लीलावत्योः वृत्तान्तम्

**६.३.१.वृद्धपतिः चन्दनदासः**

(मूलम्) अस्ति गौडीये कौशाम्बी नाम नगरी। तस्यां चन्दनदासः नाम वणिक् महाधनः निवसति। तेन पश्चिमे वयसि वर्तमानेन कामाधिष्ठितचेतसा धनदर्पात् लीलावती नाम वणिक्पुत्री परिणीता।

(विवरणम्) गौडप्रान्तेषु कौशाम्बी नाम नगरं किञ्चित् वर्तते।तस्मिन् नगरे चन्दनदासनामकः वर्तकः कश्चित् अस्ति। चन्दनदासः महान् धनिकः अस्ति।सः पश्चिमवयस्कः नाम पञ्चाशतम् अतीतः,वार्धके पदं क्षिपति। तथापि कामभावनां वहति। सदा मनः मदनेन आविष्टं वर्तते। अयं धनमदान्धः च ।अतः स्वस्य मदन वाञ्छाः पूरयितुं काञ्चन वणिजः पुत्रीं परिणयम् उपैति। तस्याः नाम लीलावती अस्ति।।

६.३.२.युवती लीलावती

(मूलम्)सा च मकरकेतोः विजयवैजयन्ती इव यौवनवती बभूव। सः च वृद्धपतिः तस्याः सन्तोषाय न अभवत्। यतः -

**शशिनि इव हिमार्तानाम्, घर्मार्तानां रवौ इव।**
**मनः न रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ ।। ११० ।।**

अन्यत् च -

**पतितेषु हि दृष्टेषु पुंसः का नाम कामिता।**
**भैषज्यम् इव मन्यन्ते यत् अन्यमनसः स्त्रियः।। १११ ।।**

सः च वृद्धपतिः तस्याम् अतीव अनुरागवान् ।

यतः --

**धनाशा जीविताशा च गुर्वी प्राणभृतां सदा।**
**वृद्धस्य तरूणी भार्या प्राणेभ्यः अपि गरीयसी ।। ११२ ।।**
**न उपभोक्तुं,न च त्यक्तुं,शक्नोति विषयान् चरी।**
**अस्थि निर्दशनः श्वा इव जिह्वया लेढि केवलम्।। ११३ ।।**

(विवरणम्) मदनं विजित्य आगता वैजयन्ती इव लीलावती अपि रूपवती,युक्तवयस्का यौवनवती च अस्ति। पञ्चाशतम् (५०) अतीतः वृद्धः अयं पतिः चन्दनदासः, लीलावत्याः वयसः वाञ्छाः पूरयितुं समर्थः न अस्ति। तथाहि - हिमेनउशैत्येन, आर्तानांउपीडितानां मनः चन्द्रे न रमते। घर्मेणउतापेन, पीडितानां मनः सूर्ये न रमते। एवं युवतीनां रूपवतीनां च मनः जराक्रमितेषु जीर्णन्द्रियेषु वृद्धपतिषु च न रमते।अयं वृद्धपतिः चन्दन- दासस्तु तु तस्याम् अतीव अनुरागी भवति। तथा हि-यथा प्राणिनां धनविषयकइच्छा अधिका वर्तते, जीवनविषयक- इच्छा अपि
अधिका वर्तते, तथा वृध्दपतीनां तरुण्यां भार्यायां अनुरागः अधिकः वर्तते। वृद्धेभ्यः

पतिभ्यः तरुणी भार्या प्राणेभ्यः अपि गरीयसी भवति।

किञ्च, अस्थिमात्रनिर्दशनः श्वा मांसम् उपभोक्तुं न प्रभवति,त्यक्तुम् अपि न प्रभवति।आशया केवलं जिह्वया यथा आस्वदते, तथा कामवर्तनः वृद्धपतिः तरुणीम् उपभोक्तुं न प्रभवति,त्यक्तुम् अपि न इच्छति। केवलं कामेन आवाहितः सन् ,दर्शनेन स्पर्शनेन भाषणेन तृप्रिं भजति।

| **स्वावलोकनप्रश्नाः** |
|---|
| १) कौशाम्बी नगरी कुत्र वर्तते ? |
| २) चन्दनदासः कीदृशः ? |
| ३) चन्दनदासः लीलावतीं कुतः परिणीतवान् ? |
| ४) स्त्रीणां मनः कीदृशम् ? कुत्र न रमते ? |

**६.३.३.स्त्रीणाम् अप्रतिष्ठाकराः विषयाः**

(मूलम्)अथ सा लीलावती यौवनदर्पात् अतिक्रान्तकुलमर्यादा केन अपि वणिक्पुत्रेण सह अनुरागवती बभूव। यतः –

**स्वातन्त्र्यं,पितृमन्दिरे निवसनम्, यात्रोत्सवे संगतिः,**
**गोष्ठी पूरुषसन्निधौ,अनियमः,वासः विदेशे तथा।**
**संसर्गः सह पुंश्चलीभिः, असकृद्वृत्तेः निजायाः क्षतिः।**
**पत्युः वार्धकम्, ईर्षितं प्रवसनं, नाशस्य हेतुः स्त्रियः।।११४।।**

अपरञ्च –

**पानम् दुर्जनसंसर्गः पत्या च विरहः अटनम्।**
**स्वप्नश्च, अन्यगृहे वासः, नारीणां दूषणानि षट्।। ११५ ।।**
**स्थानं नास्ति, क्षणं नास्ति,नास्ति प्रार्थयिता नरः।**
**तेन नारद!नारीणां सतीत्वम् उपजायते।। ११६ ।।**
**न स्त्रीणाम् अप्रियः कश्चित् प्रियः वा अपि न विद्यते।**
**गावः तृणम् इव अरण्ये प्रार्थयन्ति नवं नवम्।। ११७।।**

(विवरणम्) लीलावती, शारीरकतया तृप्तिप्रदाने, वृद्धं स्वपतिम् असमर्थम् अवगच्छति। मदनातुरा भवति। यौवनदर्पेण कुलमर्यादाः अतिक्रामति।केनचित् वणिक्पुत्रेण सह अक्रमसम्बन्धं वहति।तस्मिन् अनुरागवती भवति।

तथाहि – १.स्वेच्छाप्रवर्तनम्, २.पितुः गृहे निवसनम्, ३.(यात्राणाम् ) उत्सवेषु

सम्मेलनम्, ४.परपुरुषाणां सन्निधौ सल्लपनम्,५.नियमानाम् अपालनम्, ६.इतरप्रदेशेषु निवसनम्, ७.पुंश्चलीभिः (Boy-Friends) सह संसर्गः , ८,भर्तुः वार्धकम्, ९.ईर्षितं प्रवसनम्, एते नव स्त्रीणां नाशाय कल्पन्ते।यथा गावः अरण्येषु नवं नवं तृणम् अभिलषन्ति, तथा पुरुषाः अपि नूतनां ( Fresh)स्त्रियम् अभिलषन्ति। कम् अपि न त्यजन्ति। कमपि अपि न इच्छन्ति। तस्मात् स्त्रीणां कोऽपि प्रियः न भवति। कोऽपि अप्रियः वा न भवति। किञ्च १.मद्यस्य पानम्, २.व्यसनपरैः संसर्गः,३.भर्त्रा विरहः,४.स्वेच्छासञ्चारः,५.स्वप्नलोके विहरणम्, ६.अन्येषां गृहेषु निवसनम्, एतानि नारीणां दूषणानि भवन्ति। एतानि स्त्रियम् अपमार्गं प्रवेशयन्ति।नारद!गन्तॄणाम् आगन्तॄणां च यत्र कार्यकलापानां निर्वहणाय, स्त्रीणां स्थानम्उ भवनं, न भवति, पुरुषैः सह समावेशाय क्षणमपि अवकाशः न भवति, यत्र च अनुधावन्तः पुरुषाश्च न भवन्ति, तत्र स्त्रीणां सतीत्वम् (शुद्धता) परिरक्षितं भवति।

(मूलम्)अपरञ्च -

**घृतकुम्भसमा नारी, तप्ताङ्गारसमः पुमान्।**
**तस्मात् घृतञ्च वह्निञ्च न एकत्र स्थापयेत् बुधः।। ११८ ।।**
**मात्रा स्वस्रा दुहित्रा वा न विविक्तासनः भवेत्।**
**बलवान् इन्द्रियग्रामः विद्वांसम् अपि कर्षति ।। ११९ ।।**
**न लज्जा,न विनीतत्वम्,न दाक्षिण्यम्,न भीरुता।**
**प्रार्थनाभाव एकस्स्यात् सतीत्वे कारणं स्त्रियः।। १२०।।**
**पिता रक्षति कौमारे, भर्ता रक्षति यौवने।**
**पुत्रश्च स्थाविरे भावे,न स्त्री स्वातन्त्र्यम् अर्हति ।। १२१ ।।**

एकदा सा लीलावती रत्नावली-किरण-कर्बुरे पर्यङ्के तेन वणिक्पुत्रेण सह विस्रम्भालापैः सुखासीना तम् अलक्षितोपस्थितं पतिम् अवलोक्य,सहसा उत्थाय,केशेषु आकृष्य,गाढम् आलिङ्ग्य,चुम्बितवती।तेन अवसरेण जार -श्च पलायितः। उक्तञ्च -

**उशना वेद यत् शास्त्रं यत् च वेद बृहस्पतिः।**
**स्वभावेन एव तत् शास्त्रं स्त्रीबुद्धौ सुप्रतिष्ठितम्।। १२२ ।।**

तदालिङ्गनम् अवलोक्य समीपवर्तिनी कुट्टिनी अचिन्तयत्'अकस्मात् इयम् एनम् उपगूढवती'इति। ततः तया कुट्टिन्या तत्कारणं परिज्ञाय,लीलावती रहसि दण्डिता।अतः अहं ब्रवीमि 'अकस्मात् युवती वृद्धम्' इत्यादि।

(विवरणम्)किञ्च, स्त्री घृतघटेन सदृशी भवति। पुमान् तु तप्त-अङ्गारसमः भवति। अङ्गाराणाम् औष्ण्येन घटः घृतं च द्रावयति। पुरुषः स्त्रियः मानसं द्रावयति। पुरुषस्य सम्पर्केण स्त्री विवेकभ्रष्टा भवति। अतः घृतघटेन समं प्रवर्तमानाः स्त्रियः, अङ्गारैः समानं व्यवह्रियमाणान् पुरुषान् च विवेकसम्पन्नः एकत्र न समा- योजयेत्। पुमान् कदाचित् अपि, मात्रा स्वस्रा दुहित्रा वा एकशय्यां न गच्छेत्। इन्द्रियाणां समुदायः बलवान्। विवेकिनम् अपि शिथिलयति। समुचितमार्गात् भ्रष्टं करोति। उन्मादं जनयति।

प्रमादं कारयति। अपयशः सम्पादयति। स्त्रियः सतीत्वे, लज्जा कारणं न भवति। विनीतत्वं कारणं न भवति। दाक्षिण्यं कारणं न भवति । भीरुता अपि कारणं न भवति । किन्तु प्रार्थनाभावः एकः एव स्त्रियः सतीत्वं परिरक्षति। कदाचित् अपि स्त्री यं कम् अपि न उपसर्पेत्। नैव अभ्यर्थयेत् च।स्त्रियं कौमारे पिता रक्षति। यौवने भर्ता रक्षति। वार्धक्ये पुत्रः रक्षति। एवं स्त्री पित्रा वा, पत्या वा, पुत्रेण वा पालितः भवति। एवं स्त्री सर्वदा भद्रताम् आप्नोति एव। कदाचित् अपि स्त्री अभद्रताभावम् मा अनुभवतु।

एवं स्थिते कदाचित् लीलावती रत्नकान्तिप्रसरिते पर्यङ्केउशयने,अक्रमसम्बन्धं वहता वणिक्पुत्रेण सुखम् उपविशति। सरससल्लापं च कुर्वन् आस्ते। अत्रान्तरे तत्र वृद्धः पतिः चन्दनदासः आगच्छति।लीलावती अकस्मात् आगतं पतिं पश्यति। सहसा उत्तिष्ठति। चन्दनदासं केशेषु सरभसम् आकर्षति। गाढम् आलिङ्गति, चुम्बति च। लीलावत्याः अनेन संरम्भेण जारः पलायितः भवति। एवं जारस्य निर्गमनावकाशं कल्पयितुम् एव लीलावती वृद्धपतिं चन्दनदासं शृङ्गारचेष्टाभिः आनन्दयति। मदनातुरासु स्त्रीषु एतादृशाः वञ्चनाप्रकाराः अधिकं भवन्ति। दानवानां गुरुः शुक्रः, श्रमेण यत् (राजनीति) शास्त्रम् अधीतवान्, देवानां गुरुः बृहस्पतिः परिश्रमं कृत्वा यत् शास्त्रम् अधीतवान्, तत् शास्त्रद्वयं स्वभावेनैव सुलभतया स्त्रीबुद्धौ सुप्रतिष्ठितं वर्तते। एवं स्त्रियः वञ्चनासु नितरां निपुणाः विद्यन्ते।

समीपे विद्यमाना कुट्टिनी (उज्येष्ठा गृहपरिचारिका),लीलावत्याः चन्दनदाससमालिङ्गनं पश्यति। लीलावती किमर्थम् अकस्मात् एनं वृद्धपतिं समालिङ्गति इति आश्चर्यं भजति। अनुपदम् एव च कुट्टिनी कारणम् अवगच्छति। रहसि लीलावत्यै हितम् उपदिशति। अतः एव 'अकस्मात् युवती वृद्धम्...'इति कथयामि इति वदति। एवं प्रतिकार्यस्य अपि कारणं अवश्यं भवति इति अंशं वीणाकर्णः चूडाकर्णं चन्दनदासस्य वृत्तान्त- व्याजेन कथयति।

**स्वावलोकनप्रश्नाः**

१) नारीणां दूषणानि षट् ?

२) किं शास्त्रं स्त्रीषु सुप्रतिष्ठितम् ?

३) बुधः कस्मात् घृतञ्च वह्निञ्च एकत्र न स्थापयेत् ?

४) इन्द्रियग्रामः कीदृशः ? सः च किं करोति ?

## ६.४.उपसंहारः

एवम् अस्यां कथायां चन्दनदासस्य कामुकता, वृद्धपतित्वम्, लीलावत्याः युवतीत्वम्, जारेण सह सम्बन्धः, स्त्रीणां नष्टावहाः प्रमादकराः च विषयाः, जारेण सम्बन्धगोपनाय लीलावत्याः वञ्चनानैपुण्यम्,वृद्धपतेः आलिङ्गने, जारेण सह सम्बन्धस्य गोपनम् एव हेतुः इति एते अंशाः प्रस्तुताः। सरसभूमिकया कथाप्रक्रियया, एते अंशाः 'सर्वं कार्य-कारणभाव मूलकम्' इत्यंशं बोधयन्ति।

## ६.५.अभ्यासः

अ)स्त्रियः नष्टावहाः विषयाः के ?

इ)युवती किमर्थं वृद्धपतिम् आलिङ्गतवती, विशदयत ?

उ)'अकस्मात् युवती वृद्धं केशेषु आकृष्य चुम्बति।

ऋ)पतिं निर्दयम् आलिङ्ग्य हेतुः अत्र भविष्यति 'का, कं कथं विशदयत ?

* * *

UNIT: VII

# व्याध-मृग-सर्प-शूकर-जम्बुकानां वृत्तान्तम् (कथा-६)

संरचना


७.०.परिचयः

७.१.लक्ष्याणि

७.२.कथायाः - नेपथ्यम्

७.२.१.मितसञ्चयस्य सौख्यम्

७.२.२.अतिसञ्चयनेन लुब्धता

७.३.व्याध-मृग-सर्प-शूकर-जम्बुकानां वृत्तान्तम्

७.३.१.महान् कलेबराणां सञ्चयः

७.३.२.दीर्घरास्य आलोचना

७.३.३.अतिसञ्चयनस्य दुष्प्रभावः

७.३.४.मितः सञ्चयः एव वरम्

७.४.उपसंहारः

७.५.अभ्यासः


## ७.०.परिचयः

अनादिकालतः संस्कृतसाहित्यं नित्यं नूतनां प्रक्रियां सृजत्येव। सूत्रप्रक्रिया, करिकाप्रक्रिया, कव्यप्रक्रिया, रूपकप्रक्रिया, शतकप्रक्रिया, नवलाप्रक्रिया, इत्येवमादयः प्रक्रियाः आविर्भूताः। सर्वासु अपि एकैकस्याः स्वस्व प्रधान्यं विद्यते एव।एवं प्राधान्यं सम्पाद्य प्रख्यातम् आप्ता प्रक्रिया कथाप्रक्रिया। कथाप्रक्रियायाम् अपि प्रशस्तं वाङ्मयम् आविर्भूतम्।तच्च जगत् प्रसिद्धम्। तत्र संस्कृतकथाकाराणाम् संरचनाविधानम् एव कारणम्। यं कमपि पुरुषम् अप्रबाध्य पशुपक्ष्यादीन् स्वीकृत्य कथायाः संरचनम् प्रपञ्चदेशान् आकृष्टम्। मानवसङ्केतान् विहाय,कुल-मत-वर्गाणाम् अतीततया,मानवता संस्करणाय जातं हि संस्कृतकथासाहित्यम्। संस्कृतकथाप्रक्रिया एवं मानवाभ्युदयाय उपकरोति। मानवतायाः संवर्धनाय सर्वः अपि स्वीयं क्रमशिक्षणं पालयेत्। अति च सर्वत्र वर्जयेत् च। एतत् अंशस्य बोधकः अयं पाठ्यांशः।

## ७.१.लक्ष्याणि

जीवनं हि एका कला। जीवनस्य हि लक्ष्यम् आनन्दः। तत्साधनाय जीवनम् अस्माभिःक्क्क्ष्क्र्कर्तव्यं भवति। तस्य कृते बुद्धेः उपयोगः आवश्यकः भवति। मानवः उत्तमः प्राणी। सः बुद्धिजीवः।तस्य विवेकः विद्यते। तेन च विवेकेन जितेन्द्रियः भवेत्। काम-क्रोध-लोभ-मोह-मद-मात्सर्यादीनां अवशः भवेत्। तदा एव सुसम्पन्नं जीवनं साधयति।

तादृशजीवनम् एव कलात्मकं भवति। जीवनस्य कलात्मकतासम्पादकेषु यदृच्छालाभसन्तुष्टिः अपि अन्यतमा भवति। अप्राप्यं प्रति अनभिलाषः, नष्टं प्रति अशोकः, प्राप्तेन सन्तुष्टिः, अनलसता, क्रियाशीलता, उद्यमनशीलता इत्यादयः विषयाः अभ्यापपूर्वकं आचरणाय स्वीकरणीयाः सन्ति। दुष्टगुणान् विहातुं, सद्गुणान् अभ्यसितुं च एतान् प्रति मनवस्य आभ्यासः आवश्यकः भवति, एतत्प्रक्रियां प्रति अवगाहनां दातुम् उद्दिष्टः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन -

- श्रवण-पठन-भाषण-लेखनकौशलानां वर्धनं भवति।
- पाठ्यांशं सम्यक् पठति,पदकोशं वर्धयति,वाक्यरचनाकौशलं साधयति च।
- अतिसञ्चयम् अवगन्तुं प्रभवति।
- शृगालस्य लुब्धतां पठितुं पारयति।
- अतिसञ्चयनस्य दुष्परिणामान् अवगन्तुं समर्थः भवति।

## ७.२.कथायाः- नेपथ्यम्

लघुपतनकः हिरण्यकेन मैत्रीं प्राप्नोति। एकदा लघुपतनकः तं प्रदेशं परित्यज्य दण्डकारण्ये कर्पूराभिधानं सरः गन्तुम् इच्छति। काकस्य मित्रं कच्छपः कश्चित् अस्ति। तस्य च नाम मन्थरकः। कर्पूराभिधाने सरसि प्रति- वसति। लघुपतनर-हिरण्यकौ उभौ अपि कच्छपस्य समीपं गच्छतः।आतिथ्यं प्राप्नुतः च। कदाचित् मन्थरकः मूषिकं स्वस्य आगमनवृत्तान्तं पृच्छति। मूषिकः आगमनकारणं कथयति। तदा मन्थरकः मूषिकं'युष्माभिः अति- सञ्चयः कृतः। तस्य अयं दोषः, इति उक्त्वा अतिसञ्चयनस्य दुष्प्रभावबोधिकां कथां श्रावयति।

### ७.२.२.अतिसञ्चयनेन लुब्धता

(मूलम्) **कर्तव्यः सञ्चयो नित्यम्, कर्तव्यः नातिसञ्चयः।**
**पश्य सञ्चयशीलः असौ धनुषा जम्बुको हतः ।। १६४ ।।**

लघुपतनक-हिरण्यकौ आहतुः- कथम् एतत् ? मन्थरः कथयति -

(विवरणम्)सम्पादनं नित्यं कर्तव्यम् । अधिकतया सम्पादनं च न कर्तव्यम्। अधिकतया सम्पादयितुम् इच्छुः लोभी भवति। लोभेन च पापम् आचरति। कष्टानि आप्नोति। अतिसञ्चयनं कृत्वा, लोभी सन् कदाचित् जम्बुकः धनुषः गुणेन /सूत्रेण / पाशेन मृतः भवति इति मन्थरकः कथयति। लघुपतनक-हिरण्यकौ जम्बुकस्य वृत्तान्तं श्रोतुम् अभिलषतः। जिज्ञासां प्रकटयतः । तदा मन्थरकः तयोः जम्बुकस्य वृत्तान्तं एवं कथयति।

## ७.३.व्याध-मृग-सर्प-शूकर - जम्बुकानां वृत्तान्तम्

७.३.१.कलेबराणां महान् सञ्चयः

(मूलम्)आसीत् कल्याणकटकवास्तव्यः भैरवः नाम व्याधः। सः च एकदा मृगम् अन्विष्यमाणः विन्ध्याटवीं गतवान्।ततः तेन व्यापादितं मृगम् आदाय गच्छता घोराकृतिः शूकरः दृष्टः। तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेण आहतः।शूकरेण अपि घनघोरगर्जनं कृत्वा,सः व्याधः मुष्कदेशे हतः, संश्छिन्नद्रुमः इव भूमौ निपपात।यतः –

**जलम्, अग्निः, विषम्, शस्त्रम्, क्षुत्, व्याधिः, पतनं गिरेः।**
**निमित्तं किञ्चित् आसाद्य, देही प्राणैः विमुच्यते।।१६५।।**

अथ तयोः पादास्फालनेन सर्पः अपि मृतः।(विवरणम्) कल्याणकटके कश्चन व्याधः वसति। तस्य च नाम भैरवः। सः व्याधः कदाचित् मृगाणाम् अन्वेषणाय विन्ध्याटवीं गच्छति। कञ्चन मृगं च व्यापादयति। हतं च मृगं भुजयोः वहन् गच्छति। तथा गच्छन् सः बलिष्ठं शूकरम्उ वराहम्, पश्यति। भुजयोः वहन्तं मृगस्य कलेबरं भूमौ क्षिपति। शरेण शूकरं प्रहरति। शरप्रहारेण शूकरः मेघः इव अतिभयङ्करं गर्जति। क्रुद्धः भवति। व्याधं मर्मप्रदेशे ताडयति। अधः पतति। प्राणान् त्यजति। व्याधः अपि छिन्नः तरुः इव भूमौ निपतति। असून् त्यजति। तथा हि – जलम्, अग्निः, विषम्, शस्त्रम्उ मरणायुधम्, क्षुत्उ बुभुक्षा, व्याधिः, गिरेः पतनम्, एषु अन्यतमं निमित्तं कृत्वा देही प्राणैः विमुक्तः भवति। अस्मिन् एव च सन्दर्भे व्याध-वराहयोः पादघट्टनेन कश्चन सर्पः अपि मृतः भवति।

**७.३.२.दीर्घरास्य आलोचना**

(मूलम्)अथ अनन्तरं दीर्घरावो नाम जम्बुकः परिभ्रमन् आहारार्थी तान् मृतान् मृग–व्याध–सर्प–शूकरान् पश्यति। अचिन्तयत् च–'अहो! अद्य महत् भोज्यं मे समुपस्थितम्। अथवा –

**अचिन्तितानि दुःखानि यथा एव आयान्ति देहिनाम्।**
**सुखानि अपि तथा मन्ये दैवम् अत्र अतिरिच्यते।१६६।**

(विवरणम्) तदनन्तरं कश्चन जम्बुकः आगच्छति। तस्य नाम दीर्घरावः। तत्रैव आहारार्थम् अन्विष्यन् परिभ्रमति। मृतान् मृग–व्याध–सर्प–शूकरान् पश्यति। 'इदानीं खाद्यं वस्तु अधिकं लब्धम्।इदम् अधिकं खाद्यं मम आनन्दं जनयति। तथाहि –मानवानां सुखानि वा, दुःखानि वा एवम् अचिन्तितानि एव सम्भवन्ति। सुख–दुःखयोः प्रसादने दैवस्यैव सर्वम् अधिकारं विद्यते। तत्र प्राणिनः किमपि कर्तुं न पारयन्ति खलु' इति चिन्तयति।

**७.३.३.अतिसञ्चयनस्य दुष्प्रभावः**

(मूलम्)तद् भवतु। एषां मांसैः मासत्रयं मे सुखेन गमिष्यति।

**मासम् एकं नरः याति, द्वौ मासौ मृग-शूकरौ।**
**अहिः एकं दिनं याति, अद्य भक्ष्यः धनुर्गुणः।। १६७ ।।**

ततः प्रथमबुभुक्षायाम् इदं निस्स्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि'इति। एवम् आलोच्य,

तथा कृते सति, छिन्ने स्नायुबन्धनं उत्पतितेन धनुषा हृदि निर्भिन्नः सः दीर्घरावः पञ्चत्वं गतः।

(विवरणम्)भवतु, इदं भाग्यम् अनुभवामि। मृतानां मृग-व्याध-सर्प-शूकराणां मांसैः त्रयः मासाः गमिष्यन्ति। व्याधस्य कलेबरं एकं मासं भोक्तुं पर्याप्तं भवति। मृग-शूकरयोः कलेबरे मासद्वयाय अलं भवतः। अयं सर्पः एक- दिनस्य कृते आहारार्थं भवति। धनुषि लग्नं रुचिहीनं स्नायुबन्धनं विद्यते खलु। इदानीं तं स्नायुबन्धनं भुक्त्वा इमं दिवसं यापयामि- इति (चिन्तयति)। धनुषः सकाशं गच्छति। धनुः परकिशीलयति। अपरस्यां कोटौ बन्धितं स्नायुं मुखे धरति। पाशं छिनत्ति च। छेदनमात्रेण एव धनुषः मुखे स्थापिता कोटिः उत्पतिता भवति। उत्पतितेन धनुषः प्रहारेण जम्बुकः हृदि निर्भिन्नः भवति। अनुपदम् एव च प्राणान् त्यजति।

**७.३.४.मितः सञ्चयः एव वरम्**

(मूलम्) अतः अहं ब्रवीमि - 'कर्तव्यः सञ्चयः नित्यम्...' इत्यादि । तथा च -

**यत् ददाति,यत् अश्नाति तत् एव धनिनः धनम्।**
**अन्ये मृतस्य क्रीडन्ति,दारैः अपि,धनैः अपि।। १६८ ।।**

किञ्च -

**यत् ददासि विशिष्टेभ्यः यत् अश्नासि दिने दिने।**
**तत् ते वित्तम् अहं मन्ये शेषं कस्य अपि रक्षसि। १६९।।**

यातु, किम् इदानीम् अतिक्रान्तोपवर्णनेन। यतः -

**न अप्राप्यम् अभिवाञ्छन्ति, नष्टं नेच्छन्ति शोचितुम्।**
**आपत्सु अपि न मुह्यन्ति, नराः पण्डितबुद्धयः ।१७०।।**

(विवरणम्) अतः = जम्बुकस्य वृत्तान्तावगमनात्, अहम् (उमन्थरकः) लोभवर्धकः अतिसञ्चयः नैव कर्तव्यः इति कथयामि इति, कच्छपः लघुपतनक - हिरण्यकौ वदति।

किञ्च वस्तुतः दानम्, भोगः इति द्वौ एव धनिनः धनम् भवति। अत्र दानं नाम परेषाम् उपकाराय कृते व्ययकरणम्, तत् पुण्यं सम्पादयति। पुण्यं च परत्र सुखाय कल्पते। भोगः नाम अनुभवः। तत् इह लोके सुखं जनयति। इह लोके परलोके च उपकारकौ दान-भोगौ एव मानवस्य वास्तविकं धनं भवति। तत् भिन्नं धनम्, धनम् इति वक्तुं न शक्यते। दान-भोगातिरिक्तं भार्या-पुत्रादिकं यत् भाग्यं विद्यते, तत्,मरणानन्तरम् अपमार्गे नीयते। दान-भोगावशिष्टेन धनेन, दारैश्च क्रीडन्ति। योग्यानां कृते उपकाराय यत् व्ययं क्रियते, सुखजीवनाय यत् उपयुज्यते तदेव वास्तविकं धनं भवति। तदतिरिक्तप्रयोजनाय मानवः धनं नैव रक्षेत्। भवतु, गतं विचिन्त्य किं प्रयोजनम् ? विवेकशालिनः बुद्धिमन्तः मानवाः प्राप्तुम् अयोग्यं वा, असाध्यं वा वस्तु न अभिवाञ्छन्ति। नष्टं वस्तु उद्दिश्य शोचितुं नेच्छन्ति। कष्टकालेषु अपि कातराः न भवन्ति खलु इति मन्थरकः हिरण्यकं सान्त्वयति।

**स्वावलोकनप्रश्नाः**

१) भैरवः कः ?

२) किं निमित्तम् आसाद्य देही प्राणैः विमुच्यते ?

३) दीर्घरावः कीदृशः ?

४) धनिनः धनं किम् ?

## ७.४.उपसंहारः

एवम् अस्यां कथायां महान् कलेबराणां सञ्चयः, दीर्घरास्य आलोचना ,शृगालस्य लुब्धता,अतिसञ्चयनस्य दुष्प्रभावः, मितः सञ्चयस्य श्रेयोदायकत्वम् इति एते विषयाः प्रस्तुताः। एते च लुब्धतां हातुम्, मितं सम्पादयितुं च आवश्यकीं विवेचनां दातुं प्रभवन्ति।

## ७.५.अभ्यासः

अ).'कर्तव्यः सञ्चयो नित्यम्, कर्तव्यः नातिसञ्चयः।
पश्य सञ्चयशीलः असौ धनुषा जम्बुको हतः 'कथं, विशदयत ?

इ).लुब्धसृगालवृत्तान्तं वर्णयत ?

# UNIT- VIII
# मन्थरकवृत्तान्तम्

संरचना


८.०.परिचयः
८.१.लक्ष्याणि
८.२.मन्थरकवृत्तान्तम्
८.२.१.काक-मन्थर-मूषिकाणां भीतिः
८.२.२.मृगस्य स्वागतम्,मित्रत्वेनस्वीकरणं च
८.२.३.भयकारणं किम् ?
८.२.४.भयकारणस्य निवेदनम्
८.२.५.मूषिकाशयस्य विवरणम्
८.२.६.तुङ्गबल-लावण्यवत्योः वृत्तान्तम्
८.२.६.१. कर्पूरतिलकस्य वृत्तान्तम्
८.२.७. मन्थरकस्य दुःखम्
८.२.७.१.स्वाभाविकस्नेहस्य महत्त्वम्
८.२.८.विधेः बलीयस्त्वम्
८.२.९.मित्रस्य महत्त्वम्
८.२.१०.मन्थरकसंरक्षणस्य उपायरचनम्
८.२.११.व्याधस्य उभयभ्रष्टत्वम्
८.३.कथायाः उपसंहारः
८.४.पाठकानां रचयितुः शुभाकाङ्क्षाः
८.५. मित्रलाभस्य उपसंहारः
८.६.अभ्यासः


## ८.०.परिचयः

प्रपञ्चप्रख्यातेषु कथाकाव्येषु हितोपदेशः अन्यतमः। अस्य कर्ता नारायणपण्डितः। तत्र मित्रलाभ-मित्रभेद- सन्धि-विग्रहाख्याः चत्वारः भागाः वर्तन्ते। प्रकृते इयं कथा मित्रलाभात् स्वीकृता। एयं च मन्थरकवृत्तान्तं बोधयति। अत्र च मन्थरस्य (कच्छपस्य) सुलभकोपः, तस्य पर्यवसानम्, मित्राणां विषादः, व्याधात् मन्थरकस्य रक्षणाय मित्राणां उपायरचनम्, मन्थरकस्य रक्षणम्, व्याधस्य उभयभ्रष्टत्वम्, इत्येवमात्मकं मन्थरकस्य वृत्तान्तम्, अभि-वर्णितम्। अत्र च तुङ्गबल-लावण्यवत्योः वृत्तान्तम्, तत्रापि प्रसङ्गवशात्, कर्पूरतिलकवृत्तान्तं च प्रस्तावितम्।

## ८.१.लक्ष्याणि

मानवः अत्युत्तमः प्राणी। तस्य सौकर्यकारि शरीरम् अस्ति। प्रत्यक्षज्ञानसम्पादनाय ज्ञानेन्द्रियाणि, शरीरस्य कार्यनिर्वहणाय कर्मेन्द्रियाणि, आलोचनाय मतिः, सुख-दुःखानुभवाय मनः इत्येवं सामग्री वर्तते। परं एतां सामग्रीं यः अनुकूलतया सद्विनियोगं करोति, तस्यैव उत्तमत्वम्। यः प्रतिकूलतया विनियोगं करोति सः उत्तमत्वाय अर्हः न भवति। शरीरम् आरोग्यतया स्थापनीयम्, इन्द्रियाणि वशीकर्तव्यानि, मनसः चाञ्चल्यं वारणीयम्,एवं यस्य भवति, सः उत्तमः भवति। यत्र मनः चाञ्चल्यम् अविहाय, विकारपूर्णं भवति, तदा काम- क्रोध- लोभ-मोह- मद- मात्सर्य- आदीनाम् आवासं भवति। तदा पुरुषस्य प्रवर्तनम् उद्रेकपूर्णं भवति। आन्दोलितं भवति। आवेशपूर्णं, आवेगयुक्तं च भवति। तस्य च पर्यवसानानि तीव्राणि भवन्ति। तानि अपि स्वयम् एव अनुभवितव्यानि भवन्ति। तदा तादृशानां मित्राण्येव शरणं भवन्ति। तान् मित्राण्येव उपकुर्वन्ति, मित्राण्येव रक्षन्ति च। न पुनः इतराणि, तत्कथम् इत्यंशं निरूपयितुम् उद्दिष्टः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन -

- श्रवण,पठन,भाषण,लेखन,कौशलानां प्रावीण्यम् अधिगन्तुं समर्थः भवति।
- मन्थरकस्य सुलभकोपं पठितुं पारयति।
- सुलभकोपस्य दुष्परिणामान् भाषितुं प्रभवति।
- हिरण्यकस्य विलापम् अवगच्छति,लिखितुं पारयति च।
- मन्थरकस्य रक्षणे मित्राणां निबद्धतां प्रति परिचितः भवति।
- व्याधस्य उभयभ्रष्टत्वम् अवगन्तुं समर्थः भवति।

## ८.२.मन्थरकवृत्तान्तम्

८.२.१काक-मन्थर-मूषिकाणां भीतिः

(मूलम्)अथ कदाचित् चित्राङ्गः नाम मृगः केन अपि त्रासितः तत्र आगत्य मिलितः। ततः पश्चात् आयान्तं मृगम् अवलोक्य, भयं सञ्चिन्त्य, मन्थरः जलं प्रविष्टः, मूषिकश्च विवरं गतः, काकः अपि उड्डीय वृक्षम् आरूढः। ततः लघुपतनकेन सुदूरं निरूप्य,भयहेतुः न कोऽपि(कः+अपि) आयाति इति आलोचितम्। पश्चात् तद्वचनात् आगत्य, पुनः सर्वे मिलित्वा तत्रैव उपविष्टाः।

(विवरणम्) कर्पूराभिधाने सरसि लघुपतनक-हिरण्यक-मन्थरकाः त्रयः सविनोदं कालं यापयन्ति। एवं सुखेन कालं प्रचलन् वर्तते। एकदा कश्चन मृगः तत्र आगच्छति।तस्य च नाम चित्राङ्गः। सः केनापि त्रासितः भवति। भयेन कर्पूराभिधानस्य तीरम् आगच्छति। लघुपतनक-हिरण्यक-मन्थरकान् मिलति।लघुपतनक- हिरण्यक - मन्थरकाः मृगं पश्यन्ति। तस्मात् प्राणभयं चिन्तयन्ति। अनुपदम् एव मन्थरकः जलं प्रविशति। हिरण्यकः रन्ध्रं गच्छति। लघुपतनकः ऊर्ध्वं डयति । वृक्षम् अधिरोहति। काकः सुदूरं पश्यति। भयस्य कारणं किमपि नास्ति इति मित्राणां कथयति। मित्राणि च काकस्य वचः विश्वसन्ति। पुनः

बहिः आगच्छन्ति। एकत्र उपविशन्ति।

### ८.२.२.मृगस्य स्वागतम्,मित्रत्वेनस्वीकरणं च

(मूलम् )मन्थरकेण उक्तम्-'भद्रम्,मृग!स्वागतम्।स्वेच्छया उदकादि-आहारः अनुभूयताम्। अत्र अवस्थानेन वनम् इदं सनाथीक्रियताम्'। चित्राङ्गः ब्रूते- 'लुब्धकत्रासितः अहं भवतां शरणम् आगतः। भवद्भिः सह सख्यम् इच्छामि'इति। हिरण्यकः अवदत् - 'मित्रत्वं तावत् अस्माभिः सह भवता अयत्नेन मिलितम्। यतः -

**औरसम्,कृतसम्बन्धम्, तथा वंशक्रमागतम्।**
**रक्षितं व्यसनेभ्यश्च, मित्रं ज्ञेयं चतुर्विधम्।। १९५ ।।**

तत् अत्र भवता स्वगृहनिर्विशेषं स्थीयताम्। तत् श्रुत्वा मृगः सानन्दः भूत्वा,स्वेच्छाहारं कृत्वा,पानीयं पीत्वा,जलासन्न-तरूच्छायायाम् उपविष्टः।

(विवरणम् ) मन्थरकः मृगम् आदरेण आह्वयति। स्वागतं वदति। स्वेच्छया उदकम् आहारञ्च उपभोक्तुं विज्ञापयति। निस्सङ्कोचं चरितुम् अवकाशं कल्पयति। अस्मिन् (वने) स्थित्वा, वनं सनाथं कर्तुं पृच्छति। मृगः मन्थरकस्य वचः शृणोति। अहम् (चित्राङ्गः) केन अपि लुब्धकेन भापितः अस्मि। भीतः सन्, भवतः लघुपतनक- हिरण्यक- मन्थरकान् शरणं प्राप्तः। अहं भवतां स्नेहम् इच्छामि इति वदति। लघुपतनक- हिरण्यक- मन्थरकैः अस्माभिः, मृगेण भवता, सख्यम् अयत्नेन लब्धम्। तथा हि - स्नेहितः अ).औरसः (°É¼ÉÉ), <).°É¨ÉxvÉÉÉEòÉ& (EòÉjÉÉ) =).´ÉÆ¶ÉGòàÉÉ + ÉÉ& (Family Friend) ऋ).आपद् उद्धारकः इति चतुर्विधः भवति। वयं सर्वे अपि भावसारूप्यं प्राप्य मैत्रीं प्राप्ताः स्मः। अतः इमं प्रदेशं स्वगृहं भावयतु,स्वगृहे एव समाचरतु इति वदति।मृगः तत् वचः शृणोति। आनन्दितः भवति। मृगः भुक्त्वा, पीत्वा, कदाचित् जलानाम् आसन्नतरुछायासु उपविशति।

### ८.२.३.भयकारणं किम् ?

(मूलम् )अथ मन्थरेण उक्तम् - 'सखे! मृग! एतस्मिन् निर्जने वने केन त्रासितः असि ?। कदाचित् किं व्याधाः सञ्चरन्ति?।

(विवरणम् )मृगः कदाचित् जलानाम् आसन्नतरुछायासु उपविशति। मन्थरकः तत्र आगच्छति। 'मित्र! मृग ! चित्राङ्ग !किम् अत्र त्वं सुखम् अनुभवसि ? प्रदेशम् इमं रोचसे किम् ? भवतु, मम कृते इमं कथयतु ! इदम् अरण्यं निर्जनं खलु। जनसञ्चारहीनं विद्यते किल। एतस्मिन् निर्जने वने कः त्वां त्रासयति ? किम् अत्र अरण्ये व्याधाः अपि सञ्चरन्ति ? इति मृगं त्रासस्य कारणं पृच्छति।

### ८.२.४.भयकारणस्य निवेदनम्

(मूलम् )मृगेण उक्तम्-'अस्ति कलिङ्गविषये रुक्माङ्गदः नाम नरपतिः।सः च दिग्विजय-व्यापारक्रमेण आगत्य,चन्द्रभागा-नदीतीरे समावासितकटकः वर्तते। प्रातश्च तेन तत्र आगत्य,कर्पूरसरः समीपे भवितव्यम् इति व्याधानां मुखात् किंवदन्ती श्रूयते। तत्

अत्रापि प्रातः अवस्थानं भयहेतुकम् इति आलोच्य यथावसरकार्यम् आर भ्यताम् 'इति।

(विवरणम् ) मृगः भयस्य कारणम् एवं निवेदयति। कलिङ्गानां राज्येषु रुक्माङ्गदः इति कश्चन राजा अस्ति। सः जौत्रयात्राम् आचरति। तस्मिन् एव भागतया रुक्माङ्गदः अद्य स्वसैन्यं चन्द्रभागानद्याः तीरे संस्थापयति। बहुशः श्वः प्रातः रुक्माङ्गदः ससैन्यं अत्र कर्पूरसरः समीपम् आगच्छति इति अहं व्याधमुखात् श्रुतवान् अस्मि। तस्मात् अयम् अपि प्रदेशः न तथा श्रेयस्करः विद्यते। अतः अत्र अवस्थानम् अपि न समीचीनम् । सौकर्यवन्तं प्रदेशं चिनुमः। तत्र गच्छामः।तदर्थं प्रयत्नं कुर्मः इति मृगः मन्थरकं कथयति।

भयनिवारणोपायचिन्तनम्

(मूलम् )तत् श्रुत्वा कूर्मः सभयम् आह--जलाशयान्तरं गच्छामि। काक-मृगौ अपि उक्तवन्तौ - 'एवम् अस्तु' । ततः हिरण्यकः विहस्य आह-- 'जलाशयान्तरे प्राप्ते मन्थरस्य कुशलम् । स्थले गच्छतः कः प्रतीकारः ? यतः --

**अम्भांसि जलजन्तूनाम्, दुर्गं दुर्गनिवसिनाम्।**
**स्वभूमिः श्वापदादीनाम् , राज्ञां मन्त्री परं बलम् ।। १९६ ।।**

(विवरणम् ) मन्थरकः तत् शृणोति। भयम् उपैति। तर्हि कूर्मः अहं जलाशयं प्रविशामि वदति। काक-मृगौ अपि तथैव भवतु इति वदतः।हिरण्यकः अपि स्मितं करोति। जलाशयेषु प्रवेशेन जलचरः मन्थरकः कुशलः भवति। परं भूमिचराणां गतिः का ? स्थले गच्छतः प्रतीकारः कः ? अम्भांसि उ पयांसि, जलजन्तूनांउ जलचराणां सुरक्षितानि भवन्ति। दुर्गम् उप्रहरी भित्तिः दुर्गनिवसिनां क्षेमं विदधाति। स्वभूमिः पशूनां सौकर्यकरः भवति। मन्त्री राज्ञां परं बलं भवति।

**स्वावलोकनप्रश्नाः**

१).चित्राङ्गः कः ?

२).'मित्रं ज्ञेयं चतुर्विधम्' किं तत् चतुर्विधम् ?

३).जलजन्तूनां सुरक्षितानि प्रान्तानि कानि

४).मन्त्री केषां परं बलम्

**८.२.५.मूषिकाशयस्य विवरणम्**

(मूलम्)सखे! लघुपतनक। अनेन उपदेशेन तथा भवितव्यम्,

**स्वयं वीक्ष्य यथा वध्वाः पीडितं कुचकुट्मलम्।**
**वणिक्पुत्रः अभवत् दुःखी त्वं तथैव भविष्यसि ।। १९७ ।।**

ते ऊचुः - कथम् एतत् ? हिरण्यकः कथयति -

(मूलम्)मित्र ! लघुपतनक ! मन्थरकस्य उक्तेः-- यथा स्वकान्तायाः पीडितं स्तनयुगलं साक्षात् दृष्ट्वा कश्चन वैश्यपुत्रः अमितं दुखम् आप्नोति तथा भवान् अपि दुखम् अवाप्स्यसि इति अयं भावः स्यात् इति मन्थरकः कथयति। लघुपतनक-मन्थरकौ तत् कथम् इति वदतः।

### ८.२.६.तुङ्गबल-लावण्यवत्योः वृत्तान्तम्

(विवरणम्) कान्यकुब्जेषु राज्येषु वीरसेनः नाम राजा अस्ति। सः वीरपुरनाम्नि नगरे तुङ्गबलनामानं राजपुत्रं भोगपतिं करोति। सः च महाधनः, तरुणः च। एकदा स्वनगरे भ्राम्यन् अतिप्रौढं यौवनां लावण्यवतीनाम्नीं वणिक्-पुत्रस्य भार्यां पश्यति। तुङ्गबलः भ्रमणात् अनन्तरं स्वभवनं गच्छति । लावण्यवतीम् एव चिन्तयति। स्मरेण आकुलमतिः भवति । तस्याः कृते दूतीं प्रेषियति। लावण्यवती अपि तुङ्गबलस्य दर्शनक्षणात् मनसि वैक्लब्यम् आप्नोति। स्मरस्य शरेण प्रहृता भवति। जर्जरित-हृदया तुङ्गबले तदेकमानसा च भवति। दूत्याः वचनं शृणोति। लावण्यवती 'अहं पतिव्रता, परपुरुषाभिगमनम् अधर्मः। पतिव्रता अहं कथम् एतस्मिन् अधर्मे पतिलङ्घनं आचरिष्यामि ? मम भर्ता यत् आदिशति, तत् एव अहम् अविचारितम् आचरिष्यामि 'इति दूतीं
वदति। दूती अपि लावण्यवत्याः कथनं सत्यं चिन्तयति। इमम् एव विषयं दूती तुङ्गबलाय निवेदयति। तुङ्गबलः तत् शृणोति। लावण्यवत्याः अधिगमनं प्रति आशां त्यजति। मदनस्य बाधेन तप्तहृदयः भवति। तां विना कथम् अहं जीविष्यामि' इति दूतीं पृच्छति। भर्ता एव यदि स्वयं अनीय लावण्यवतीं समर्पयति तदा एव तस्याः अभिगमनं भवतः साध्यं भवति, इति दूती सारांशतः वदति। भर्ता एव स्वयं लावण्यवतीम् अनीय कथं समर्पयति इति तुङ्गबलः पृच्छति। उपायः क्रियताम् । उपायेन सर्वं साध्यं भवति। उपायेन यत् शक्यं भवति, तत् पराक्रमेण अपि साधयितुं न शक्यते। अल्पीयान् शृगालः उपायेनैव महीयांसं गजं हन्ति खलु, इति दूती तुङ्गबलं कथयति। तुङ्गबलः उपायेन यत् साध्यं तत् पराक्रमेण कथं साधयितुं न शक्यते ? इति ज्ञातुम् इच्छुः भवति। तदा दूती उपायेन यत् साध्यं तत् पराक्रमेण अपि साधयितुं न शक्यते इति विषयबोधिकां कथाम् एवं कथयति।

### ८.२.६.१.कर्पूरतिलक वृत्तान्तम्

(मूलम् )ब्रह्मारण्ये कर्पूरतिलकः नाम हस्ती अस्ति। तम् अवलोक्य सर्वे शृगालाः -'अयं केन अपि उपायेन म्रियते तदा अस्माकम् एतत् देहेन मासचतुष्टयस्य भोजनं भविष्यति'इति चिन्तयन्ति। तदा'मया बुद्धिप्रभावात् अस्य मरणं साधयितव्यम्'इति एकः वृद्धशृगालः प्रतिजानाति। अनुपदम् एव स वञ्चकः कर्पूरतिलकसमीपं गच्छति साष्टाङ्ग पातं प्रणमति।'देव! दृष्टिप्रसादं कुरु 'इति वक्तुम् आरभते। कस्त्वम् ? कुतः समायातः ? इति हस्ती ब्रवीति। 'जम्बुकः अहम्। सर्वैः वनवासिभिः पशुभिः मिलित्वा भवत् सकाशं प्रस्थापितः,यत् विना राज्ञा अवस्थातुं न युक्तम्, तत् अत्र अटवीराज्ये अभिषेक्तुं

भवान् सर्व-स्वामिगुणोपेतः निरूपितः,तत् यथा लग्नवेला न विचलति तथा कृत्वा सत्वरम् आगम्यतां देवेन ' इति उक्त्वा उत्थाय चलति।ततः असौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन् महापङ्के निमज्जति। ततः 'सखे! शृगाल! किम् अधुना विधेयम्, पङ्के निपतितः अहं म्रिये । परावृत्य पश्य'इति हस्ती शृगालंम् आह्वयति।शृगालः च परिहसन् 'देव! मम पुच्छकावलम्बनं कृत्वा उत्तिष्ठ। यत् मद्वि धस्य वचसि त्वया प्रत्ययः कृतः तत् अनुभूयताम् अशरणं दुःखम् इति वदति ।ततः महापङ्के निमग्नः हस्ती शृगालैः भक्षितः।अतः अहं ब्रवीमि – 'उपायेन हि यत् शक्यम्... 'इत्यादि।एवम् आलोच्य चारुदत्तं सेवकतया नियोजयति।गौरीव्रतव्याजेन चारुदत्तस्य भार्यां स्वयमेव समर्पणीयत्वेन उपायं करोति।ततश्च तुङ्गबलः लावण्यवतीं अनुभवति। एवम् एव मन्थरकविषये अपि प्रचलति इति मूषिकः परिहासार्थं वदति।

(विवरणम् ) ब्रह्मारण्येषु कश्चन हस्ती अस्ति। तस्य नाम कर्पूरतिलकः। ब्रह्मारण्येषु स्थिताः शृगालाः सर्वे कदाचित् कर्पूरतिलकं पश्यन्ति। शृगालाः तस्य मांसं खादितुम् अभिलषन्ति। यदि अयं म्रियते तदा एतत् कलेबरं मासचतुष्टयं यावत् शृगालानाम् अस्माकम् भोजनाय पर्याप्तं भवति इति स्वप्नम् अनुभवन्ति। स्वेषां स्वप्नं साकारं कर्तुं शृगालेषु अन्यतमः वृद्धः शृगालः –'अहं बुद्धिचातुर्येण कर्पूरतिलकस्य मरणं साधयामि इति प्रतिजानातिउ शपथं करोति। तत् क्षणम् एव वृद्धः शृगालः कर्पूरतिलकसमीपं गच्छति । अष्टभिः अङ्गैः प्रणमति । 'देव ! अस्मासु दृष्टिम् अनुगृह्णातु इति कर्पूतिलकम् उन्मुखीकरोति। हस्ती अपि 'त्वं कः ? कस्मात् प्रदेशात् आगतः ' वृद्धशृगालं पृच्छति। 'जम्बुकः अहम्।अस्मिन् एव अरण्ये वसामि। वनवासिनः सर्वे जन्तवः मिलित्वा मां भवतः सकाशं प्रस्थापितवन्तः। ते सर्वे मद्द्वारा तत्र भवन्तं विज्ञापयन्ति। इदम् अरण्यं राजानं विना अवस्थातुं न युक्तम्,भवान् च सर्व-स्वामिगुणोपेतः इति अस्माभिः निर्धारितः असि। तस्मात् तत्र भवन्तं अटवीराज्ये अभिषेक्तुं निर्णयं कृतवन्तः। मुहूर्तं च निर्णीतम् । तत् यथा लग्नवेला न विचलति तथा भवन्तः त्वरया आगच्छन्तु इति भवन्तं सन्दिशन्ति। हस्ती वृद्धशृगालस्य वचनं शृणोति। तस्य वचसि विश्वस्तः भवति। राज्यस्य लोभेन आकृष्टः च भवति। उत्तिष्ठति, वृद्धशृगालम् अनुसृत्य चलति। शृगालः धावन् शीघ्रं चलति। कर्पूरतिलकः अपि तथैव शृगालवर्त्मना धावन् महापङ्के निमज्जति। महापङ्के निमग्नः हस्ती 'सखे ! शृगाल ! अहं महापङ्के निमग्नः अस्मि। अहम् इदानीं किं करोमि ? पङ्के निपतितः अहं म्रिये । एकवारं परावृत्य मां पश्यतु ' इति शृगालम् उपायं पृच्छति।

वञ्चकः वृद्धशृगालः च हस्तिनं पश्यति। परिहसन् 'देव ! मम पुच्छम् आधारतया स्वीकरोतु। उत्तिष्ठतु । यस्मात् मादृशस्य अल्पस्य वचसि भवान् विश्वासम् आप्तः,तस्मात् कारणात् अशरणं दुःखम् अनुभवतु इति वदति । वृद्धशृगालस्य वचः शृण्वन् एव हस्ती महापङ्के निमज्जति। क्रमशः प्राणान् त्यजति। अनन्तरं शृगालैः भक्षितः अपि भवति।

अतः अहं (कुट्टिनी) ' उपायेन हि यत् शक्यं न तत् शक्यं पराक्रमैः 'इति कथयामि। तुङ्गबलः कुट्टिन्या कथितं कर्पूरतिलकवृत्तान्तम् अवगच्छति। उपायं चिन्तयति। लावण्यवत्याः भर्तारं चारुदत्तं आस्थाने सेवकतया नियोजयति। गौरीव्रतव्याजेन चारुदत्तस्य भार्यां स्वयमेव समर्पणीयत्वेन उपायम् आरचयति। ततश्च तुङ्गबलः लावण्यवतीं अनुभवति। एवम् एव मन्थरकविषये अपि प्रचलति इति मूषिकः परिहासार्थं वदति।

### ८.२.६.२.हितवचनावधीरणात् मन्थरकस्य कष्टानि

(मूलम् ) तत् हितवचनम् अवधीर्य महता भयेन विमुग्धः इव तं जलाशयम् उत्सृज्य मन्थरः चलितः। ते अपि हिरण्यकादयः स्नेहात् अनिष्टं शङ्कमानाः मन्थरकम् अनुगच्छन्ति। ततः स्थले गच्छन् केन अपि व्याधेन काननं पर्यटता मन्थरः प्राप्तः।प्राप्य तं गृहीत्वा,उत्थाप्य धनुषि बद्ध्वा भ्रमन्,क्लेशात् क्षुत्-पिपासाकुलः स्वगृह- अभिमुखं चलितः।

(विवरणम्) सः मन्थरकः मित्राणां हितवचनम् अपार्थं करोति। एकाकित्वम् (Loneliness/ Isolation) अनुभवति। कातरताम् उपैति। मोहेन आविष्टः भवति। तत् जलाशयम् उत्सृजति। यत्र कुत्रापि गन्तुं प्रस्थितः भवति। मन्थरकस्य सुलभकोपम् (Short temper ) न तीव्रतया स्वीकुर्वन्ति। मन्थरकस्य कोऽपि प्रमादः सम्भवतीति स्नेहात् भयम् आप्नुवन्ति। मन्थरकम् एव अनुसरन्ति। तत्र स्थलेउ भूमौ, अरण्यं पर्यटन् कश्चन व्याधः विद्यते । सः तं मन्थरकं गृह्णाति। धनुषि बध्नाति। व्याधः किञ्चित् कालं काननं अटति। अलसितः भवति। क्षुधा पिपासया च आकुलितः सन् गृहं गन्तुं सिद्धः भवति।

### ८.२.७.मृग-वायस-मूषकानां परं विषादः - स्वाभाविकस्नेहस्य महत्त्वम्

(मूलम्) अथ मृग-वायस-मूषकाः परं विषादं गच्छन्तः तम् अनुजग्मुः। ततः हिरण्यकः विलपति-

**एकस्य दुःखस्य न यावत् अन्तं गच्छामि अहं पारम् इव अर्णवस्य।**
**तावत् द्वितीयं समुपस्थितं मे छिद्रेषु अनर्थाः बहुलीभवन्ति।। २०८ ।।**
**स्वाभाविकं तु यत् मित्रं भाग्येनैव अभिजायते।**
**तत् अकृत्रिमसौहार्दम् आपत्स्वपि न मुञ्चति ।। २०९ ।।**
**न मातरि,न दारेषु,न सोदर्ये,न च आत्मजे।**
**विश्वासः तादृशः पुंसाम्, यादृक् मित्रे स्वभावजे ।। २१० ।।**

इति मुहुः विचिन्त्य, अहो! दुर्दैवम् ,

(विवरणम्) चित्राङ्गद--लघुपतनक--हिरण्यकादयः मन्थरकम् एव अनुसृत्य आगच्छन्ति।व्याधेन मन्थरकस्य ग्रहणं दृष्ट्वा भृशं शोकमग्नाः भवन्ति। तत्र हिरण्यकः एवं विलपति। समुद्रे ऊर्मयः भवन्ति। एका ऊर्मिः यावत् तीरं न गच्छति तावत् एव द्वितीया ऊर्मिः उपजाता भवति। एवम् एव वयम् , एकस्य दुःखस्य यावत् अन्तं गच्छामः तावदेव , अन्यत् द्वितीयं दुःखम् उपस्थितं भवति । तथाहि- विपत्तिषु अनर्थाःउ अवाञ्छनीयाः

घटनाः, बहुलीभवन्ति खलु।

भावसारूप्यं नाम अभिप्रायेषु अनुकूलता। साधारणतः अभिप्रायेषु अनुकूलमनस्कता मैत्रीम् उत्पादयति। तादृशी एव मैत्री सहजा भवति। सा च पुण्यशालिनः भाग्यवशात् जायते। भाग्यवशात् जायमाना सहजा एषा मैत्री मित्रम् आपत्स्वपि न त्यजति।

भाग्यवशात् सम्पन्ने सहजे मित्रे यादृशः विश्वासः सञ्जायते, तादृशः विश्वासः पुंसां, मातरि वा, भार्यायां वा, भ्रातरि वा, पुत्रे वा नैव जायते इति एवं बहु विचिन्तितवान् अस्मि। एतत् सर्वं मम दुरदृष्टम् ,कर्मणः फलम् अवश्यम् अनुभोक्तव्यं भवति खलु।

**८.२.८.विधेः बलीयस्त्वम्**

(मूलम्)यतः –

**स्वकर्म-सन्तान-विचेष्टितानि, कालान्तर-आवर्ति-शुभ-अशुभानि ।**
**इहैव दृष्टानि मयैव तानि, जन्मन्तराणि इव दशान्तराणि ।। २११ ।।**

अथवा इत्थम् एव एतत् –

**कायः सन्निहित-अपायः,सम्पदः पदम् आपदाम्।**
**समागमाः सापगमाः सर्वम् उत्पादि भङ्गुरम् ।। २१२।।**

(विवरणम्) यतः हि – स्वेन आचरितं पुण्यं वा पापं वा कर्म इति उच्यते। पुरुषस्य कर्मणः विस्तृतिः अपि अधिका वर्तते। तस्य विस्तृतिकर्मणः विन्यासाः विशेषाः भवन्ति। अनेकजन्मसु, अनेकासु अवस्थासु च आचरितानि शुभानि अशुभानि च कर्माणि बहूनि सन्ति। तेषां फलानि अवश्यम् अत्रैव अनुभोक्तव्यानि एव इति बहु दुःखितः अस्मि। अथवा एतत् सर्वम् अपि सहजम् एव खलु। यतः हि इदं शरीरम् सम्पदां निलयं भवति। आपदां च आस्पदं भवति। अस्मिन् च शरीरे बहवः समागमाः सम्भवन्ति। बहवश्च अपगमाश्च प्रचलन्ति। एतादृशम् इदं शरीरम् अनित्यम्। अस्य शरीरस्य सुख-दुःखे, तमस्-ज्योतिषी, मान-अवमानौ एतादृशौ द्वन्द्वौ सहजविषयौ । अत्र तीव्रचिन्तनं वृथा इति हिरण्यकः विलपति।।

**८.२.९.मित्रस्य महत्त्वम्**

(मूलम्)पुनः विमृश्य आह –

**शोक-अराति-भय-त्राणम्,प्रीति-विस्रम्भ-भाजनम्।**
**केन सन्तम् इदं सृष्टम्,मित्रम् इति अक्षरद्वयम्।। २१३ ।।**

किञ्च –

**मित्रं प्रीतिरसायनम्,नयनयोः आनन्दनं चेतसः,**
**पात्रं यत् सुख-दुःखयोः सह भवेत् मित्रेण तत् दुर्लभम्।**
**ये च अन्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलाः,**
**ते सर्वत्र मिलन्ति,तत्त्वनिकषग्रावा तु तेषां विपत्। २१४।**

इति बहु विलप्य हिरण्यकः चित्राङ्ग-लघुपतनकौ आह–'यावत् अयं व्याधः वनात्

निस्सरति,तावत् मन्थरं मोचयितुं यत्नः क्रियताम्‘इति।

(विवरणम्) एवं हिरण्यकः चिन्तितम् एव पुनः पुनः चिन्तयति। अनेकत्र सञ्चरति। प्राणिनां जीवने, मैत्रीसमम् उपकरणम् अन्यत् न भवति । यतः हि - मित्रं शोकशत्रूणां भयात् परिरक्षति। प्रीतेः विस्रम्भस्य च पात्रं भवति। एतादृशं महत्त्वपूर्णम्, स्वच्छम्, समीचीनम्, मित्रम् इति अक्षरद्वयं येन वा सृष्टं, सः धन्यः खलु। किञ्च -मित्रं नयनयोः प्रीतिरसायनं भवति। चेतसः आनन्दं ददाति। सुख-दुःखयोः समं व्यवहरति। एतादृशं मित्रं सुलभतया न लभामहे । समृद्धिसमये द्रव्याभिलाषाकुलाः अन्ये सुहृदः तु सर्वत्र मिलन्ति एव । अतः विपदः सन्मित्राणां तत्त्वपरीक्षणाय स्थिताः निकषग्रावाः भवन्ति इति मित्राणां प्राशस्त्यं सम्यक् अवगच्छति। ततः मन्थरकस्य प्राणानां प्रमादम् आशङ्क्य बहु विलपति। वनात् व्याधस्य निस्सरणात् पूर्वम् एव मन्थरकः व्याधात् मोचयितव्यः अस्ति , इति हिरण्यकः, चित्राङ्ग-लघुपतनकौ वदति। ।

**स्वावलोकनप्रश्नाः**

१).स्वाभाविकं मित्रं कथम् उपजायते ?

२).स्वाभावजे मित्रे पुंसां विश्वासः कीदृशः ?

३).मित्रम् इति अक्षरद्वयं कीदृशम् ?

४).मित्राणां विपत् कीदृशी भवति ?

### ८.२.१०.मन्थरकसंरक्षणस्य उपायरचनम्

( मूलम् )तौ ऊचतुः–‘सत्वरं कार्यम् उच्यताम्‘इति। हिरण्यकः ब्रूते–‘चित्राङ्गः जलसमीपं गत्वा मृतम् इव आत्मानं दर्शयतु। काकश्च तस्य उपरि स्थित्वा चञ्चा किमपि विलिखतु। नूनम् अनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना सत्वरं गन्तव्यम्। ततः अहं मन्थरस्य बन्धनं छेत्स्यामि। सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम्‘। चित्राङ्ग-लघुपतनकाभ्यां शीघ्रं गत्वा,तथा अनुष्ठिते सति,सः व्याधः श्रान्तः पानीयं पीत्वा तरोः अधस्तात्उपविष्टः तथाविधं मृगम् अपश्यत् । ततः कर्तरिकाम् आदाय प्रहृष्टमनाः मृगान्तिकं चलितः। तत्रान्तरेहिरण्यकेन आगत्य मन्थरस्य बन्धनं छिन्नम्।

(विवरणम्) चित्राङ्ग-लघुपतनकौ अपि ’ त्वरया मन्थरकस्य संरक्षणाय उपायं कथयतु ’ इति हिरण्यकं पृच्छतः। हिरण्यकं मन्थरकं संरक्षितुम् उपायम् एवं कथयति । ‘चित्राङ्गः जलस्य समीपं गच्छति। मृतम् इव आत्मानं दर्शयति । काकश्च तस्य उपरि तिष्ठति । चञ्चा किमपि विलिखति । लुब्धकः = व्याधः, एतं दृश्यं पश्यति । हरिणेन

आकृष्टः भवति । व्याधः निश्चयेन कच्छपं तत्रैव स्थापयति । मृगमांसार्थी सन् व्याधः सत्वरं हरिणस्य कृते गच्छति । अत्रान्तरे (अहं) हिरण्यकः मन्थरकस्य बन्धनं छेत्स्यति । व्याधः उ लुब्धकः यदा सन्निहितः भवति, चित्राङ्ग-लघुपतनकौ ( भवन्तौ ) पलायताम् ' । चित्राङ्ग-लघुपतनकौ हिरण्यकस्य उपायं शृणुतः । शीघ्रं जलस्य समीपं गच्छतः। हिरण्यकेन उक्तम् अनुतिष्ठतः।श्रान्तः सन् व्याधः पानीयं पिबति । तरोः अधस्तात् उपविष्टः विश्रान्तिं स्वीकरोति। तदैव जलाशयस्य तीरे , उपरि चञ्च्वा लिखन्तम्, मृतम् इव पतितं मृगं पश्यति । प्रहृष्टमनाः भवति। अनुपदम् एव व्याधः कर्तरिकाम् आददाति। मृगस्य अन्तिकं चलति। अत्रान्तरे हिरण्यकः मन्थरकस्य समीपम् आगच्छति। मन्थरकं बन्धनात् मोचयति। स्वमित्रं परिरक्षति च।

**८.२.११.व्याधस्य उभयभ्रष्टत्वम्**

(मूलम्) स कूर्मः सत्वरं जलाशयं प्रविवेश । सः मृगः आसन्नं तं व्याधं विलोक्य उत्थाय पलायितः। प्रत्यावृत्य लुब्धकः यावत् तरुतलम् आयाति तावत् कूर्मम् अपश्यन् अचिन्तयत् - उचितम् एव एतत् मम असमीक्ष्यकारिणः। यतः -

**यो ध्रुवाणि परित्यज्य, अध्रुवाणि निषेवते।**
**ध्रुवाणि तस्य नश्यन्ति,अध्रुवं नष्टम् एव हि ।। २१५ ।।**

ततः असौ स्वकर्मवशात् निशः कटकं प्रविष्टः। मन्थरादयः सर्वे त्यक्तापदः स्वस्थानं गत्वा यथासुखम् आस्थिताः।

(विवरणम्) हिरण्यकेन मोचितः मन्थरकः (कूर्मः) सत्वरं जलस्य आशयम् उ सरः, प्रविशति। मृतः इव स्थितः मृगः अपि व्याधं समीपम् आगतं पश्यति। उत्तिष्ठति । शीघ्रं पलायति । मृगस्य पलायनेन व्याधः सम्भ्रान्तः भवति। पुनः, कच्छपः यत्र स्थापितः, व्याधः तत् तरुतलम्, आगच्छति। तत्र कच्छपम् अपि न पश्यति। निरुत्साहितः भवति। विविच्य कार्यम् अकर्तुः मम व्याधस्य, हरिण - कच्छपयोः उभयोः अप्राप्तिः युक्तम् एव भवति। यतः - यः निश्चितम्उलब्धम्, हस्तगतं वस्तु परित्यजति, अलब्धं दुर्लभं वस्तु अभिलषति, एतादृशः स्वयं परित्यागात् ,हस्तगतं वस्तु न आप्नोति । दुर्लभत्वेन अलब्धं वस्तु अपि तस्य न सिध्यति। एवम् विवेकेन यः कार्यं न करोति सः असमीक्ष्यकारी ,उभयतः भ्रष्टः भवति। पुनः पुनः स्वदुरदृष्टं निन्दति। बाधाम् अनुभवति । निवासं गच्छति। चित्राङ्ग-लघुपतनक-मन्थरक-हिरण्यकादयः आपदः मुक्ताः भवन्ति। स्वस्वस्थानं गच्छन्ति। स्वेच्छासञ्चरणं कुर्वन्ति । सुखम् अनुभवन्ति।

**स्वावलोकनप्रश्नाः**

१).मन्थरकः कथं संरक्षितः ?

२).उभयभ्रष्टत्वं कीदृशम् ?

३).ध्रुवम् नाम किम् ?

४).अध्रुवं नष्टं कथं भवति ?

## ८.३.कथायाः उपसंहारः

(मूलम्) अथ राजपुत्रैः सानन्दम् उक्तम्- 'सर्वं श्रुतवन्तः। सुखिनः वयम् । सिद्धिः नः समीहितम्'इति। विष्णुशर्मा उवाच- 'एतावता भवताम् अभिलषितं सम्पन्नम्'इति ।

(विवरणम्)एवं विष्णुशर्मणा मित्रलाभात्मकाकथाः कथिताः। राजपुत्राः सावधानं सर्वाः कथाः शृण्वन्ति। आनन्दिताः भवन्ति। विष्णुशर्माणम् 'श्रीमन् ! भवद्भिः कथिताः कथाः सर्वाः अस्माभिः श्रुताः। सुखसम्पन्नाः स्मः।वयं विवेकसम्पन्नाः च सञ्जाताः' इति वदन्ति ।विष्णुशर्मा अपि राजपुत्राणां अभीष्टसिद्ध्यै तान् अभिनन्दति।

## ८.४.पाठकानां रचयितुः शुभाकाङ्क्षाः

(मूलम् ) अपरम् अपि इदम् अस्तु -

**मित्रं प्राप्नुत सज्जनान्, जनपदैः लक्ष्मीः समालम्ब्यताम्,**
**भूपालाः परिपालयन्तु वसुधाम् शश्वत् स्वधर्मे स्थिताः।**
**आस्तां मानसतुष्टये सुकृतिनां नीतिः नवोढा इव वः**
**कल्याणं कुरुतां जनस्य भगवान् चन्द्रार्धचूडामणिः ।। २१६ ।।**

इति हितोपदेशे मित्रलाभो नाम प्रथमः कथासङ्ग्रहः समाप्तः।

(विवरणम् ) ग्रन्थानाम् आदौ मध्ये अन्ते च रचयितारः मङ्गलाशंसनं (शुभकामनाम्) कुर्वन्ति । अयं कश्चन सम्प्रदायः । प्रकृते मित्रलाभः हितोपदेशस्य कश्चन कथाभागः अस्ति । सः इदानीं समाप्तः । समाप्तिसन्दर्भं पुरस्कृत्य नारायणपण्डितः अपि शुभकामनां करोति । पठितृणां, , श्रोतृणां च इदम् अपरम् अपि शुभशंसनं भवतु। पठितारः, श्रोतारश्च साधु पुरुषान् मित्रतया प्राप्नुवन्तु । ग्रामीणप्रान्तेषु धान्यलक्ष्मीः अधिका भवतु। नाम ग्रामाः स्वयं समृद्धिं प्राप्नुवन्तु। राजानः नाम पालकाः स्वेषु स्वेषु धर्मेषु तिष्ठन्तु। वसुधां नाम राज्यं पालयन्तु। रचयितारः समीचीनान् सद्-ग्रन्थान् रचयन्तु। सद्-ग्रन्थेषु स्थिता नीतिः, नवोढा वधूः इव पठितृणां , श्रोतृणां च मनसः सम्प्रीत्यै भवतु। यः शिरसि अर्धचन्द्रं धरति,सः भगवान् चन्द्रमौली परमेश्वरः अखिललोकस्य सुखम्, सौभाग्यं च विदधातु इति एवं मित्रलाभस्य अन्ते ग्रन्थकर्ता नारायणपण्डितः आशीर्वचनात्मकं मङ्गलम् अनुतिष्ठति।

## ८.५.मित्रलाभस्य उपसंहारः

एवम् अस्यां कथायां काक-मन्थर-मूषिकाणां भीतिः,मृगस्य स्वागतम्,मित्रत्वेनस्वीकरणं च, स्वभयकारणस्य निवेदनम् ,तुङ्गबल-लावण्यवत्योः वृत्तान्तम्,कर्पूरतिलकस्य वृत्तान्तम्,मन्थरकस्य कष्टम्, मृग- वायस-मूषकानां विषादः - स्वाभाविकस्नेहस्य महत्त्वम्,विधेः बलीयस्त्वम्,मित्रस्य महत्त्वम्,मन्थरकसंरक्षणस्य उपायरचनम्,व्याधस्य असमीक्ष्यकारिता ,इति एते विषयाः अत्र मन्थरकवृत्तान्ते प्रस्तुताः।

## ८.६.अभ्यासः

अ).'हिरण्यकादयः मन्थरकं कथं रक्षितवन्तः ?

इ).मन्थरके गृहीते , हिरण्यकः कथं विलपितवान् ?

* * *

# UNIT: IX
# तुङ्गबल-लावण्यवत्योः वृत्तान्तम् (कथा-७)

संरचना


९.० परिचयः.
९.१ लक्ष्याणि
९.२ कथायाः नेपथ्यम्
९.३ तुङ्गबल-लावण्यवत्योः वृत्तान्तम्
 ९.३.१ तुङ्गबलस्य स्मराकुलमतिः
 ९.३.२ तुङ्गबलेन दूत्याः प्रेषणम्
 ९.३.३ लावण्यवत्याः तदेकचित्तता
 ९.३.४ सा, प्रशस्ता भार्या
 ९.३.५ लावण्यवतीनिराकरणस्य राजपुत्राय निवेदनम्
९.४ शृगालेन हतस्य हस्तिनः वृत्तान्तम्
 ९.४.१ उपायेन लीलावत्याः भर्तुः चारुदत्तस्य, सेवकत्वेन नियोजनम्
 ९.४.२ चारुदत्तस्य विश्वासः- लोभाकृष्टमनस्कता च
 ९.४.३ चारुदत्तस्य विषादः
९.५ उपसंहारः
९.६ अभ्यासः


## ९.० परिचयः

सहितयोः भावः साहित्यम्। तत् शब्द-अर्थयोः वैशिष्ट्यम् आदधाति। एतत् वैशिष्ट्यं, शब्दं-अर्थं च साधनीकृत्य अध्येतृणां मनसि आह्लादकारिणीं चमत्कृतिं जनयति। एषा चमत्कृतिः पाठकानां मनांसि उल्लासयति। आनन्दयति च। एवं साहित्यं विशिष्टपूर्णं भवति। तत्रापि संस्कृतसाहित्यं सर्वतोमुखं वैशिष्ट्यं वहति। शाखोपशाखाभिः विस्तृतं च विद्यते। तत्र काव्यसाहित्यं कान्तासम्मितं भवति। पाठकानां मनांसि विषयोन्मुखतया हरति। अभ्युदयम् आनन्दं च समानतया समायोजयति। तत्रापि च कथासाहित्यं नितान्तं कमनीयम्। अपूर्वाणां वा, अपेक्षितानां वा अंशानां पाठकमनस्सु उत्कण्ठापूर्वकं स्थापने कथा प्रक्रिया असमाना। इयं श्रवणकौशलं वर्धयति। सरलभाषां बोधयति। व्यक्तीकरण-कौशलं वितरति। भावनाः (Concepts) मनस्सु स्थापयति, आचरणाय आलोचयति च। एतादृशैः विशिष्टैः गुणैः संरचितं कथाकाव्यम् एव पञ्चतन्त्रम्। तस्य रचयिता विष्णुशर्मा। पञ्चतन्त्रम् अनुसृत्य रचितम् अन्यत् कथाकाव्यम् हितोपदेशः । तस्य रचयिता नारायण-

पण्डितः। तत्र मित्रलाभ-मित्रभेद-सन्धि-विग्रहाख्याः चत्वारः भागाः सन्ति । प्रकृते इयं कथा मित्रलाभात् गृहीता। मन्थरकवृत्तान्ते अन्तर्गता कथा इयम् । मानवः बाह्यसंरचनं दृष्ट्वा सर्वं समीचीनम् इति मनुते । तावदेव न अलं भवति। अन्ततः अपि किं प्रचलतीति सूक्ष्मतया ज्ञातव्यं भवति। अन्यथा प्रमादः आपतति इति अंशं बोधयति इयं कथा। अत्र चारुदत्तस्य नियोगः उद्देशपूर्वकः। तं च सः आदौ न जानाति। अन्ततः च प्रमादः सञ्जातः एव। तत् कथम् इति अंशः अत्र पाठ्यांशे ज्ञातुं शक्यते।

## ९.१.लक्ष्याणि

मानवः विवेकसम्पन्नः। सर्वत्र सः विवेकेन प्रवर्तितव्यम् अस्ति। अन्यथा मायामेये अस्मिन् जगति परिहासस्य आस्पदः भवति। जगति च जनाः स्वार्थं समीहन्ते। तेषां स्वार्थस्य कृते अमायकान् बलिं स्वीकुर्वन्ति । तादृशेषु सन्दर्भेषु मानवेन सावधानतया भाव्यं भवति। अविश्वसनीयता यथा वा प्रमादकरः,एवम् अतिविश्वसनीयता अपि प्रमादहेतुः एव, इत्यंशस्य अवबोधनाय उद्दिष्टः अयं पाठ्यांशः। एतत्पाठ्यांशस्य अध्ययनेन --

- श्रवण,पठन,भाषण,लेखन,कौशलानां प्रावीण्यम् अधिगन्तुं समर्थः भवति।
- तुङ्गबलस्य मदनायत्तचित्ततां पठितुं पारयति।
- पातिव्रत्यधर्मस्य अनुल्लङ्घनं प्रति लावण्यवत्याः आशयं भाषितुं प्रभवति।
- लावण्यवतीं प्राप्तुम् उपायस्य आरचनम् अधिकृत्य परिचितः भवति।
- चारुदत्तस्य नियोजनहेतुं लिखितुं पारयति ।
- चारुदत्तः कुतः विषादम् आप्तः इत्यंशं अवगन्तुं समर्थः भवति ।

## ९.२.कथायाः नेपथ्यम्

(मूलम्) **स्वयं वीक्ष्य यथा वध्वाः पीडितं कुचकुट्मलम्।**
**वणिक्पुत्रः अभवत् दुःखी त्वं तथैव भविष्यसि ।। १९७ ।।**

ते ऊचुः - कथम् एतत् ? हिरण्यकः कथयति -

(विवरणम्) कश्चन वणिक्पुत्रः पीडितम्उ मर्दितम् , वध्वाः = भार्यायाः कुचयोः अग्रभागं स्वयं पश्यति। भृशं दुःखितः भवति। त्वम् अपि तथा दुःखम् अनुभविष्यसि , इति हिरण्यकः उपदिशति। मन्थरक-लघुपतनके सविवरं श्रोतुम् उत्साहं कुरुतः। कथम् इति पृच्छतः च। तयोः आसक्तिम् अवगत्य एवंकथयति।

## ९.३.तुङ्गबलस्य वृत्तान्तम्

### ९.३.१.तुङ्गबलस्य कामुकता

(मूलम्) अस्ति कान्यकुब्जविषये वीरसेनः नाम राजा। तेन वीरपुरनाम्नि नगरे तुङ्गबलः नाम राजपुत्रः भोगपतिः कृतः सः च महाधनः, तरुणः, एकदा स्वनगरे भ्राम्यन् अतिप्रौढयौवनां लावण्यवतीं नाम वणिक्पुत्रवधूम् आलोकयामास। ततः स्वहर्म्यं गत्वा स्मराकुलमतिः तस्याः कृते दूतीं प्रेषितवान्।

(विवरणम्) कान्यकुब्जेषु राज्येषु वीरसेनः नाम राजा अस्ति। सः वीरपुरनाम्नि नगरे तुङ्गबलनामानं राजपुत्रं, भोगपतिम्उ नगराधिपतिम्,करोति। सः च महाधनः, तरुणः च। एकदा स्वनगरं परितः भ्रमति। अतिप्रौढं यौवनां वणिक्-पुत्रस्य भार्यां पश्यति। तस्याः नाम लावण्यवती। तुङ्गबलः भ्रमणात् अनन्तरं स्वभवनं गच्छति । लावण्यवतीम् एव चिन्तयति। स्मरेण आकुलमतिः भवति । तस्याः कृते दूतीं प्रेषियति।

**९.३.२.तुङ्गबलेन दूत्याः प्रेषणम्**

(मूलम्)यतः - सन्मार्गे तावत् आस्ते, प्रभवति पुरुषः तावत् एव इन्द्रियाणाम्।

लज्जां तावत् विधत्ते, विनयम् अपि समालम्बते तावत् एव।

**भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माणः एते**

**यावत् लीलावतीनां न हृदि धृतिमुषः दृष्टिबाणाः पतन्ति ।।१९८।।**

(विवरणम्)इदं पद्यं युवतीनां दृष्टिप्रभावं बोधयति। तथा हि - यावत् लीलावतीनाम्उस्त्रीणाम्, धृतिमुषःउ धैर्यस्य अपहारकाः, दृष्टिबाणाः शिताः दृक्-शराः हृदि न पतन्ति, तावत् पुरुषः सन्मार्गे प्रवर्तते। तावत् एव इन्द्रियाणां दुष्प्रभावतः दूरतः स्थातुं समर्थः भवति। तावत् एव लज्जाम्उ अभिमानं वहति। विनयम् अपि धरति। तावत् एव धैर्य वहति। तावत् एव निश्चलः तिष्ठति।

**९.३.३.लावण्यवत्याः तदेकचित्तता**

(मूलम्) सा अपि लावण्यवती तत् अवलोकनक्षणात् प्रभृति स्मर-शर-प्रहार-जर्जरित-हृदया तदेकचित्ता अभवत्। तथा हि उक्तम् -

**असत्यम्,साहसम्,माया,मात्सर्यम्,च अतिलुब्धता।**

**निर्गुणत्वम्, अशौचत्वम्, स्त्रीणां दोषाः स्वभावजाः।।१९९।।**

(विवरणम्) लावण्यवती अपि तुङ्गबलस्य दर्शनक्षणात् मनसि वैक्लब्यम् आप्नोति। स्मरस्य शरेण प्रहृता भवति। जर्जरित-हृदया तुङ्गबले तदेकमानसा च भवति। तत् युक्तम् एव।

१).असत्यम्, २).साहसम्, ३).माया, ४).मात्सर्यम्, ५).अतिलुब्धता, ६).निर्गुणत्वम्, ७).अशौचत्वम्, एते सप्त स्त्रीणां स्वभावजाः दोषाः भवन्ति। अतः लावण्यवती अपि दुर्बलमनस्का भवति। अपमार्गम् अवलम्बते। दुरा- चरणाय अपि सिद्धः भवति।

**स्वावलोकनप्रश्नाः**

१).लीलावतीनाम्उ स्त्रीणां प्रभावः कीदृशः ?

२).स्वभावजाः स्त्रीणां दोषाः के ?

३).तुङ्गबलः किमर्थं दूतीं प्रेषितवान् ?

**९.३.४.सा, प्रशस्ता भार्या**

(मूलम्)अथ दूतीवचनं श्रुत्वा लावण्यवती उवाच 'अहं पतिव्रता कथम् एतस्मिन् अधर्मे पतिलङ्घने प्रवर्ते? यतः-

**सा भार्या या गृहे दक्षा, सा भार्या या प्रजावती।**
**सा भार्या या पतिप्राणा, सा भार्या या पतिव्रता ।। २०० ।।**
**न सा भार्या इति वक्तव्या यस्याः भर्ता न तुष्यति।**
**तुष्टे भर्तरि नारीणां सन्तुष्टाः सर्वदेवताः ।। २०१।।**

ततः यत् यत् आदिशति मे प्राणेश्वरः तत् एव अहम् अविचारितं करोमि ' इति। दूत्या उक्तम् 'सत्यतमम् एतत् '। लावण्यवती उवाच-' ध्रुवं सत्यम् एतत् ' इति।

(विवरणम्)लावण्यवती दूत्याः वचनं शृणोति। दुराचरणाय अपि सिद्धः भवति। कपटेन भार्यायाः प्राशस्त्यं दूत्यै एवं बोधयति। 'अहं पतिव्रता, परपुरुषाभिगमनम् अधर्मः। या गृहे दक्षा, सा एव भार्या भवति। या च सन्तानं प्रसूते सा एव भार्या भवितुम् अर्हति। या पत्युः प्राणसमाना भवति, सा एव भार्या भवति। या पतिम् एव नियमेन सेवते, सा एव भार्या भवति। यस्याः सेवनेन भर्ता न तुष्यति सा भार्या इति वक्तुं न शक्यते। यस्याः संसेवनेन भर्ता तुष्टः भवति तादृशीनां नारीणां प्रवर्तनेन सर्वदेवताः सन्तुष्टाः भवन्ति। अतः प्राणेश्वरः मम पतिः यत् यत् आदिशति तत् एव अहम् अनुतिष्ठामि ' इति कथयति। दूत्या अपि लावण्यवत्याः वचनेषु स्थितां वञ्चनाम् अवगच्छति। तस्याः वचनं दूती सत्यतमं भावयति। लावण्यवती अपि नर्मगर्भं स्वीयं कपटम् उद्देशं अवगमयति। कपटेन 'स्वयम् उक्तं सत्यम्' इति दृढं वदति।

**९.३.५.लावण्यवतीनिराकरणस्य राजपुत्राय निवेदनम्**

(मूलम्) ततः दूतिकया,गत्वा तत् तत् सर्वं तुङ्गबलस्य अग्रे निवेदितम्। तत् श्रुत्वा तुङ्गबलः अब्रवीत् - ' विषमेषुणा व्रणितहृदयः तां विना कथमहं जीविष्यामि ' इति। कुट्टिनी आह ' स्वामिना अनीय समर्पयितव्या ' इति। सः प्राह ' कथम् एतत् शक्यम् कुट्टिनी आह -' उपायः क्रियताम् '। तथा च उक्तम् -

**उपायेन हि यत् शक्यं न तत् शक्यं पराक्रमैः।**
**शृगालेन हतः हस्ती गच्छता पङ्कवर्त्मना ।। २०२ ।।**

राजपुत्रः पृच्छति - 'कथम् एतत्' । सा कथयति -

(विवरणम्) दूती अपि लावण्यवत्याः कथनं सत्यं चिन्तयति। इमम् एव विषयं दूती तुङ्गबलाय निवेदयति। तुङ्गबलः तत् शृणोति। लावण्यवत्याः अधिगमनं प्रति आशां त्यजति। मदनस्य बाधेन तप्तहृदयः भवति।' लावण्यवतीं विना कथम् अहं जीविष्यामि ' इति दूतीं पृच्छति। भर्ता एव यदि स्वयं अनीय लावण्यवतीं समर्पयति तदा एव तस्याः अभिगमनं भवतः साध्यं भवति, इति दूती सारांशतः वदति। भर्ता एव स्वयं लावण्यवतीम् अनीय कथं समर्पयति इति तुङ्गबलः पृच्छति। उपायः क्रियताम्। पराक्रमेण अपि

साधयितुं अशक्यम् , उपायेन सुखेन सुलभतया साधयितुं शक्यं भवति,सर्वम् उपायेन एव साध्यं भवति। तत् ते। अल्पीयान् शृगालः उपायेनैव महीयांसं गजं हन्ति खलु, इति दूती तुङ्गबलं उपायस्य प्राशस्त्यं कथयति। तुङ्गबलः उपायेन यत् साध्यं तत् पराक्रमेण कथं साधयितुं न शक्यते ? इति ज्ञातुम् इच्छुः भवति। तदा दूती उपायेन यत् साध्यं तत् पराक्रमेण अपि साधयितुं न शक्यते इति विषयबोधिकां कथाम् एवं कथयति।

**स्वावलोकनप्रश्नाः**

१).का भार्या इति वक्तव्या भवति ?

२).नारीणां सर्वदेवताः कदा तुष्यन्ति ?

३).का पतिप्राणा भवति ?

४).गृहे दक्षा का भवति ?

## ९.४.कर्पूरतिलकवृत्तान्तम्

ब्रह्मारण्ये कर्पूरतिलकः नाम हस्ती अस्ति। तम् अवलोक्य सर्वे शृगालाः -'अयं केन अपि उपायेन म्रियते तदा अस्माकम् एतत् देहेन मासचतुष्टयस्य भोजनं भविष्यति ' इति चिन्तयन्ति।तदा ' मया बुद्धिप्रभावात् अस्य मरणं साधयितव्यम् ' इति एकः वृद्धशृगालः प्रतिजानाति। अनुपदम् एव स वञ्चकः कर्पूरतिलकसमीपं गच्छति साष्टाङ्ग पातं प्रणमति। ' देव! दृष्टिप्रसादं कुरु ' इति वक्तुम् आरभते। कस्त्वम् ? कुतः समायातः? इति हस्ती ब्रवीति। 'जम्बुकः अहम्। सर्वैः वनवासिभिः पशुभिः मिलित्वा भवत्सकाशं प्रस्थापितः, यत् विना राज्ञा अवस्थातुं न युक्तम्, तत् अत्र अटवीराज्ये अभिषेक्तुं भवान् सर्व-स्वामिगुणोपेतः निरूपितः, तत् यथा लग्नवेला न विचलति तथा कृत्वा सत्वरम् आगम्यतां देवेन ' इति उक्त्वा, उत्थाय, चलति। ततः असौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन् महापङ्के निमज्जति। ततः 'सखे! शृगाल! किम् अधुना विधेयम्, पङ्के निपतितः अहं म्रिये। परावृत्य पश्य 'इति हस्ती शृगालम् आह्वयति। शृगालः च परिहसन् , देव! मम पुच्छक- अवलम्बनं कृत्वा उत्तिष्ठ। यत् मद्विधस्य वचसि त्वया प्रत्ययः कृतः। तत् अनुभूयताम् अशरणं दुःखम्, इति वदति। ततः महापङ्के निमग्नः हस्ती शृगालैः भक्षितः। अतः अहं ब्रवीमि 'उपायेन हि यत् शक्यम्... ' इत्यादि।

**९.४.१.उपायेन लावण्यवत्याः भर्तुः चारुदत्तस्य, सेवकत्वेन नियोजनम्**

(मूलम्) ततः कुट्टिनी-उपदेशेन तं चारुदत्तनामानं वाणिक्पुत्रं सेवकं चकार। ततः असौ तेन सर्वविश्वासकार्येषु नियोजितः।

(विवरणम्) तुङ्गबलः कुट्टिन्या कथितं कर्पूरतिलकस्य वृत्तान्तं शृणोति। उपायस्य माहात्म्यं जानाति। लावण्यवतीम् उपभोक्तुम्, उपायस्य कथनाय, कुट्टिनीं पृच्छति। सा च कञ्चन उपायम् उपदिशति।लावण्यवत्याः भर्ता, कश्चन वणिक्-पुत्रः, तस्य नाम चारुदत्तः। कुट्टिनी-उपदिष्ट-उपायेन चारुदत्तं सेवकत्वेन नियमयति। आन्तरङ्गिकं करोति। सर्वेषां विश्वासकर्याणाम् अनुष्ठानस्य सारथ्यं चारुदत्ताय एव ददाति।

**९.४.२.चारुदत्तस्य विश्वासः- लोभाकृष्टमनस्कता च**

(मूलम्) एकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकरत्नालङ्कारधारिणा प्रोक्तम् - ' अद्य आरभ्य मासम् एकं गौरीव्रतं कर्तव्यम्। तत् अत्र प्रतिरात्रम् एकां कुलीनां युवतिम् आनीय समर्पय। सा मया यथोचितेन विधिना पूजयितव्या ' इति। ततः सः चारुदत्तः तथाविधां नवयुवतीम् आनीय समर्पयति। पश्चात् प्रच्छन्नः सन् 'किमयं करोति' इति निरूपयति। सः च तुङ्गबलः तां युवतिम् अस्पृशन् एव दूरात् वस्त्र-अलङ्कार-गन्धचन्दनैः सम्पूज्य रक्षकं दत्त्वा प्रस्थापयति। अथ वणिक्पुत्रेण तत् दृष्ट्वा उपजातविश्वासेन, लोभाकृष्टमनसा स्ववधूः लावण्यवती समानीय समर्पिता। सः च तुङ्गबलः हृदयप्रियां लावण्यवतीं विज्ञाय, ससम्भ्रमम् उत्थाय, निर्भरम् आलिङ्ग्य निमीलिताक्षः पर्यङ्के तया सह विललास।

(विवरणम्)ततः कदाचित्, तुङ्गबलः स्नाति। अनुलिप्तः भवति। सुवर्णरत्न-आभरणानि धरति। आसनम् अधितिष्ठति। सेवकं चारुदत्तम् -' अद्य मया गौर्याः व्रतस्य आचरणम् आरब्धम्। एकं मासं प्रचलति। व्रताचरणे भागतया एका कुलीना युवतिः प्रतिरात्रौ मया शास्त्रोक्तपद्धत्या अर्चयितव्या अस्ति। तदर्थं संरम्भान् आरचयतु ' इति आदिशति। तुङ्गबलस्य आज्ञाम् चारुदत्तः शिरसा वहति। काञ्चन नवयुवतीम् आनीय समर्पयति। अनन्तरं अन्तरितः भवति।'किमयं करोति' इति पश्यति। तत्र तुङ्गबलः युवतिं न स्पृशति। दूरात् एव वस्त्रेण अलङ्कारैः गन्धेन चन्दनेन च सम्पूजयति। रक्षकं ददाति। याने प्रस्थापयति। तुङ्गबलस्य कुलिन्यर्चनं चारुदत्तः पश्यति। विश्वस्तः भवति। पूजाविधौ तुङ्गबलेन दीयमानैः वस्त्र-अलङ्कारैः आकर्षितः भवति। लोभेन कृष्टमनाः स्वभार्यां लावण्यवतीं कस्याञ्चन रात्रौ समानयति। तुङ्गबलाय समर्पयति। तुङ्गबलः परमप्रीतः भवति। मनसा वृतां लावण्यवतीं विजानाति। ससम्भ्रमम् उत्तिष्ठति। निर्भरम् आलिङ्गति। परवशः भवति। चक्षुषी निमीलति। पर्यङ्के लावण्यवत्या सह विलसति। स्वमनोरथं साधयति।

**९.४.३.चारुदत्तस्य विषादः**

(मूलम्) तत् आलोक्य वणिक्पुत्रः चित्रलिखितः इव किंकर्तव्यतामूढः परं विषादम्

उपगतः। अतः अहं ब्रवीमि - 'स्वयं वीक्ष्य...' इत्यादि, तथा त्वया अपि भवितव्यम् इति।

(विवरणम्) चारुदत्तः अन्तरितः सन् तुङ्गबल-लीलावत्योः मैथुनं पश्यति। चित्रे लिखितः इव निश्चलः भवति। स्वीय-अज्ञानस्य मूल्यम् अनुभवति। किम् अपि कर्तुम् असमर्थः भवति। अतीव दुःखितः भवति। तस्मात् अहम् (हिरण्यकः) ' स्वयं वीक्ष्य...' इत्यादि, एवं त्वम् अपि स्वयम् आपदाम् अस्पदः भविष्यसि, इति वदामि।

## १.५.उपसंहारः

एवम् अस्यां कथायां तुङ्गबल-लावण्यवत्योः अक्रमप्रणयम् अभिवर्णितम्। तत्र च प्रत्येकशः तुङ्गबलस्य स्मराकुलमतित्वम्, तुङ्गबलेन दूत्याः प्रेषणम्, लावण्यवत्याः तदेकचित्तता, तस्याः पातिव्रत्यधर्म-अनल्लङ्घनम्, लावण्यवतीनिराकरणस्य राजपुत्राय निवेदनम्, उपायेन लीलावत्याः भर्तुः चारुदत्तस्य, सेवकत्वेन नियोजनम्, विश्वासपूर्णस्य अपि चारुदत्तस्य लोभाकृष्टमनस्कता च, अन्ततः तुङ्गबल-लावण्यवत्योः अक्रमप्रणयः चारुदत्तस्य विषादः, इति एते अंशाः कथाकथनपद्धत्या वर्णिताः।

## १.६.अभ्यासः

अ).'चारुदत्तः किमर्थं विषादम् आप्तः, विशदयत ?

इ).स्वयं वीक्ष्य यथा वध्वाः पीडितं कुचकुट्मलम्।
वणिक्पुत्रः अभवत् दुःखी ... कथम् ? किमर्थम् ? वर्णयत ?

* * *

UNIT- X

# कर्पूरतिलकस्य वृत्तान्तम् (कथा ८)

संरचना

१०.०.परिचयः
१०.१.लक्ष्याणि
१०.२.कथायाः नेपथ्यम्
१०.३.कर्पूरतिलकस्य वृत्तान्तम्
१०.३.१.कर्पूरतिलकस्य मांसभक्षणाय जम्बुकानां दुरालोचनम्
१०.३.२.वृद्धशृगालस्य प्रतिज्ञा
१०.३.३.वृद्धशृगालस्य कुटिलता
१०.३.४.राज्ञः आवश्यकता
१०.३.५.कर्पूरतिलकस्य दुराशा- तस्य पङ्के निमग्नता
१०.३.६.वृद्धशृगालस्य अपहास्यता
१०.३.७.कर्पूरतिलकस्यव्यापादनम् - भक्षणं च
१०.४.उपसंहारः
१०.५.अभ्यासः

## १०.०.परिचयः

संस्कृतकथासाहित्ये हितोपदेशः अन्यतमः ग्रन्थः। तस्य च रचयिता नारायणपण्डितः। अत्र च मित्रलाभ - मित्रभेद-सन्धि-विग्रहाख्याः चत्वारः भागाः सन्ति। प्रकृते च इयम् अष्टमकथा,मित्रलाभे अन्तिमा च। चित्राङ्ग वृ त्तान्ते चन्दनदास-लीलावत्योः कथा अन्तर्भूता विद्यते। तत्र चन्दनदास-लीलावत्योः कथायाम् अन्तर्भूता अपरा कथा इयम्। कर्पूरतिलकस्य वृत्तान्तम् अत्र वर्ण्यते। कर्पूरतिलकः कश्चन गजः। बलसम्पन्नः अपि सः महन् गजः, अल्पैः शृगालैः उपायेन भक्षितः भवति। अत्र च 'उपायेन हि यत् शक्यं न तत् शक्यं पराक्रमैः' इति नीतिः बोध्यते।

## १०.१.लक्ष्याणि

मानवः बुद्धिजीवः, विचक्षणश्च। बुद्ध्या, विवेकेन च सततं क्रियाशीलः,उद्यमशीलः कार्यसाधकश्च भवति।उपकरणहीनाः अपि, निर्धनिनः अपि,यदि बुद्धिमन्तः भवन्ति, ते आशु कार्यं साधयन्ति इति खलु आरम्भपद्यानाम् आशयः। तत्र बुद्धिमन्तः इत्यस्य उपायशीलाः विवेकशालिनः इत्येव अर्थः। पराक्रमेण असाध्यमपि कार्यम् उपायेन सुसाध्यं

भवति। उपायस्य च तादृशं प्राशस्त्यं विद्यते। मानवः उपायशीलः भवेत्, सर्वदा उपायेन कार्याणि साध- नीयानि,उपायेन कार्यकरणे बुद्धेः सूक्ष्मता सम्पादिता भवति। तदा देशस्य कालस्य धनस्य च व्ययः न्यूनंभवति। श्रमशक्तेः दुरुपयोगः (MIS-USE) वारितः भवति।उपायः बलहीनम् अपि बलवन्त् करोति।सर्वत्र सिद्धिं सम्पादयति। एवम् उपायस्य प्राशस्त्यबोधनाय उद्दिष्टः अयं पाट्यांशः। एतत् पाठ्यांशस्य अध्ययनेन –

- श्रवण, पठन, भाषण, लेखनेषु, प्रावीण्यम् अधिगन्तुं समर्थः भवति।
- उपायस्य प्राशस्त्यं पठितुं पारयति।
- जम्बुकानां दुरालोचनां वक्तुं प्रभवति।
- राज्ञः आवश्यकतां, राज्ञः प्राशस्त्यं च ज्ञातुं प्रभवति।
- कर्पूरतिलकस्य दुराशां लिखितुं पारयति।

## १०.२.कथायाः नेपथ्यम्

(मूलम्) **उपायेन हि यत् शक्यं न तत् शक्यं पराक्रमैः।**
**शृगालेन हतः हस्ती गच्छता पङ्कवर्त्मना ।। २०२ ।।**

राजपुत्रः पृच्छति – 'कथम् एतत्' । सा कथयति –

(विवरणम्) 'लावणयवतीं विना कथम् अहं जीविष्यामि ' इति तुङ्गबलः दूतीं पृच्छति। भर्ता एव यदि स्वयं अनीय लावण्यवतीं समर्पयति तदा एव तस्याः अभिगमनं भवतः साध्यं भवति, इति दूती सारांशतः वदति। भर्ता एव स्वयं लावण्यवतीम् अनीय कथं समर्पयति इति तुङ्गबलः पुनः दूतीं पृच्छति। उपायः क्रियताम्। पराक्रमेण अपि साधयितुं अशक्यम्, उपायेन सुखेन सुलभतया साधयितुं शक्यं भवति, सर्वम् उपायेन एव साध्यं भवति। अल्पीयान् शृगालः उपायेनैव महीयांसम् अपि गजं हन्ति खलु, इति दूती तुङ्गबलं उपायस्य प्राशस्त्यं कथयति। तुङ्गबलः पराक्रमेण अपि साधयितुम् अशक्यम् उपायेन कथं साध्यं भवति ? इति ज्ञातुम् इच्छुः भवति। तदा दूती कर्पूरतिलकस्य वृत्तान्तम् एवं कथयति।

## १०.३.कर्पूरतिलकस्य वृत्तान्तम्

१०.३.१.जम्बुकानां दुरालोचनम्

(मूलम्)अस्ति ब्रह्मारण्ये कर्पूरतिलकः नाम हस्ती। तमवलोक्य सर्वे शृगालाः चिन्तयन्ति स्म यत्-'अयं केन अपि उपायेन म्रियते तदा अस्माकम् एतत् देहेन मासचतुष्टयस्य भोजनं भविष्यति' ।

(विवरणम्) ब्रह्मारण्येषु कश्चन हस्ती अस्ति। तस्य नाम कर्पूरतिलकः। ब्रह्मारण्येषु स्थिताः शृगालाः सर्वे कदाचित् कर्पूरतिलकं पश्यन्ति। शृगालाः तस्य मांसं खादितुम् अभिलषन्ति। यदि अयं म्रियते तदा एतत् कलेबरं मासचतुष्टयं यावत् शृगालानाम्

अस्माकम् भोजनाय पर्याप्तं भवति इति स्वप्नम् अनुभवन्ति।

**१०.३.२.वृद्धशृगालस्य प्रतिज्ञा**

(मूलम्) तत्र एकेन वृद्धशृगालेन प्रतिज्ञातम् –'मया बुद्धिप्रभावात् अस्य मरणं साधयितव्यम्' इति ।अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्य उवाच – 'देव! दृष्टिप्रसादं कुरु 'इति। हस्ती ब्रूते –कस्त्वम्?(कः अ त्वम्) कुतः समायातः?।

(विवरणम्) स्वेषां स्वप्नं साकारं कर्तुं शृगालेषु अन्यतमः वृद्धः शृगालः–'अहं बुद्धिचातुर्येण कर्पूरतिलकस्य मरणं साधयामि इति प्रतिजानातिउ शपथं करोति। तत्क्षणम् एव वृद्धः शृगालः कर्पूरतिलकसमीपं गच्छति। अष्टभिः अङ्गैः प्रणमति।'देव! अस्मान् पश्यतु! अस्मासु दृष्टिम् अनुगृह्णातु! इति कर्पूतिलकम् उन्मुखीकरोति। हस्ती अपि ' त्वं कः ? कस्मात् प्रदेशात् आगतः ' वृद्धशृगालं पृच्छति।

**स्वावलोकनप्रश्नाः**

१).कर्पूरतिलकः कः ?

२).वृद्धशृगालेन किं प्रतिज्ञातम् ?

३).देव ! दृष्टिप्रसादं कुरु, अत्र 'देवः' कः ?

४).कस्त्वम् (कः त्वम्) अत्र 'त्वम्' कः भवति ?

**१०.३.३.वृद्धशृगालस्य कुटिलता**

(मूलम्) सः अवदत्– 'जम्बुकः अहम्।सर्वैः वनवासिभिः पशुभिः मिलित्वा भवत् सकाशं प्रस्थापितः,यत् विना राज्ञा अवस्थातुं न युक्तम्, तत् अत्र अटवीराज्ये अभिषेक्तुं भवान् सर्व-स्वामिगुणोपेतः निरूपितः।

(विवरणम्) 'जम्बुकः अहम्। अस्मिन् एव अरण्ये वसामि। वनवासिनः सर्वे जन्तवः मिलित्वा मां भवतः सकाशं प्रस्थापितवन्तः। ते सर्वे मम माध्यमेन तत्र भवन्तं विज्ञापयन्ति। इदम् अरण्यं राजानं विना अवस्थातुं न युक्तम्, भवान् च सर्व-स्वामिगुणोपेतः इति अस्माभिः निर्धारितः असि।' इति शृगालः कर्पूरतिलकाय कथयति।

१०.३.४.राज्ञः आवश्यकता

(मूलम्)यतः -

**यः कुलाभिजनाचारैः अतिशुद्धः प्रतापवान्।**
**धार्मिकः नीतिकुशलः स स्वामी युज्यते भुवि ।। २०३ ।।**

अपरञ्च पश्य -

**राजानं प्रथमं विन्देत्,ततः भार्याम्,ततः धनम्।**
**राजनि असति लोके अस्मिन् कुतः भार्या ? कुतो धनम् ? ।। २०४ ।।**

(विवरणम्)अत्र शृगालः राज्ञः लक्षणानि एवं वर्णयति। यः कोऽपि प्रदेशः राजानं विना स्थातुं नैव युक्तम्। यः कुलाचाराणाम् अभिजनाचाराणां परिचितः भवति, यः पवित्रान्तःकरणः, प्रतापवान्, धर्मवेत्ता, धर्माचरपरा- यणः च भवति, राजनीतिनिपुणः अपि भवति, सः विशिष्य भुवः पतिः भवितुम् अर्हति। किञ्च, भार्यायाः अपेक्षया, धनस्य अपेक्षया वा, जनः प्रधमं राजानम् आप्नुयात्। यदि राजा एवन भवति,तर्हि भार्यायाः वा, धनस्य वा भद्ररता कस्मात् भवति ? कथं भवति ? इति वृद्धशृगालः कुटिलतया राज्ञः आवश्यकतां कथयति। (मूलम्)अन्यत् च -

**पर्जन्य इव भूतानां आधारः पृथिवीपतिः।**
**विकले अपि हि पर्जन्ये जीव्यते, न तु भूपतौ ।। २०५ ।।**
**नियतविषयवर्ती प्रायशः दण्डयोगात्,**
**जगति परवशो अस्मिन् दुर्लभः साधुवृत्तः।**
**क्रुशम् अपि विकलं वा, व्याधितं वा, अधनं वा**
**पतिम् अपि कुलनारी दण्डभीत्या अभ्युपैति ।। २०६ ।।**

तत् यथा लग्नवेला न विचलति तथा कृत्वा सत्वरम् आगम्यतां देवेन’इति उक्त्वा उत्थाय चलितः।

(विवरणम्) अपि च- पृथिव्याः पतिः पृथिवीपतिः,राजा इत्यर्थः। पर्जन्यःउ वर्षः, प्राणिनाम् जीवनाय आधारभूतः। तथैव प्रजानां पृथिवीपतिः अपि व्यवस्थायाः चालनाय आधारभूतः, आवश्यकः इति भावः। तत्रापि वर्षस्य अभावेऽपि यथाकथञ्चित् कालः प्रयाति। परं राज्ञः अभावे तु, राज्ये कालस्य प्रयाणं दुःखप्रदं भवति।

द्वितीयं पद्यं दण्डनस्यउ पालनस्य,महत्त्वं बोधयति। तथाहि- अस्मिन् लोके, प्रायशः साधुवृत्तःउस्वयं क्रमशिक्षणपरः (Self-disciplined) दुर्लभः। स्वेच्छया,परेषाम् असौकर्यं जनयति। परेषां पीडां जनयति,परेषाम् ऐश्वर्यम् अपहरति। परं पालनमहिम्ना, प्रजाः नियतेषु विषयेषु एव वर्तिनः भवन्ति। प्रायशः दण्डयोगात् परवशो भवति। अस्वतन्त्रः भवति। राजाधीनः भवति। स्वेच्छाप्रवर्तनं नियन्त्रयति। पीडाजननम्, अपहरणादिकं न आचरति। कुलनारी,पतिम्उपरिणीतं भर्तारम्, क्रुशम् अपि वा, विकलम् अपि वा, व्याधितम् अपि वा, अधनम् अपि वा, दण्डभीत्याउ प्रभुत्वस्य शिक्षणं मनसि निधाय, अभ्युपैतिउ अङ्गीकृत्य तेन सह,जीवनं यापयति। वयं पट्टाभिषेकस्य मुहूर्तम् अपि निश्तितवन्तः। तत्उतस्मात्, समयः अपि भवति। लग्नवेला यथा न विचलति तथा शीघ्रम् आगच्छतु भवान् ‘इति वृद्धशृगालः कथयति, उत्तिष्ठति, चलति च।

### १०.३.५.कर्पूरतिलकस्य दुराशा- तस्य पङ्के निमग्नता

(मूलम्) ततः असौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन् महापङ्के निमग्नः। ततः तेन हस्तिना उक्तम् – 'सखे! शृगाल! किम् अधुना विधेयम्, पङ्के निपतितः अहं म्रिये । परावृत्य पश्य' इति।

(विवरणम्) कर्पूरतिलकः वृद्धशृगालस्य वचः शृणोति। राज्यस्य लोभेन आकृष्टः भवति। कर्पूरतिलकः शृगालस्य मार्गम् अनुधावति। महापङ्के निमज्जति। ततः हस्ती वृद्धशृगालम् आह्वयति 'सखे! शृगाल! अधुना अहं किं करोमि ? अहं पङ्के निपतितः अस्मि। म्रिये। एकवारं परावृत्य पश्यतु 'इति वृद्धशृगालं शरणं गच्छति।

### १०.३.६.वृद्धशृगालस्य कपटता - तस्य अपहास्यता

(मूलम्) शृगालेन विहस्य उक्तम् – 'देव! मम पुच्छकावलम्बनं कृत्वा उत्तिष्ठ। यत् मद्विधस्य वचसि त्वया प्रत्ययः कृतः तत् अनुभूयताम् अशरणं दुःखम् ।तथा च उक्तम् –

**यदा असत्सङ्गरहितः भविष्यसि भविष्यसि।**
**तदा असज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ।। १०७ ।।**

(विवरणम्) वृद्धशृगालः कर्पूरतिलकं पश्यति। किञ्चित् विहसति। एवं वदति – 'देव!अहं किम् अपि न करोमि। मम पुच्छकस्य अवलम्बनम्उसहायम्,स्वीकरोतु,उत्तिष्ठतु। यस्मात् भवान् मादृशस्य नीचस्य वचनं विश्वसितवान्, तस्मात् अशरणम्उअगतिकम्, दुःखम्उ कष्टम्,मरणम् अनुभवतु। तथा हि – लोके यः कोऽपि , यदा सतां सङ्गेन सहितः भविष्यति, तदा सः आपदः आत्मानम् उद्धर्तुं समर्थः भविष्यति। यः असताम्उदुर्जनानां सङ्गे पतिष्यति, तदा सः आपदः अधः पतिष्यति। त्वम् इदानीं मम दुष्टस्य वचः विश्वस्य आपदिउमहापङ्के निमग्नः। उपरि आगन्तुम् असमर्थः च भवसि, इति वृद्धशृगालः कर्पूरतिलकं स्वभाग्याय विसृजति।

### १०.३.७.कर्पूरतिलकस्यव्यापादनम् - भक्षणं च

(मूलम्)ततः महापङ्के निमग्नः हस्तीशृगालैःभक्षितः।अतः अहं ब्रवीमि – 'उपायेन हि यत् शक्यम्... 'इत्यादि।

(विवरणम्) अनन्तरं महापङ्के निमग्नः कर्पूरतिलकः निरुद्धश्वासः सन् असून् त्यजति। शृगालाः साधितप्रतिज्ञं वृद्धशृगालं अभिनन्दन्ति। सर्वे शृगालाः सानन्दं मृतं कर्पूरतिलकं भक्षयन्ति। अतः अहं ब्रवीमि – 'उपायेन हि यत् शक्यम्... इत्यादि' इति कुट्टिनी तुङ्गबलं कथयति।

**स्वावलोकनप्रश्नाः**

१).सः स्वामी युज्यते ,सः कः, कीदृश ?

२).कं प्रथमं विन्देत् ?

३).असज्जनगोष्ठीषु पतने किं भविष्यति ?

४).'देव! मम पुच्छकावलम्बनं कृत्वा उत्तिष्ठ 'अत्र 'मम ' कं सम्बन्धयति ?

## १०.४.उपसंहारः

एवम् अस्यां कथायां कर्पूरतिलकस्य मांसभक्षणाय जम्बुकानां दुरालोचनम्, वृद्धशृगालस्य प्रतिज्ञा, वृद्ध- शृगालस्य कपटता, राज्ये राज्ञः प्रतिष्ठानस्य आवश्यकता, कर्पूरतिलकस्य दुराशा, तस्य पङ्के निमग्नता, वृद्धशृगालस्य अपहास्यता, कर्पूरतिलकस्य मरणम् , भक्षणं च इत्येते विषयाः, वर्णिताः। एते च विषयाः पाठकान् उपायं प्रति अवगाहनापरान् कर्तुं प्रभवन्ति।

## १०.५.अभ्यासः

अ).'उपायेन हि यत् शक्यं न तत् शक्यं पराक्रमैः' सोदाहरणं विशदयत ?

इ)'शृगालेन हतः हस्ती गच्छता पङ्कवर्त्मना' कथं वर्णयत ?

उ).राज्ये राज्ञः प्रतिष्ठानस्य आवश्यकता कीदृशी ?

* * *

# व्यासात्मकाः प्रश्नाः

संरचना

११.० परिचयः
११.१ लक्ष्याणि
११.२ व्यासात्मकाः प्रश्नाः
११.२.१ चित्रग्रीववृत्तान्तम्
११.२.२ वृद्धव्याघ्र-पथिकयोः कथा
११.२.३ मृग-काक-जम्बुक-कथा
११.२.४. जरद्गव-दीर्घकर्णयोः कथा
११.२ ५. काक-मूषिकायोः मैत्री
११.२.६. हिरण्यकस्य वृत्तान्तम्
११.२.७. चूडाकर्ण - वीणाकर्णयोः संवादः
११.२.८ लीलावती चन्दनदासयोः वृत्तान्तम्
११.२.९. लुब्धशृगालकथा
११.३ उपसंहारः
११.४ अभ्यासः

## ११.० परिचयः

Diploma in Sanskrit Examination मध्ये, आहत्य पञ्च पत्राणि सन्ति। तत्र इदं प्रथमं पत्रम्। इदं च पत्रं गद्यपठनं प्रति परिचयसम्पादनाय निर्दिष्टम् अस्ति। अस्य च शतं १०० अङ्काः सन्ति। अत्र च विषयद्वयं भवति। 'हितोपदेशे-मित्रलाभः' इत्ययम् एको विषयः। अयं च प्राचीनगद्यं परिचयं करोति। कथाप्रक्रियां प्रति अवगाहनां ददाति च। एतस्य कृते पञ्चाशत् ५० अङ्काः सन्ति। त्रयः प्रश्नाः वर्तन्ते। तेषु व्यासात्मकः प्रश्नः अन्यतमः। अस्य च विंशति अङ्काः विद्यन्ते। तदर्थं विद्यार्थिनां कृते अत्र अभ्याससम्पादनं भवति।

## ११.१ लक्ष्याणि

सामान्यतः पाठ्यांशस्य अध्ययने कोणद्वयं भवति। जीवनोपयोगित्वम् एकः कोणः। सः वैयक्तिक-जीवनलक्ष्यं साधयितुं समर्थं भवति। द्वितीयः कोणः परीक्षादृक्पथम् (Examination Point Of View)। प्रस्तुतं पाठ्यांशं परीक्षार्थं पठति। कथं वा प्रश्नानां समाधानम् इति

मनसि निधाय पाठ्यांशं परीक्षादृष्ट्या अपि प्रणालिकाबद्धं पठति। प्रश्नपत्रे व्यासात्मकप्रश्नलेखनाय आवश्यकः सन्नाहः अत्र सम्पाद्यते। एतत् पाठ्यांशस्य अध्ययनेन –

- संस्कृतभाषायां लेखनाय कौशलं वर्धितं भवति।
- संस्कृतभाषायां वाक्यरचनायै कौशलं सम्पादितं भवति।
- संस्कृतभाषायाम् आलोचनां कर्तुं प्रेरणं दत्तं भवति।
- परीक्षादृक्पथं अभ्यसितं भवति,आर्जितं च भवति।

## ११.२.व्यासात्मकाः प्रश्नाः

### ११.२.१ चित्रग्रीववृत्तान्तम्

**कथायाः उपक्रमः**

विष्णुशर्मा राजपुत्रान् सन्दिशति।मानवः बुद्धिजीवः। सः सर्वदा बुद्ध्या कार्यं करोति। विवेकः बुद्धिं सूक्ष्मतां नयति। कालस्य, धनस्य, परिश्रमस्य च व्ययं ह्रासयति।कार्यसाधनाय विवेचनाबुद्धिः आवश्यकी। साधनसम्पत्तिस्तु तदनन्तरम् एव। असाधनाः वित्तहीनाः अपि काक-कूर्म-मृग-आखवः कार्याणि साधयन्ति। तथा बुद्धिमन्तः अपि बुद्ध्या, विवेकेन, स्नेहेन च कार्याणि साधयन्ति। तथा भवन्तः अपि बुद्धिं सूक्ष्मं कुर्वन्तु, कार्याणि बुद्ध्यासाधयन्तु इत्येवं बोधयति। राजपुत्राः काक-कूर्म-मृग-आखवः कथं बुद्ध्या कार्यं साधयन्ति इति आसक्त्या पृच्छन्ति। एवं तेषां सावधानतां सम्पाद्य विष्णुशर्मा चित्रग्रीवकथां कथयति।

**अनिष्टदर्शनम्**

गोदावरी तीरे विशालः शाल्मलीतरुः अस्ति। पक्षिणः नानादेशात् आगच्छन्ति। रात्रौ तत्र निवसन्ति। एकदा लघुपतनकः नाम वायसः प्रातःकाले प्रबुद्धः भवति। यमम् इव स्थितं व्याधम् पश्यति। 'अद्य प्रातः एव अनिष्टदर्शनं जातम्। किम् अनभिमतं भवति , न जाने ' इति व्याकुलचित्तः भवति।

**अविचारितं कर्म न कर्तव्यम्**

व्याधः तण्डुलकणान् विकिरति। जालं प्रसारयति। प्रच्छन्नः भवति। अत्रान्तरे - चित्रग्रीवनामा कश्चन कपोतराजःअस्ति।परिवारेण साकं गगने गच्छन् अस्ति। सः तण्डुलकणान् पश्यति। कपोताश्च तण्डुलकणेषु लुब्धाः उआशावहाः, भवन्ति। चित्रग्रीवः तादृशान् कपोतान् ' निर्जनवने तण्डुलकणानां विकिरणं न सम्भवति। एतेषु लोभः हानिकरः भवति।प्रमादं जनयति। कङ्कणस्य लोभेन पथिकः व्यघ्रेण व्यापादितः। अतः सर्वथा अविचारितं कर्म न कुर्वीत,

सुजीर्णमन्नं सुविचक्षणः सुतः,सुशासिता स्त्री ,नृपतिः सुसेवितः।

सुचिन्त्य च उक्तम्, सुविचार्य यत् कृतम्,सुदीर्घ कालेऽपि न याति विक्रियाम्-' इति।

सुष्टु जीर्णम् आप्तम् अन्नम्, सत्- असत् विवेचनाशीलः पुत्रः, क्रमशिक्षणम् अधिगता

स्त्री,सेवकानाम् विश्वसम् आप्तः राजा, लाभ-नष्टपूर्वकं विचार्य उक्तं वचनम्, सुख-दुःखचिन्तनपुरस्सरं कर्मउक्रिया, च बहु कालं भवतु नाम, विकारं न प्राप्नुवन्ति ' इति वदति।

**युवकपोतस्य आवेशः** - आग्रहश्च चित्रग्रीवस्य एतद्-वचनं शृणोति। एकः कपोतः सदर्पम् ' वृद्धस्य वचनं आपत्काले ग्राह्यं भवति। सर्वदा वृद्धानां वचनश्रवणं न आवश्यकम्।सर्वत्र विचारे कृते मानवः भोजनेऽपि न प्रवर्तते। अस्मिन् प्रपञ्चे सर्वं शङ्कया आक्रान्तम्। नित्यशङ्कितः दुःखभागी भवति। अतः अस्मिन् आहारेउ तण्डुलकणानां विषये, संशयः न कर्तव्यः ' इति चित्रग्रीवं वदति। चित्रग्रीवः तूष्णीभवति। कपोताः सदर्पं वचः शृण्वन्ति। सर्वे कपोताः तण्डुल कणेषु लोभेन आकाशात् अवतरन्ति। तत्र जाले पतन्ति। 'लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते।लोभात् मोहश्च नाशश्च लोभः पापस्य कारणम्' ।कपोताः सर्वे लोभात् जाले निबद्धाः परस्परं कलहं कुर्वन्ति। अन्ततः प्रेरकं निन्दन्ति च।

**चित्रग्रीवस्य उदारता - ज्येष्ठता**

तदा चित्रग्रीवः-'अयम् अस्य दोषः न भवति। कदाचित् भृशम् आपतन्तीनाम् आपदाम्, हितैषी अपि कारणं भवति। मातृजङ्घा यद्यपि वत्सस्य सुखाय कल्पते, तथापि सा एव मातृजङ्घा वत्सस्य बन्धने स्तम्भनाय कारणं भवति खलु, विपत्काले दैन्यस्य उपगमनं कापुरुषस्य लक्षणं भवति। अतः धैर्यम् अवलम्ब्यताम्, अस्य प्रतीकारं चिन्तयामः।' वृद्धिम् आप्तुम् इच्छता पुरुषेण- निद्रा, तन्द्रा, भयम्, क्रोधः, आलस्यम्, दीर्घसूत्रता, इत् एते षड् दोषाः हातव्याः भवन्ति।इदानीं वयं सर्वे एकीभवामः। जालम् स्वीकृत्य उड्डयनं (Fly) कुर्मः। अल्पानाम् अपि वस्तूनां संहतिःउऐकमत्यम्, कार्यस्य साधनाय अलं भवति ' इति एवं बहु वदति। ततः पक्षिणः सर्वे जालम् स्वीकुर्वन्ति। आकाशम् उत्पतन्ति। व्याधः खगान् पश्यति। किञ्चिद्दूरम् अनुसरति। पक्षिणाम् अदर्शनेन पश्चात् निवृत्तः भवति।

**मित्रात् लाभः**

ततः पक्षिणः सर्वे चित्रग्रीवस्य मार्गदर्शकत्वे तस्य मित्रस्य हिरण्यकस्य समीपं गच्छन्ति।हिरण्यकः गण्डकी तीरे चित्रवने निवसति। दूरात् आगतान् पक्षिणः पश्यति। अपायशङ्कया मूषिकः द्वारे बिले प्रविशति। चित्रग्रीवः तम् आह्वयति च। मूषिकः ससम्भ्रमं बहिः आगच्छति।'धन्योऽहम्, पुण्यवान् अहम्। मम प्रियमित्रं चित्रग्रीवः समायातः इति सन्तुष्टो भवति। पाशबद्धान् पश्यति ' सखे! किमेतत् ' इति पृच्छति। 'सखे! अस्माकं प्रारब्ध- कर्मणः फलम् इति चित्रग्रीवः निवेदयति।

**सन्मित्रतायाः स्वभावः**

हिरण्यकः चित्रग्रीवस्य बन्धनं छेत्तुं सन्नद्धः भवति। 'मित्र मा मैवं करोतु। प्रथमं अस्मत् मित्राणां पाशान् छिन्धन्तु। ततः मम पाशानां छेदनं करोतु ' इति चित्रग्रीवः विज्ञापयति। तदा मूषिकः - 'मित्र! अहम् बलहीनः। मे दन्ताश्च कोमलाः। एतेषां सर्वेषां पाशान् कथं छेत्तुं प्रभवामि। कदाचित् मे दन्ताः तृट्यन्ति। अतः प्रथमं तव पाशान्

छिन्द्मि। अनन्तरं तव मित्राणां बन्धनानि यावत् शक्यं करोमि' चित्रग्रीवं ब्रवीति। चित्रग्रीवः पुनः - 'मित्र,अस्तु नाम। जालबन्धनात् प्रथमं मम मित्राणि एव विमोचयतु' इति अभ्यर्थयति। हिरण्यकः तत् शृणोति,पुनः - 'आत्मनः रक्षणं त्यक्त्वा, आश्रितानां परिरक्षणं नीतिवेदिनां संमतं न भवति'- इति अन्तरयति (INTERRUPT)। चित्रग्रीवः सन्मित्रं खलु। तत् शृणोति - 'सखे! नीतिः ईदृशी एव। परं अस्मत् मित्राणां दुःखं सोढुम् अहं असमर्थः। अतः एवं ब्रवीमि। मम मित्राणि बन्धमुक्तान् करोतु 'इति पुनः अभ्यर्थयति।' हे मित्र! सर्वः जीवितं, धनानि च सर्वाणि परोपकाराय व्ययीकुर्यात्। सर्वस्य अपि मरणं ध्रुवम्। एवं मरणे निश्चिते सति, परेषाम् उपकारकरणे जीनस्य, धनस्य च त्यागः श्रेयसे भवति।

किञ्च एते मम जात्या,धनेन,बलेन च समानाः भवन्ति। एतेषां परित्यागेन, मम प्रभुता एव व्यर्था भवति। पाञ्चभौतिकदेहस्य रक्षणापेक्षया यशः काये एव मम प्रीतिः अधिका अस्ति। शरीरं क्षणविध्वंसि। सद्गुणाः कल्पान्तस्थायिनः- ' इति पुनः चित्रग्रीवं विज्ञापयति।

हिरण्यकः चित्रग्रीवस्य धर्मबद्धानि वचांसि शृणोति। तस्य मनः प्रहृष्टं भवति, गात्रं च पुलकितं भवति। हिरण्यकः मित्रं चित्राङ्गम् अभिनन्दति। प्रथमं सर्वेषां कपोतानां बन्धनानि, अनन्तरं, चित्रग्रीवास्य बन्धनानि शातयति।

**मित्रस्य सान्त्वनम्- आतिथ्यं च**

मूषिकः जालबन्धनं विधिकृतम् एव इति तान् सान्त्वयति। आतिथ्यं ददाति। मूषिकः सन्मित्रं चित्रग्रीवं अलिङ्गति। आनन्देन प्रेषयति च । एवं विधिवैपरीत्यात् जालबद्धोऽपि सपरिवारः चित्रग्रीवः मूषिकेण रक्षितः भवति।

**कथायाः नीतिः**

एवम् अस्यां कथयां ' वृद्धाः अनुभवज्ञाः, अतः वृद्धवचनेषु आदरः अवश्यकः,तेषां वचनानि आचरणीयानि, वयसि स्थितास्तु आवेशपूर्णाः,आलोचनाहीनाश्च भवन्ति। वयःकृतं दुरभिमानम् प्रमादकरम्, सङ्घशक्तिः कार्य- साधिका, अतः सर्वैः सर्वदा सङ्घटितैः भाव्यम् इत्येते विषयाः कथाद्वारा पाठकानां मनस्सु सोल्लासं स्थापिताः। कथा च इयं पाठकान् आलोचनायै प्रेरयति। मानवानां जीवनं क्रमशिक्षणायुतं करोति च।

**११.२.२.वृद्धव्याघ्र-पथिकयोः कथा**

**कथासंगतिः**

चित्रग्रीवः 'अविचार्य कर्म न कर्तव्यम्,अत्याशा सर्वथा परित्याज्या।नोचेत् प्रमादः सम्भवति। अविचार्य स्वर्णकङ्कणस्य लोभेन,एकः पथिकः वृद्धव्याघ्रस्य आहारः भवति'इति कपोतान् प्रबोधयति।'पथिकः वृद्धव्याघ्रस्य आहारः कथं जातः ' इति कपोतानां च जिज्ञासा उदेति। तदा चित्रग्रीवः कथाम् एतां प्रस्तावयति।

## *हितोपदेशः – मित्रलाभः*

**व्याघ्रस्य कपटता - पान्थस्य च लोभः**

दक्षिणारण्येषु कश्चन वृद्धव्याघ्रः अस्ति। सः प्रतिदिनं स्नानम् आचरति। कुशान् च हस्ते धरति। सरसः तीरे च उपविशति। यातान् आयातान् च ' भोः भोः पान्थाः! इदं सुवर्णकङ्कणम्, गृह्यताम् ' इति वदति च। कश्चन पान्थः कङ्कणे लोभेन आकृष्टः भवति। सः च क्रूरजन्तुः इति सन्देहम् अपि गच्छति। तथापि अर्थस्य आर्जनं खलु,स्वीकर्तव्यं वा न वा आन्दोलितमनस्कः भवति। संशयम् अप्राप्य नरः भद्राणि न पश्यति। मानवः संशयं निरस्यैव आजीवितं सुखानि प्राप्नोति खलु, इत्येवं बहुधा आलोचनां करोति ' कुत्र तव कङ्कणम्' इति व्याघ्रं पृच्छति। व्याघ्रः च हस्तं प्रसारयति। स्वर्णकङ्कणम् दर्शयति। 'मारात्मके त्वयि, अहं कथं विश्वस्तः भवामि ' इति पान्थः स्वीयं संशयं तस्य पुरतः स्थापयति।

**व्याघ्रस्य विश्वासोत्पादकता**

व्याघ्रः कपटस्वभाववान् खलु। सः पथिकस्य विश्वासम् उत्पादयितुम् इच्छति। पान्थम् 'रे पान्थ श्रुणु। अहं यौवनदशायाम् अतिदुर्वृत्तः अस्मि। अहम् अनेकान् गाः मानवान् हतवान् अस्मि। तेन पापेन मम पुत्राः भार्या च मृताः अभवन्। तेन अहम् इदानीं वंशहीनः जातः अस्मि। कृतस्य पापस्य परिहारकतया दानधर्मादिकं चरतु भवान् इति एकेन धार्मिकेण अहं समुपदिष्टः । तेन उपदेशेन अहम् अद्य दानं कर्तुम् उद्युक्तः भवामि। किञ्च मम नखाः दन्ताः च गलिताः सन्ति। अतः परं किं कथयेयम् ? अधुनापि मां न विश्वससि वा। अहम् उदारवान्, मम लोभगुणः नास्ति। अत एव एतत् सुवर्णकङ्कणं यस्मै कस्मैचित् अपि दातुम् इच्छामि।

**लोकप्रवादस्य दुर्निवारता**

तथापि व्याघ्रः मानुषं खादति इति लोकप्रवादः दुर्निवारः। लोकः अन्धः, विश्वासहीनश्च भवति। अन्धतया अनुकरोति। स्वयं बुद्ध्या न चिन्तयति। लोकः, शतम् अन्धाः कूपं प्रविशन्ति इव, प्रवर्तते। एवं लोकः गतानुगतिकः भवति। निन्दन्त्याः कुट्टिन्याः एव उपदेशं स्वीकर्तुम् अभिलषन्ति। धर्मविषये च गोध्नं द्विजम् एव प्रमाणतया स्वीकुर्वन्ति। जनाः न अस्मादृशानां वचांसि विश्वसन्ति।

लोकप्रवादः अनिवार्यः हि। किञ्च मया च धर्मशास्त्राणि अधीतानि। यः परदारेषु मातृवत् प्रवर्तते,यः परद्रव्याणि लोष्ठवत् पश्यति, यः सर्वभूतेषु आत्मनि इव प्रवर्तते स पण्डितः भवति।दातव्यम् इति धिया अनुपकारिणे दानं देयं भवति। उचितदेशे उचितकाले योग्याय च यत् दानं दीयते तत् सात्विकं भवति। तत् दशगुणितं पुण्यम् आयोजयति। अतः सहसि स्नात्वा सुवर्णकङ्कणं गृह्णातु भवान् ' इति एवं बहुधा वदति। पान्थस्य विश्वासं जनयति च।

पान्थस्य अस्थाने विश्वासः पथिकः च व्याघ्रस्य वचः शृणोति। तस्य वचसि विश्वासम् आप्नोति। लोभात् स्नातुं सरसि प्रविशति। तत्र च महापङ्के निमज्जति। बहिः

आगन्तुम् असमर्थः भवति। व्याघ्रः पङ्के पतितं पान्थं पश्यति। सरभसं, सकपटं 'अहह! महापङ्के पतितः वा, बत! का वा अन्या गतिः, तिष्ठतु त्वाम् अहम् उद्धरिष्यामि 'इत्येवं वदन् पथिकस्य कन्धरं धरति।

**पान्थस्य दुराशा-पश्चात् तापः**

तदा पान्थः एवम् पश्चात् तापम् अनुभवति। धर्मशास्त्रस्य पठनेन विवेचनाबुद्धिः न अधिगता भवति। वेदस्य अध्ययनेन अपि विचक्षणाज्ञानं मानवेन आप्तुं न शक्यम्। दुरात्मनः स्वाभाव एव तथा अतिरिच्य वर्तते इति एव विभावनीयं भवति। यथा गवां पयः प्रकृत्या मधुरं भवति तथा दुरात्मनः बुद्धिः स्वभावतः एव दुष्टा भवति। धर्मशास्त्रपठनेन वेदाध्ययनेन वा दुरात्मनः बुद्धेः दौष्ट्यं न अपगतं भवति। अनियन्त्रितमनस्कानां कर्माचरणम्, गजानां स्नानम् इव प्रयोजनशून्यम् एव भवति। आचरणात्मकतां विना केवलं ज्ञानं भारायैव भवति। विधवायाः स्वर्णालङ्कराणां धारणं न सौन्दर्याय कल्पते। प्रत्युत शोभाविहीनताम् एव जनयति। तत् मया भद्रं न कृतम्। अत्र मारात्मके विश्वासः कृतः। एतत् न समीचीनम् ।

उद्धृतप्रवहवतीनां नदीनां विषये विश्वासः नैव कर्तव्यः। आयुधधारिणां जनानां विषये विश्वासः प्रमादकरः। नखवतां व्याघ्र-सिंहादीनां विषये विश्वासः अपायकारी भवति। शृङ्गवतां वृषभादिजन्तूनां विषये विश्वासः नैव कर्तव्यः। स्त्रीषु, राजसु च विश्वासः नैव कार्यः। एते कदाचित् उपकारं कुर्वन्ति। कदाचित् अपकारम् अपि कुर्वन्ति इति एवं बहु चिन्तयति। पश्चात्तापेन आन्दोलनम् अनुभवति। अत्रान्तरे एव पान्थः व्याघ्रेण धृतः भवति। व्यापादितः च भवति। खादितश्च भवति। एवं कङ्कणे लोभेन पान्थः व्याघ्रेण मारितः।

**कथायाः नीतिः;**

धूर्ताः कपटशीलिनः भवन्ति। तेषां वचांसि अन्यानि भवन्ति, कर्माणि च अन्यानि भवन्ति। तेषु विश्वासः नैव कर्तव्यः, अस्थाने आशा आपदः सृजति, सर्वथा अविचारितं कर्म न कर्तव्यम् ' इत्येते विवेकपूर्णाः विषयाः कथामाध्यमेन सुनिपुणम् उपनिबद्धाः। एताश्च कथाः पाठकान् च आलोचनाग्रस्तान् कुर्वन्ति। आलोचनाय प्रेरयन्ति। आत्मनः श्रेयस्साधनाय समर्थाः भवन्ति च।

**११.२.३.मृग-काक-जम्बुक-कथा**

**कथासङ्गतिः**

हिरण्यकः नाम कश्चन मूषिकराजः वर्तते। अयं आप्तमित्रम् अस्ति। चित्रग्रीवस्य स्नेहेन, हिरण्यकः पाशबद्धान् कपोतान् रक्षति।एतत्सर्वं वृक्षस्य उपरि स्थितः लघुपतनकः नाम काकः आसक्त्या पश्यति। आश्चर्यम् आप्नोति। हिरण्यकेन सह मैत्रीं कर्तुम् इच्छति। मूषिकं च पृच्छति। भक्ष्य-भक्षकयोः प्रीतिः विपत्तेः एव कारणं भवति। अहम् अन्नम्। भवान् भोक्ता। अतः आवयोः मैत्री न घटते इति मूषकः वायसस्य वचनं निराकरोति। तत् कथम् इति वायसः पृच्छति। उदाहरणभूताम् मृग-काक-जम्बुक-कथाम् हिरण्यकः एवम् आख्याति।

**मृगस्य अमायकता-जम्बुकस्य कपटवर्तनम्**

मगधदेशे चम्पकवती नाम महत् अरण्यम् किञ्चित् अस्ति। तत्र मृग-काकौ चिरात् महता स्नेहेन सह वसतः। मृगः सोल्लासं स्वेच्छया सञ्चरति। हृष्टाङ्गः पुष्टाङ्गश्च वर्तते। तं च मृगं कश्चन शृगालः पश्यति। तस्य च मांसं खादितुम् अभिलषति। यथाकथञ्चित् खादितुम् अपि निश्चिनोति।एवं निश्चितमनस्कः शृगालः मृगं पश्यति-आः एतत् मांसं सुललितं कथं भक्षयामि। भवतु विश्वासम् उत्पादयामि इत्येवं चिन्तयति।मृगम् उपसर्पति। 'मित्र कुशलं ते ' इति पृच्छति। ' कस्त्वम् ' इति मृगः प्रतिपृच्छति। तस्य च जम्बुकः- 'अहं क्षुद्रबुद्धिः नाम जम्बुकः, बन्धुहीनः अहं अत्र अरण्ये मृतवत् निवसामि। इदानीं मित्रं त्वाम् आसाद्य सन्तोषं प्राप्तवान् अस्मि। अहं तव अनुचरः भवामि ' इति समाधानं ददाति।

काकस्य विवेकिता मृगः च तं जम्बुकम् अनुचरत्वेन अङ्गीकरोति। सायं समये उभौ मृगस्य वासभूमिं गच्छतः। तत्र चम्पक- वृक्षशाखायां काकः निवसति। सः' कोऽयं द्वितीयः ' इति मृगं पृच्छति।मृगश्च ' अस्मत् संख्यम् इच्छन् समागतः कश्चन जम्बुकः ' इति समाधानं ददाति। अनुपदम् एव काकः' मित्र! अकस्मात् आमन्तुना सह मैत्री न कर्तव्या। अज्ञातकुलशीलस्य मार्जारस्य वासं दत्वा, तस्य दोषेण गृध्रः हतः, अतः शृगालेन मैत्री न युक्ता ' इति आश्रयदानं निराकरोति।

**काकं प्रति जम्बुकस्य कोपः**

जम्बुकः काकस्य वचनं शृणोति। कुपितः भवति। काकम् - प्रथमदर्शने भवान् अपि मृगस्य अज्ञात-कुल- शीलः एव। युवयोः मैत्री उत्तरोत्तरा कथं जाता किल। अयं मदीयः, अयं परकीयः इति गणना लघुचेतसाम् एव भवति। विशालहृदयानां तु वसुधा सर्वा अपि एकं कुटुम्बकम् एव। यथा अयं मृगः मम बन्धुः तथा भवान् अपि मम बन्धुः एव, इति वदति।

'किम् अनेन उत्तरवचनेन, सर्वे मिलित्वा सुखं जीवामः, कश्चित् अपि कस्यचित् मित्रं न भवति। कश्चित् अपि शत्रुः न भवति। व्यवहारेण मित्राणि, रिपवश्च जायन्ते ' इति मृगः वदति, त्रयः स्नेहेन वर्तन्ते च।

**जम्बुकस्य मृगमांसभक्षणे उत्कण्ठा**

कालः गच्छति। एकदा शृगालः मृगम्-'सखे! अस्मिन् वनैकदेशे सस्यपूर्णं क्षेत्रम् अस्ति। त्वां तत्र नयामि। क्षेत्रं दर्शयामि ' इति ब्रवीति। अनन्तरं शृगालः तत् क्षेत्रं मृगस्य दर्शयति। मृगः प्रतिदिनं तत्र गच्छति। सस्यं खादति। मृगस्य आगमनं,सस्यस्य खादनं च क्षेत्रपतिः स्वयं पश्यति। पाशम्उ जालम्, आयोजयति। सस्यस्य भक्षणार्थं गतः मृगः जाले बद्धः भवति। कालस्य पाशात् इव, व्याधपाशात् त्रातुं माम् मित्रात् अन्यः कः रक्षितुं समर्थः इति चिन्तुयन्, शृगालाय निरीक्षन् आस्ते।

मृगस्य अमायकता अत्रान्तरे जम्बुकः तत्र आगच्छति। ' कपटोपायेन मनेरथः साधितः।

एतस्य उत्कृत्यमानस्य मांस-रक्त- सिक्तानि अस्थीनि अनुभोक्ष्ये। तानि बाहुल्येन भोजनानि भविष्यन्ति ' इति स्वप्नम् अनुभवन् तत्र आयाति। मृगश्च जम्बुकं पश्यति। सन्तुष्टः भवति। जम्बुकं च आतृततया 'सखे! पाशान् छिन्धि! बन्धनात् मां सत्वरं रक्ष। आपत्सु मित्रं,युद्धे शूरं,ऋणे शौचं,सम्पदां विनाशे भार्यायाः सौशील्यं च ज्ञातुं शक्यते। व्यसनेषु बान्धवान् जानीयात्। उत्सवे,व्यसने,दुर्भिक्षे,शत्रुविग्रहे, राजद्वारे,
श्मशाने च यः तिष्ठति सः बन्धुः भवति खलु ' इति बहुधा अभ्यर्थयति।

**जम्बुकस्य वञ्चना**

जम्बुकः दृढपाशबन्धनस्य परिशीलनं नटति। अन्तः सन्तुष्टः मृगं प्रति 'सखे! स्नायुनिर्मिताः एते पाशाः। अद्य भानुवासरः खलु।अतः एतान् दन्तैः न स्पृशामि।श्वः प्रभाते आगत्य पाशच्छेदं करोमि। अन्यथा मा चिन्तयतु ' इत्येवम् अपभाषते। ततश्च समीपे एव आत्मानं निलीय, मृगमांसखादनाय प्रत्यवतिष्ठते च।

**काकस्य मित्रवात्सल्यम्**

सायं भवति। मृगः आवासं न आगतः। काकः भयम् आप्नोति। काकः इतस्ततः मृगम् अन्विष्यति। अन्ततः कुत्रचित् वनमध्ये बद्धं मृगं पश्यति। 'सखे! किम् एतत्' इति पृच्छति। अवधीरित-मित्रवाक्यस्य फलम् एतत्। हितैषिणां सुहृदां वचनं यः न शृणोति तस्य विपत् संनिहिता भवति खलु, इति वदति। एवं मृगः अपि स्वीयम् अपराधं जानाति।

**दुर्जनस्य स्वभावः- जम्बुकस्य कुटिलता**

'वञ्चकः कुत्र अस्ति' इति काकः ज्ञातुम् इच्छति। मम मांसार्थी अत्रैव तिष्ठति इति मृगः प्रतिवदति। काकः समयं सन्दर्भं च आलोच्य - मया पूर्वम् एव उक्तम्। विरोधः नास्ति इति सर्वं विश्वसनीयं न भवति। गुणवतामपि नृशंसेभ्यः भयं विद्यते हि। गतायुषः, दीपनिर्वाणगन्धं न जिघ्रन्ति। सुहृद्वाक्यं न शृण्वन्ति। अरुन्धतीं
न पश्यन्ति। परोक्षे कार्यस्य हन्तारम्, प्रत्यक्षे प्रियवादिनं मित्रं, विषकुम्भं पयोमुखम् इव वर्जयेत्। प्रियवादी दुर्जनः न कदापि विश्वसनीयः। दुर्जनस्य जिह्वाग्रे मधु तिष्ठति। अत एव प्रियवादी भवति। हृदये हलाहलं विद्यते। अतः दुर्जनः कठिनचित्तः भवति-- इत्येवं दुर्जनस्य स्वभावं उपदिशति।

**काकेन कृतं मृगसंरक्षणम्**

अथ प्रभाते क्षेत्रपतिः तं प्रदेशम् आगच्छति। मृगं पाशबद्धं पश्यति। काकः मृगसमीपम् आगच्छति - 'सखे! 'मृग! त्वम् वातेन उदरं पूरयतु। पादान् प्रसारयतु, शरीरं स्तब्धीकरोतु। आत्मानं मृतवत् संदर्शयतु। यदा अहं शब्दं करोमि तदा त्वम् उत्थाय सत्वरं पलायतु' इति उपायं कथयति। मृगः तथा इति अङ्गीकरेति। तथैव मृतवत् तिष्ठति च।अन्येद्यवि प्रातः क्षेत्रपतिः आगच्छति।मृगं पश्यति।'अयं मृगः स्वयम् एव मृतः' इति चिन्तयति।बन्धनात् मोचयति।पाशसङ्ग्रहणप्रयत्नम् अनुतिष्ठति। काकश्च कौ कौ इति शब्दं करोति। तत् श्रुत्वा मृगः अनुपदम् सत्वरम् उत्थाय पालायति। ततश्च वञ्चितः

क्षेत्रपतिः कोपेन मृगं हन्तुं सन्निहितं लगुडं निक्षिपति। सः लगुडः लक्ष्यात् भ्रष्टः सन् शृगालं प्रहरति।तेन च प्रहारेण शृगालश्च हतः भवति। अत्युत्कटैः पाप-पुण्यैः मानवः त्रिषु वर्षेषु वा, त्रिषु मासेषु वा त्रिषु पक्षेषु वा त्रिषु दिनेषु वा इहैव फलम् अनुभवति। एवं वञ्चनापरः जम्बुकः मृगमांसार्थी अन्ततः लगुडैन हतः भवति। अतः भक्ष्य-भक्षकयोः मैत्री नैव यक्ता भवति इति हिरण्यकः लघुपतनकं कथयति।

**कथायाः नीतिः**

एवम् अत्र मृगस्य अमायकता, जम्बुकस्य धूर्तता,काकस्य विवेकिता च वर्णिता। अक स्मात् आगन्तुना मैत्री च न कर्तव्या ,भक्ष्य भक्षकयोः मैत्री न कदापि सम्भवति, दुर्जनः परिहर्तव्यः,दुर्जनः नैव विश्वसनीयः, वञ्चकः वञ्चितः अपि भवति इत्येते जीवनयापनोपायाः अत्र कथा व्याजेन कुशलतया समुपनिबद्धाः। मानवस्य जीवनकला -अभ्यसनाय इमाः कथाः समर्थाः भवन्ति। मानवजीवनयात्रां च सुगमं कुर्वन्ति।

**११.२.४. जरद्गव-दीर्घकर्णयोः कथा**

**कथासङ्गतिः**

मगधदेशे चम्पकवती नाम अरण्यानीउमहत् अरण्यम्,अस्ति।तत्र मृग-काकौ स्तः।तौ च गाढस्नेहितौ स्तः। कदाचित् कश्चन शृगालः मृगं पश्यति।पुष्टाङ्गं च तं भक्षितुम् अभिलषितः भवति।अनुपदम् एव शृगालः तेन मैत्रीं करोति। काकस्तु शृगालस्य मैत्रीं न अङ्गीकरोति। 'अकस्मात् आगन्तुना सह मैत्री न युक्ता - अज्ञातकुल शीलस्य वासः देयः न कस्यचित्, एवम् अज्ञातस्य आश्रयं दत्त्वा, गृध्रः पक्षिभिः व्यापादितः 'इत्येवं जागरूकतां कथयति। पक्षिभिः गृध्रः कथं व्यापादितः ? इति गृध्रस्य वृत्तान्तश्रवणे मृगस्य च जिज्ञासा उदेति।'तत् कथम् ? 'इति पृच्छति। तदा काकः मृगाय जरद्गव -दीर्घकर्णयोः वृत्तान्तम् एवं वर्णयति।

**जरद्गवस्य जीवनम्**

गङ्गायाः तीरे गृध्रकूटनामकः कश्चन पर्वतः अस्ति।तत्र महान् पर्कटीवृक्षः अस्ति। तस्य कोटरे एकः गृध्रः प्रतिवसति। तस्य जरद्गवः इति व्यवहारः अस्ति। सः च वृद्धः, तस्य नखाः गलिताः सन्ति। नयनयोः दृष्टिश्च अपगता विद्यते। सः उदरम् अपि पोषयितुम् असमर्थः अस्ति। एवं स्थिते वृक्षे वासिनः पक्षिणः एव तस्य सहायम् आचरन्ति। अन्नपानादिकं कल्पयन्ति। सः अपि तेषां सहायम् अविस्मृत्य,यथाशक्ति पक्षिणाम् असमवधाने, पक्षिशावकान् पालयति च। एवम् असौ जीवनं यापयति।

**मार्जार-गृध्रयोः संवादः**

कदाचित् कश्चन मार्जारः तत्र आयाति। तस्य च नाम दीर्घकर्णः। सः च वृक्षस्थितान् पक्षिशावकान् पश्यति। तेषां मांसस्य खादने उत्कण्ठितः भवति। वृक्षं च उपसर्पति। मार्जालं दृष्ट्वा पक्षिशाबकाश्च भयेन कोलाहलं कुर्वन्ति। तत् श्रुत्वा जरद्गवः 'कोऽयम् आयाति' इति पृच्छति।

तावत् सः दीर्घकर्णः तत्र गृध्रः अस्ति इति न जानाति। अकस्मात् गृध्रस्य शब्दं श्रुत्वा भीतः भवति। गृध्रस्य सकाशात् पलायितुम् असमर्थः भवति। ' अधुना अस्य सन्निधाने पलामितुम् अक्षमः अस्मि। तद्यथा भवितव्यं तत् भवतु। अस्य विश्वासम् उत्पादयामि ' इति चिन्तयति। अकस्मात् साहसी भवति । गृध्रम् उपसर्पति। 'आर्य! त्वाम् अभिवन्दे। अहं मार्जरः ' इति परिचयं करोति। अनुपदम् एव गृध्रः उग्रः भवति। ' भो दुरात्मन्! दूरं गच्छ। नो चेत् त्वां हनिष्यामि ' इति तर्जयति। मार्जारः भीतभीतः सन् ' श्रूयतां मम वचनम्। ततः यदि अहं वध्यः तदा हन्तव्यः। जातिमात्रेण न कश्चित् हन्यते,न वा पूज्यते, व्यवहारातः एव वध्यः पूज्यो वा भवति ' इति सविनयम् विज्ञापयति। 'किमर्थम् आगतः असि ' इति गृध्रः पृच्छति।

**मार्जारस्य कपटता**

मार्जारः पुनः आत्मानम् एवं समर्पयति ' अहम् अत्र गङ्गातीरे वसामि। नित्यं स्नायी अहम्। मांसाहारं परित्यक्तवान् अस्मि। ब्रह्मचर्यम् आचरामि। चान्द्रयणव्रतम् अनुतिष्ठामि। 'भवन्तः धर्मज्ञानरताः प्रेम-विश्वास- भूमयः ' इति पक्षिणः अनेकवारं मम अग्रे प्रस्तुवन्ति। भवन्तः विद्यावयोवृद्धाः। अतः भवद्भ्यः धर्मं श्रोतुम् इह आगतः। किन्तु भवन्तश्च एतादृशाः धर्मज्ञाः यत् माम् अतिथिं हन्तुम् उद्यताः। गृहम् आगते अरौ अपि उचितम् आतिथ्यम् कार्यम्, एषः गृहस्थस्य धर्मः। यदि गृहे अन्नं नास्ति चेत् सुप्रीतेन वचनेन अपि अतिथिः पूजनीयः। बालो वा भवतु, वृद्धो वा भवतु, युवा वा भवतु, गृहम् आगतः यः कोऽपि वा भवतु, तस्य तस्य सर्वस्य पूजा विधातव्या भवति। अभ्यागतं स्वयं विष्णुं कथयन्ति खलु। साधवः गुणरहितेषुउ अल्पेषु, दुष्टेषु,अपि प्राणिषु दयां उ करुणां कुर्वन्ति। यस्य गृहात् अतिथिः निराशः गच्छति, सः अतिथिः गृहस्थाय पापं ददाति। पुण्यम् आददाति। गच्छति, इति भावनीयम्। अतिथिः सर्वदेवमयः भवति। अतः संस्कारहीनः, अनागरिकः, अपि वा भवतु, सः यदि संस्कारिणां,नागरिकाणां गृहम् आगतः भवति चेत्, सः यथायोग्यं पूजनीयः एव भवति, इति कपटनीतीः बहुशः वदति। नियमान् च कथयति। गृध्रस्य विश्वासम् उत्पादयति।

**गृध्रस्य अपराधभावनम्**

गृध्रः मार्जारस्य तत् वचः शृणोति। आत्मनि गौरवाय किंचित् असौकर्यम् लज्जां च अनुभवति। मार्जारम् -- मार्जारो हि सहजतया मांसरुचिः भवति खलु। तत्रापि च पक्षिशाबकाः निवसन्ति किल। अतः एव अत्र निवासो मास्तु, इति मया उक्तम्, तावदेव, मनसि अन्यथा मा चिन्तयतु' इति समाश्वासयति ।

**मार्जारस्य वञ्चकता**

तत् श्रुत्वा मार्जारः भूमिं स्पृशति। कर्णौ पिदधाति।शान्तं पापं,शान्तं पापम् इति उच्चैःअनाकर्ण्यं परिहरति। ततश्च 'मया धर्मशास्त्रं पठितम् अस्ति। धर्मश्च अनुष्ठीयते। अहं वीतरागश्च जातः अस्मि। दुष्करं चान्द्रायणव्रतं मया स्वीकृतम् अस्ति। धर्मशास्त्रेषु अन्येषां धर्माणां विषये परस्परं विवादः अस्तु नाम।परं 'अहिंसा परमो धर्मः' इत्यत्र

ऐकमत्यम् अस्ति खलु। ये च हिंसां त्यजन्ति, सुख-दुःखादिद्वन्द्ववृत्तिं सहन्ते, सर्वेषां प्राणिनां आश्रयदातारः च भवन्ति, ते स्वर्गम् अधिगच्छन्ति।सुहृद्धर्मः एकः एव मरणे अपि अनुयाति।पुत्रादिसम्बन्धास्तु शरीरेण समं नाशं यान्ति। मरणं सर्वेषां बाधाकरम् दुःखदायि च भवति, इति बुद्ध्या विचिन्त्य, इतरेषां रक्षणं कर्तव्यम्। स्वच्छन्द- वनजातेन शाकेनापि उदरपूरणं कर्तुं शक्यते।अतः कुत्सितोदरस्य कृते पापाचरणम् अनावश्यकम् एव खलु' इति बहुधा गृध्राय मार्जारं वदति। इतः अपि अधिकं विश्वासं जनयति। गृध्रः अपि मार्जारवचनेषु विश्वस्तः भवति।मार्जारं तत्रैव वस्तुम् अङ्गीकरेति। अन्ततः मार्जारः स्वस्य आशयं साधयति। तरुछायायाम् एव तिष्ठति।

**मार्जरस्य घातुकता**

कतिचन दिनानि च अतीतानि। मार्जारः वञ्चकः खलु। पक्षिशावकान् आक्रमति।स्वकोटरम् आनयति। सुष्टु खादति। मृतपक्षिशाबकानाम् अस्थीनि तु कोटरे अन्धस्य गृध्रस्य पुरतः स्थापयति च। पक्षिणः स्वशाबकान् अदृश्या न् जानन्ति। शोकार्ताः सन्तः इतस्ततः अन्विष्यन्ति च।

**जरद्गवस्य व्यापादनम्**

मार्जारः, पक्षिणः स्वशाबकानां समाचाराय प्रयतन्ते इति विषयं जानाति। कोटरात् बहिः निस्सरति। कुत्रापि पलायितः भवति। इतस्ततः अन्विष्यन्तः पक्षिणः तरुकोटरे शाबकानाम् अस्थीनि पश्यन्ति। अनैनैव जरद्गवेन अस्माकं शाबकाः खादिताः इति निश्चिन्वन्ति। सर्वे पक्षिणः गृध्रं व्यापादयन्ति। एवं मार्जारस्य आश्रयस्य दानदोषात्, सज्जनः अपि गृध्रः पक्षिभिः हतः भवति। अतः 'अज्ञातकुलशीलस्य वासो देयः न कस्यचित्'इति काकः मृगाय जरद्गववृत्तान्तं कथयति।

**कथायाः नीतिः**

एवम् अस्यां कथायाम् अज्ञातकुलशीलस्य मार्जारस्य आश्रयदानम्,तेन गृध्रस्य अविवेकिता,मार्जारस्य विश्वासजनकानि वचनानि, मार्जारस्य वञ्चनास्वभावः,पक्षिशाबकानां मारणम् , तस्य अपराधस्य जरद्गवस्योपरि निपतनम्, पक्षिभिः तस्य जरद्गवस्य व्यापादनम् इति एते अंशाः वर्णिताः। ते च पाठकानाम् 'अज्ञातकुलशीलस्य क्वचिद् अपि वासः न देयः'इति अमुम् अंशं बोधयितुं समर्थाः भवन्ति।

**११.२.५.काक- मूषिकयोः मैत्री**

**कथायाः नेपथ्यम्**

गोदावरीतीरे विशालः शाल्मलीतरुः कश्चित् अस्ति।नानादेशात् पक्षिणः तत्र आगच्छन्ति। रात्रौ निवसन्ति। तथा लघुपतनकनामकः कश्चन वायसः तत्र प्रतिवसति। एकदा उषःकाले कश्चन व्याधः तत्र आगच्छति। तण्डु - लकणान् विकिरति। जालं प्रसारयति। पार्श्वे प्रच्छन्नः प्रतीक्षते च। आशया कपोताः भूमौ निपतन्ति। जाले बद्धाः भवन्ति। चित्रग्रीवः कपोतानां नायकः। तस्य वचनेन ते पक्षिणः जालेन सह आकाशमार्गे

उड्डयन्ति। किमेतत् भवेत् इति लघुपतनकः अपि तान् अनुसरति। चित्रग्रीवः सपरिवारः मित्रस्य हिरण्यकस्य (मूषिकस्य) सहायेन बन्धनात् मुक्तः भवति।
हिरण्यकेन मैत्रीं कर्तुं काकस्य अभिलाषः लघुपतनकः चित्रग्रीववृत्तान्तं पश्यति। हिरण्यकेन मैत्रीं कर्तुम् अभिलषति। वृक्षात् अधः आगच्छति। हिर- ण्यकस्य अन्तिकं गच्छति। 'हिरण्यक! त्वं कपोतान् बन्धमुक्तान् कृतवान्। अतः श्लाघनीयः असि। अतः अहमपि त्वया सह मैत्रीम् इच्छामि। अतः मां मैत्र्या अनुग्रहीतुम् अर्हसि' इति पृच्छति। हिरण्यकः विवरस्य अभ्यन्तरे एव तिष्ठति। अन्ततः एव 'कस्त्वम्' इति प्रतिप्रश्नं करोति।'अहं लघुपतनकः नाम वायसः' इति काकः उत्तरं ददाति। काकेन मैत्रीकरणाय हिरण्यकस्य तिरस्करणम् हिरण्यकः विहस्य एवं वदति - 'का त्वया सह मैत्री ? सम्बन्धः सर्वदा प्रीत्या भवति। सर्वत्र प्रीति बन्धः मैत्रीं जनयति। अहम् अन्नम्, भवान् भोक्ता। अतः कथम् आवयोः प्रीतिः भविष्यति। भक्ष्य-भक्षकयोः प्रीतिः विपत्तेः एव कारणं भवति। मृगः शृगालेन स्नेहं सम्पाद्य पाशबद्धः, अन्ते काकेन रक्षितः, इति ज्ञातः एव खलु ।

**स्नेहकरणाय पुनः काकस्य अभ्यर्थनम्**

काकः एवं समादधाति- 'मित्र! भवतः भक्षणेन एव मम क्षुत् समसिता न भवति। भवान् मम आहाराय न पर्याप्तः एव। यावत् त्वं जीवसि , तावत् अहम् अपि चित्रग्रीवः इव जीवामि। नित्यवैरिषु पशु-पक्ष्यादिष्वपि पुण्य कर्मसु विश्वासो दृष्टः। सज्जनाः साधुशीलिनः। अतः तेषां स्वभावो न कदापि न विक्रियते। साधुः प्रकुपितः अपि मनोविकारं न लभते। नहि तृणोल्कया सागरजलं तापयितुं शक्यते ? इति काकः स्नेहं कर्तुं पृच्छति।

**चपलेन सह मैत्री न युक्ता - शत्रुणा सन्धिः न विधेया**

हिरण्यकः स्नेहस्य निराकरणाय कारणान्तरम् एवं दर्शयति 'लघुपतनक!त्वं चपलः। चपलेन सह मैत्री न युक्ता। मार्जारः महिषः, मेषाः, काकः, कापुरुषः एते पञ्च विश्वासेन हानिं कुर्वन्ति। अतः तत्र विश्वासः न हितकरः भवति। किञ्च 'भवान् अस्माकं शत्रुपक्षः। शत्रुणा सन्धिः न विधेया। सुष्टु नियमनिरूपिता अपि सन्धिः ,शत्रुणा तु न कर्तव्यः। जलम् अग्निश्च नित्यं वैरिणौ। जलस्य अग्नेश्च मैत्री आलोचनायाम् अपि न भवति। एवं स्थते, सुतप्ते जले वह्नेः एव लक्षणानि सन्ति, इति कृत्वा सुतप्तेन जलेन यदि वह्निः स्नेहं करोति, तदा वह्ने- परिस्थितिः कीदृशी इति वयं जानीमः एव। सुतप्तम् अपि जलं वह्निं शमयति एव खलु। विद्यया अलङ्कृतोऽपि दुर्जनः परिहर्तव्यः एव भवति। मणिना भूषितः अपि सर्पः स्वभोगैः जनानां भयम् उत्पादयति एव खलु। यत् अशक्यं तत् न कदापि कर्तुं, शक्यं भवति। यत् शक्यं तत् शक्यम् भवति। उदके शकटं न याति। न च स्थले नौः गच्छति। यः शत्रुं विश्वसिति, यः विरक्तां भार्यां च विश्वसिति, तस्य जीवितम् अन्तमेव भवति, एवं हिरण्यकः बहुधा वदति। काकेन सह मैत्रीं निराकरोति।

**प्राणत्यागाय काकस्य शपथनम्**

लघुपतनकः हिरण्यकस्य मैत्रीनिराकरणवचांसि शृणोति। पुनः हिरण्यकाय 'हिरण्यक! मया सर्वं श्रुतम्। त्वया सह मैत्री कर्तव्या इति मम दृढः संकल्पः अस्ति। यदि मैत्री न सम्भवति तव द्वारि निराहारः आत्मानं व्या- पादयिष्यामि। दुर्जनस्य स्नेहः मृद्घटवत् सुखेन भेद्यः, दुस्सन्धानश्च भवति। सज्जनस्य स्नेहस्तु कनक घटवत् दुर्भेद्यः, आशु सन्धेयश्च भवति। लोहानां द्रवत्वस्य कारणतः स्नेहः जायते। मृग-पक्षिणां स्नेहः निमित्तात् जायते। मूर्खाणां मैत्री भयात् लोभाच्च सम्भवति। सतां मैत्री केवलं दर्शनात् एव सम्भवति। सुहृज्जनाः नारिकेलसमाकाराः भवन्ति। दुर्जनाः बदरिकाकाराः, बहिः एव मनोहराः भवन्ति, इति लघुपतनकः, स्नेहकरणाय स्वीयं द्रुढं सङ्कल्पं स्वस्य आलोचनां च कथयति।

**सतां सङ्गतिः**

अतः एव सतां सङ्गतिः इष्यते। शुचित्वम्, त्यागिता, शौर्यम्, सुख-दुःखयोः समानस्थितिः,दाक्षिण्यम्, अनुरक्तिः, सत्यता एते सुहृदः गुणाः भवन्ति। भवान् एतैः गुणैः उपपन्नः अस्ति। अन्यः मया कः सुहृत् प्राप्तव्यः, अन्यं स्नेहितं न वृणोमि, किन्तु त्वाम् एव मित्रं स्वीकरोमि ' इति लघुपतनकः सद्गुणान् प्रस्तावयति। तद्वचनम् आकर्ण्य हिरण्यकः बहिः आगच्छति। एवं वदति -'लघुपतनक ! भवताम् अनेन वचनामृतेन अहं आप्यायितः। रहस्यभेदः, याचना, निष्ठुरता, चलचित्तता, क्रोधः, निस्सत्यता, द्यूतम्, एतत् मित्रस्य दूषणं भवति। पटुत्वं,सत्य- वादित्वं कथाप्रसङ्गेन बुध्येत। अस्तब्धत्वम्, अचापल्यं प्रत्यक्षेण अवगम्येत। दुरात्मनाम्, मनसि अन्यत्, वचसि अन्यत्, कर्मणि अन्यत् च भवति। महात्मनां तु मनसि एकं, वचसि एकं, कर्मणि एकं च भवति। अतः भवतः अभिमतम् एव भवतु ' इति एवं हिरण्यकः वदति। लघुपतनकेन मैत्रीं विदधाति। भोजनविशेषैः वायसं सन्तो- षयति। विवरं प्रविशति। वायसः अपि स्वस्थानं गच्छति। ततः प्रभृति तयोः अन्योन्य-आहारप्रदानेन कुशलप्रश्नैः स्वेच्छालापैश्च कालः गच्छन् आस्ते। एवं काक-हिरण्यौ मैत्रीं प्राप्नुतः।

**कथायाः नीतिः**

सर्वदा भक्ष्य-भक्षकयोः मैत्री न युज्यते। प्रयत्नपूर्वकं परस्परं विश्वासम् अधिगत्य एव स्नेहः कर्तव्यः अस्ति। सज्जनमैत्री एव कर्तव्या दुर्जनमैत्री च न करणीया, सर्वथा शत्रुणा सन्धिःउ स्नेहः न आमोदयोग्यः, प्रत्युत प्रमादकरः इत्येते विषयाः प्रस्तुताः सन्ति। एते च जीवनविधानं परिवर्तयन्ति। अवगमनाय, आलोचनाय, पाठकान् सिद्धं कुर्वन्ति च।

**११.२.६. हिरण्यकस्य वृत्तान्तम्**

**कथायाः सङ्गतिः**

लघुपतनकः हिरण्यकेन मैत्रीं प्राप्नोति। कदाचित् लघुपतनकः तं प्रदेशं परित्यज्य दण्डकारण्ये कर्पूराभिधानं सरः गन्तुम् इच्छति। तत्र काकस्य मित्रं मन्थरकः नाम कच्छपः

प्रतिवसति। उभौ अपि कच्छपस्य समीपं गच्छतः। तत्र वायसः वदति ' सखे ! मन्थर ! सविशेषं पूजाम् अस्मै विधेहि। अयं पुण्यकर्मणा धुरीणः। अपि च, कारुण्यरत्नाकरः हिरण्यकनामा मूषिकराजः। एतस्य गुणान् गातुं जिह्वासहस्रद्वयेन आदिशेषोऽपि न समर्थः ' इति वदति। चित्रग्रीवस्य उपाख्यानं वर्णयति। मन्थरः सादरं हिरण्यकं सम्पूजयति। ' भद्र ! भवतः निर्जनवनस्य आगमनकारणं कथयतु ' इति पृच्छति। हिरण्यकः स्ववृत्तान्तम् एवम् कथयति।

**चूडाकर्णः**

चम्पकनगरे परिव्राजकमठः कश्चित् अस्ति। तत्र चूडाकर्णः नाम परिव्राट् प्रतिवसति। स च भोजनावशिष्टं भिक्षान्नपात्रं नागदन्तके अवस्थापयति। रात्रौ तत्रैव स्वपिति। अहं (हिरण्यकः) तत्र उत्प्लुत्य प्रत्यहं तत्रत्यं खादामि। एकदा चूडाकर्णस्य प्रियसुहृत् वीणाकर्णः समागच्छति। उभयोः कथाप्रसङ्गः प्रचलति। अन्यासक्तं चूडाकर्णं ' किमर्थं भवान् कथाविरक्तः संजातः ' इति पृच्छति। चूडाकर्णः ' न अहं कथायां विरक्तः। अयं मूषिकः सदा पात्रस्थं भिक्षान्नं उत्प्लुत्य खादति। तत् अहं पश्यामि ' इति मित्रम् अनुनयति।

**मूषिक-उत्प्लवनस्य धनबाहुल्यं कारणम्**

वीणाकर्णः नागदन्तं पश्यति। 'मूषिकः स्वल्पबलः अपि एतावत् दूरं कथं उत्पतति। अत्र केनापि कारणेन भवितव्यम् ' इति उदारहणतया चन्दनदासकथां श्रावयति। क्षणं विचिन्त्य परिव्राजकेन उक्तम् ' धनबाहुल्यमेव अत्र कारणं भविष्यति। जगति वस्तुतः धनवान् एव बलवान् भवति। लोके सर्वे सर्वत्र सर्वदा तथा एव चिन्तयन्ति च। राज्ञाम् राजकीयाधिकारः अपि धनस्य कारणतः उपजायते खलु। ततः खनित्रम् आनयति। विवरं खनति। चिरात् सञ्चित्य विवरे स्थापितं मूषिकस्य मम धनं गृह्णाति। ततः प्रभृति शक्तिहीनः बलहीनः च जातः। उत्साहेन रहितः च अहं आहारम् अपि सम्पादयितुम् अक्षमः सन्, मन्दं मन्दं कालं यापयामि।

**चूडाकर्णस्य परिहासः**

धनहीनं मां दृष्ट्वा चूडाकर्णः परिहासं करोति। धनेन लोके बलवान् भवति। धनादेव पण्डितः भवति। धनेन रहितस्य अल्पबुद्धेः पुरुषस्य क्रियाः सर्वाः अपि ग्रीष्मे कुसरितः इव प्रभावहीनाः भवन्ति। यस्य धनं भवति तस्यैव मित्राणि भवन्ति। तस्यैव बान्धवाः, यस्य अर्थः भवति, सः एव लोके पुरुषः भवति। धनवान् एव पण्डितः भवति। अपुत्रस्य गृहं शून्यं भासते। मूर्खस्य दिशः सर्वाः शून्याः भवन्ति। परं दरिद्रस्य सर्वं शून्यं भवति। मरणात् अपि दारिद्र्यम् एव नीचं भवति। एतत् सर्वं मया आलोच्य अत्रउ चम्पकनगरे, अवस्थानम् अनुचितम् इति चिन्तितम्। यत्नतः गोप्यानि एतत् दुःखभूयिष्ठं वृत्तान्तं इतः पूर्वं यस्य कस्यापि न निवेदितम् अस्ति। मतिमान्, अर्थस्य नाशम्, मनसः तापम्, गृहे दुश्चरितानि,वञ्चनम्,अपमानं च,न प्रकाशयति। मानवः प्रयत्नपूर्वकं आयुः,

वित्तम्, गृहच्छिद्रम्,मन्त्रम् उआलोचनाम्,मैथुनम्उसम्भोगम्,भेषजम्, तपः, दानम्, अपमानं च नव गोपयेत्। मनस्वी प्राणत्यागाय अपि सिद्धः भवति, परं कदाचित् अपि दीनतां न प्राप्नोति। अनलः निर्वाणम् अपि वा याति। कदापि शीततां तु न गच्छति।

**याचनायाः नीचता**

अत्रउ चम्पकनगरे, याचनया जीवनं अतीव गर्हितं भवति। दारिद्र्यात् ह्रीः= लज्जा,एति=अभिमानं त्यजति। लज्जारहितो जनः, सत्वं त्यजति। निस्सत्वः सर्वैः परिभूयते। परिभवात् निर्वेदं प्राप्नोति। निर्विण्णः बुद्धिहीनो भवति। निर्बुद्धिः क्षयम् एति। अतः सर्वासाम् आपदां निर्धनता मूलम् । एवं बहुधा विचिन्त्य किं परपिण्डेन आत्मानं पोषयामि वा इति अहं चिन्तितवान् अस्मि। तदपि द्वितीयं मृत्युद्वारम्। प्राणिनां पल्लवानां ग्रहणाय यावत् अपेक्षितं तावन्मात्रं पाण्डित्यम्,दनेन क्रीतं मैथुनम्,पराधीनं भोजनं च एते त्रयः दुःखदायकाः भवन्ति, इति आलोच्य, लोभात्, पुनः धनसम्पादनाय प्रयतितवान् अस्मि। लोभः अपि प्रमादकरः एव भवति। लोभेन बुद्धिः चलति। लोभः तृषाम्उ आशां जनयति। आशया पीडितः मानवः इह लोके परलोके च महत् दुःखम् अनुभवति। ततः अहं यावत् मन्दं मन्दं उपसर्पामि, तावत् वीणाकर्णः मां जर्जरवंशखण्डेन ताडयति।

**तुष्टिः आवश्यकी**

तदा अहम् एवं चिन्तितवान् अस्मि - यस्य मानसं सन्तुष्टं भवति तस्य सर्वाः सम्पत्तयः भवन्ति। यस्य आशा न भवति सः एव श्रुतवान् भवति। सः एव कार्यदक्षः भवति। तृष्णया वाह्यमानस्य योजनशतम् अपि दूरं न भवति। सन्तुष्टस्य, हस्तस्थे अपि वस्तुनि अपि आदरः न भवति। तस्मात् अत्रैव अवस्थानम् उचितं न भवति। कुलस्य प्रतिष्ठार्थं एकस्य परित्यागः उचितः भवति। ग्रामस्य सौकर्यार्थं वा, सेवनार्थं वा कुलस्य त्यागः युक्तः एव भवति। जनपदः नाम कतिपयानां ग्रामाणां समुदायः भवति। एवं बहूनां ग्रामाणां सेवनार्थं, ग्रामस्य स्वीयस्य एकस्य, त्यागः समुचितः एव भवति। स्वस्यउआत्मनः रक्षणार्थं स्थितायाः पृथिव्याः त्यागः अपि योग्यः एव। निरायासं पानीयं, भयरहितं भोजनं यत्र सम्भवति तत्रैव मम निर्वृतिः भवति इति आलोच्य निर्जनं वनं गतवान् अस्मि। अस्मत् पुण्योदयेन काकेन मैत्री लब्धा। पुनश्च अधुना पुण्यपरम्परया भवत्सकाशम् आगतः। इह च स्वर्गानुभतिं प्राप्नोमि। संसारविषवृक्षस्य काव्यामृतरसास्वादः, सज्जनैः सह सङ्गमः, इति रसवत्फले द्वे भवतः। तत्र भवतोः मैत्रीं प्राप्य अहं सुखी भवामि। एवं प्रकारेण हिरण्यकः स्ववृत्तान्तं मन्थराय कथयति। तदा मन्थरकः 'युष्माभिः अतिसञ्चयः कृतः तस्य अयं दोषः। उपार्जितानां वित्तानां त्यागः एव हि रक्षणम्। तटाकोदरजलानां परीवाहः परिक्रिया भवति। निजसौख्यं निरुन्धानः यः मानवः धनम् आर्जयति सः क्लेशम् एव प्राप्नोति। अत्याशायुक्तस्य धनम्, देवेभ्यः न गच्छति। विप्रान् न प्राप्नोति। बन्धुभ्यः अपि उपयोगाय न कल्पते। स्वयं च न अनुभवति एव। केवलं वह्नि-तस्कर-पार्थिवैः ह्रियते।

धनस्य दानं, भोगः नाशः इति तिस्रः गतयः भवन्ति। यो न ददाति, न भुङ्क्ते, तस्य तृतीया गतिः, नाम नाशः भवति। सञ्चयः नित्यं कर्तव्यः। कर्तव्यः न अतिसञ्चयः इति मन्थरः, हिरण्यकस्य कष्टानां कारणं कथयति।

**कथायाः नीतिः**

अत्र, धनस्य प्रभावः ज्ञापितः।लोभस्य दुष्प्रभावः वर्णितः।निर्धनतायाः परिणामाः बोधिताः। याचनायाः नीचता अभिवर्णिता। तृप्तेः आवश्यकता प्रतिपादिता।एतेषु विषयेषु अवगाहनज्ञानं पाठकं सुखजीवनाय सिद्धं करोति।

**११.२.७. चूडाकर्ण-वीणाकर्णयोः संवादः**

**कथायाः सङ्गतिः**

लघुपतनकः कश्चन वायसः अस्ति। सः हिरण्यकेन मूषिकेण मैत्रीं प्राप्नोति। कदाचित् लघुपतनकः तं प्रदेशं परित्यज्य दण्डकारण्ये कर्पूराभिधानं सरः गन्तुम् इच्छति। तत्र काकस्य मित्रं कच्छपः प्रतिवसति। तस्य च नाम मन्थरकः। काक-मूषिकौ उभौ अपि कच्छपस्य समीपं गच्छतः। आतिथ्यं प्राप्नुतः। तत्र कदाचित् मन्थरकः मूषिकम् आगमनकारणं पृच्छति। हिरण्यकः एवं वदति।

**चूडाकर्णः**

चम्पकानाम्नी नगरी अस्ति। तत्र परिव्राजकानां, मठःउ परिव्राजकानां कार्यकलापानां निलयः, आवास- प्रदेशः कश्चित् अस्ति। तत्र चूडाकर्णः नाम परिव्राट् प्रतिवसति। प्रतिदिनं सः भोजनं करोति। अनन्तरं अवशिष्टं भिक्षापात्रे स्थापयति। नागदन्ते शिक्यां क्षिपति। निश्चिन्तः स्वपिति। अहं (हिरण्यकः) च उत्प्लुत्य प्रतिदिनं भिक्षा -पात्रे स्थापितम् अन्नं खादामि।

एकदा तस्य मित्रं वीणाकर्णः समायाति। तयोः कथाप्रसंगः प्रचलति। चूडाकर्णः मां परिशीलति एव। मध्ये मम (हिरण्यकस्य) त्रासार्थं जर्जर वंशस्य खण्डेन चूडाकर्णः भूमिं ताडयति। एवं वीणाकर्णस्य प्रसङ्गं प्रति चूडा- कर्णः अनासक्तः भवति। वीणाकर्णः ' सखे! किमर्थं मम कथायां अनासक्तः भवान्' इति पृच्छति। ' मित्र! अहं न अनासक्तः। एनं मूषिकं पश्य! मम आहारम् अपहरन् सदा पात्रस्थं भिक्षान्नम् उत्प्लुत्य भक्षति ' इति चूडाकर्णः समादधाति।

**मूषिक**- उत्प्लवने धनबाहुल्यस्य कारणता वीणाकर्णः नागदन्तं निशितं पश्यति। नागदन्तः उच्चैः वर्तते, मूषकस्तु अल्पबलः, अधः वर्तते। कथम् एतावत् दूरम् उत्पतति। अवश्यम् अत्र केनापि कारणेन भवितव्यम् इति चिन्तयति। तस्य उदाहरणतया चन्दन- दासकथां श्रावयति। पुनः क्षणं चिन्तयति। कारणं च अत्र धनस्य बाहुल्यमेव भविष्यति। तत्र कारणं मया एवं कथ्यते शृणु, लोके सर्वत्र सर्वदा धनवान् एव बलवान् भवति। प्रभुत्वम् अपि धनमूलकतया एव प्रचलति। राजानः अपि धनकारणतः एव प्रभावशालिनः प्रतापशीलिनश्च

भवन्ति, इति।

ततः चूडाकर्णः खनित्रम् आनयति। विवरं खनति। चिरात् सञ्जितं मम धनं गृह्णाति। ततः प्रभृति शक्तिहीनः बल-उत्साहरहितः, अहं आहारम् अपि सम्पादयम्तुम् अक्षमः सन् मन्दं मन्दं कालं यापयामि।

**चूडाकर्णस्य परिहसनम्**

चूडाकर्णः धनहीनं मां पश्यति। परिहासं करोति। तथाहि- लोके सर्वः अपि धनेन एव बलवान् भवति।धनादेव पण्डितः भवति। धनरहितः अल्पबुद्धिः विवेकहीनः इति गण्यते।तस्य पुरुषस्य क्रियाः,ग्रीष्मे कुसरितः इव विलयं गच्छन्ति। यस्य अर्थः अस्ति तस्यैव मित्राणि भवन्ति। तस्यैव बान्धवाः च भवन्ति। सः एव लोके पुरुषः इति कीर्त्यते। सः एव पण्डितः। अपुत्रस्य गृहं शून्यं भवति। मित्ररहितस्यापि गृहं शून्यं भवति। मूर्खस्य सर्वाः दिशः (लोकाः) शून्याः। दरिद्रता सर्वशून्या भवति। दारिद्र्यापेक्षया मरणमेव वरम्। अल्पक्लेशेन मरणं सम्भवति। दारिद्र्यं अतिदुःस्सहम्' इति बहु प्रलपति। तत् आकर्ण्य मूषिकेण मया इदम् अलोचितं यत् - मम अत्र अवस्थानम् न युक्तम्। एतत् वृत्तान्तं अन्यस्मै अपि न वक्तव्यम्। मतिमान्, अर्थनाशम्, मनसः तापम्, वञ्चनम् अपमानम्, गृहे दुश्चरितानि च न प्रकाशयति। अतः मूषिकः अहं काकेण साकम् अन्यत्र गन्तुम् अभिलषन् अस्मि।

**कथायाः नीतिः**

एवं चूडाकर्ण-वीणाकर्णयोः संवादे धनस्य प्रभावः बोधितः।धनाभावस्यउ दारिद्र्यस्य,दुष्प्रभावः वर्णितः। दरिद्रस्य दुर्गतिः अभिवर्णिता। अत्र दारिद्र्यवतः हीनत्वं सुस्पष्टं अभिव्यक्तं भवति। मतिमतः अप्रकाश्यानि विषयाणि ज्ञापितानि। एवम् अत्र जीवने मानवस्य अनुकूलतया वा प्रतिकूलतया वा धनस्य साधक-बाधकाः कथिताः। एते विषयाः पाठकान् समुचितमार्गं नेतुं समर्थाः भवन्ति।

११.२.८.लीलावती चन्दनदासयोः वृत्तान्तम्

**कथा सङ्गतिः**

चूडाकर्ण-वीणाकर्णौ सुहृदौ। उभयोः मध्ये सल्लापः प्रचलति।सल्लापे चूडाकर्णः अन्यासक्तः भवति। तस्य कारणं किमिति वीणाकर्णः पृच्छति। नागदन्ताधिष्ठिते पात्रे स्थितम् अन्नं मूषकः उत्प्लुत्य भक्षति। अतः अन्यमना आसम् इति चूडाकर्णः वदति। एतादृशे उत्प्लवने, किमपि कारणम् अवश्यं भविष्यति इति वदन् वीणाकर्णः कथाम् एतां प्रस्तावयति।

**'अकस्मात् युवती वृद्धं केशेषु आकृष्य चुम्बति।**
**पतिं निर्दयम् आलिङ्ग्य हेतुरत्र भविष्यति।।'**

काचन युवती वृद्धं पतिम् अकस्मात् केशेषु आकृर्षति। निर्दाक्षिण्यं (ROUGHLY) आलिङ्गति। प्रतिदिनं वृद्धपतिना आहूयमाना अपि उपसर्तुम् अन्यमनस्का युवती अद्य किमर्थम् एवं

वृद्धम् आलिङ्गति। अत्र केनापि कारणेन भवितव्यम् ? अत्र अवश्यं यः कश्चन हेतुः विद्यते एव।

वृद्धपतिः चन्दनदासः गौडदेशे कौशाम्बी नाम काचित् नगरी अस्ति। तस्यां चन्दनदासः नाम महाधनः वणिक् कश्चित् निवसति। सः वार्धकः, अपि च कामुकः अस्ति। सः धनस्य दर्पात् काञ्चन युवतीं परिणयति। तस्याः नाम लीलावती।

**युवती भार्या-लीलावती**

लीलावती यौवनवती। तस्याः सन्तोषाय, शारीरकतृप्त्यै सः वृद्धपतिः चन्दनदासः समर्थः न भवति। शैत्येन ये पीडाम् अनुभवन्ति, ते चन्द्रस्य ज्योत्स्नां न रमन्ते। ये औष्ण्येन बाधां प्राप्नुवन्ति ते सूर्यस्य प्रकाशं न अनुभवन्ति। एवम् एव युवतीनां रूपवतीनां च मनः जराम् आप्तेषु, जीर्णेन्द्रियेषु च न रमते। परं वृद्धः वणिक् तु, वृद्धस्य तरुणी भार्या प्रणेभ्यः अपि गरीयसी इति वचनम् अनुसृत्य,भार्यायां लीलावत्याम् अधिकम् अनुरक्तः भवति।

**जारेण सम्बन्धः**

लीलावती युवती। यौवनदर्पेण शारीरकतुष्ट्यै कुलमर्यादाम् अतिक्रामति। केनापि अपरेण युवकेन वणिक् पुत्रेण अक्रमसम्बन्धं वहति। तस्मिन् अनुरागवती भवति। १).मद्यस्य पानम् २).दुर्जनानां संसर्गः ३).पत्या च विरहः ४).अटनम् ५).स्वप्नश्च ६).अन्यगृहे वासः एतानि षट् नारीणां दूषणानि भवन्ति। तासाम् अपकीर्तिं जनयन्ति। स्त्री, नाम स्त्रीणां स्वभावः घृतघटसमानः भवति। पुमान्, नाम पुंसां स्वभावः ज्वलत् अङ्गारैः समानः विद्यते। तप्ताः अङ्गाराः घृतं द्रावयन्ति, तथा एव युवकः युवतीं द्रावयति। अतः बुधः घृतं वह्निं च एकत्र यथा वा न स्थापयेत्, तथा युवकं युवतीं च एकत्र न स्थापयेत्।

**लीलावत्याः विषयगोपनम्**

एकदा सा लीलावती पर्यङ्के वणिक्पुत्रेण सह स्वैरं रममाणा अस्ति। अत्रान्तरे पतिः आगच्छति। अकस्मात् उपस्थितं पतिं पश्यति। सहसा उत्तिष्ठति। पतिं केशेषु आकर्षति। सरभसं गाढम् आलिङ्गति, चुम्बति च।तस्मिन् अवसरेउ अत्रान्तरे जारः पलायितः। तथा हि-राक्षसानां गुरुः उशनाः (शुक्रः)। देवानां गुरुः बृहस्पतिः। शुक्रः यत् शास्त्रं जानाति, बृहस्पतिः च यत् शास्त्रं जानाति, तानि तानि शास्त्राणि स्त्रियः स्वभानेनैव,जन्मतः एव जानन्ति।

**उशना वेद यत् शास्त्रं यच्च वेद बृहस्पतिः।**
**स्वभावेनैव तत् शास्त्रं स्त्री बुद्धौ सुप्रतिष्ठितम्।।'**

समीपवर्तिनी कुट्टिनी, वृद्धवणिजा तस्याः अलिङ्गनं पश्यति। अकस्मात् इयम् एनम् आलिङ्गितवती इति चिन्तयति। पश्चात् तत् कारणं जानाति। ततः कुट्टिनी रहसि लीलावतीं दण्डयति च। एवम् इयं कथा लीलावत्याः सरभस-आलिङ्गनस्य कारणं जारप्रेषणम् इति स्पष्टीकरोति।

**कथायाः नीतिः**

एवम् अत्र, धनस्य मदान्धता,स्त्रीणां यौवनचाञ्चल्यम्, समयानुकूलप्रवर्तने जन्मतः सुप्रतिष्ठिता स्त्रीणां प्रगल्भता इति एते विषयाः प्रस्ताविताः। एते च विषयाः 'यत् किमपि वा कार्यं भवतु, तत्, केनापि कारणेनैव अवतिष्ठते ' इति अंशं बोधयन्ति।

११.२.९. लुब्धशृगालकथा

**कथासंगतिः**

लघुपतनकः कश्चन वायसः। सः हिरण्यकेन (मूषिकेण) मैत्रीं प्राप्नोति। कदाचित् लघुपतनकः तं प्रदेशं परित्यक्तुम् इच्छति। हिरण्यकेन सह दण्डकारण्ये कर्पूराभिधानं सरः गच्छति। तत्र काकस्य मित्रं मन्थरकः नाम कच्छपः प्रतिवसति। उभौ अपि कच्छपस्य समीपं गच्छतः। आतिथ्यं प्राप्नुतः। कदाचित् च मन्थरकः हिरण्यकं स्व-आगमनकारणं पृच्छति। हिरण्यकश्च स्वीयं वृत्तान्तं कथयति च। तदीयां कथां श्रुत्वा हिरण्यकं प्रति मन्थरकः - युष्माभिः अतिसञ्चयः कृतः। तस्य अयं दोषः।

सञ्चयः नाम सम्पादनम्, समीकरणं वा भवति। तच्च प्राणिनाम् अवश्यं नित्यं कर्तव्यम् एव। परम्, अतिसम्पादनम्,अतिसमीकरणं वा कदाचिदपि मा भवतु, न कर्तव्यम् एव।अतिसम्पादनं प्रमादाय कल्पते। अतिशयेन सम्पादयितुम् आशाम् ऊढः जम्बुकः धनुषा मरणम् एति। तादृशस्य दुराशापरायणस्य जम्बुकस्य कथा अत्र प्रस्तूयते।

**महान् कलेबराणां सञ्चयः**

कल्याणकटके भैरवो नाम व्याधः कश्चित् अस्ति। सः च एकदा मृगम् अन्विष्यमाणः विन्ध्याटवीं गच्छति। एकं मृगं व्यापादयति। तम् आदाय गच्छति। तस्मिन् समये घोराकृतिं शूकरं च पश्यति। मृगं भूमौ निक्षिपति। शूकरं शरेण हन्ति। शरप्रहारेण शूकरः अपि मेघवत् घोरतया गर्जति। ततः व्याधं मुष्कदेशे प्रहरति। भूमौ पतति। तेन सः व्याधः अपि हतः भवति। छिन्नः द्रुमः इव भूमौ निपतति। जलम्, अग्निः, विषं, शस्त्रं, क्षुत्, व्याधिः, गिरि-पतनं, एतेषु यत् किञ्चित् निमित्तम् आसाद्य, देही मरणं प्राप्नोति। व्याध-शूकरयोः पादास्फालनेन सर्पः एकःतत्रैव मृतः वर्तते।

**दीर्घरावस्य लुब्धता**

अनन्तरं दीर्घरावो नाम कश्चन जम्बुकः अस्ति। सः आहारार्थी सन् परितः भ्रमति। मृतान् मृग-व्याध-सर्प- शूकरान् पश्यति। 'अहो ! अद्य महत् भोज्यं मे समुपस्थितम् ' इति सन्तोषं च अनुभवति। देहिनां, दुःखानि, सुखानि च अचिन्तितानि एव आयान्ति। दैवम् अत्र अतिरिच्यते। इतोऽपि एवं चिन्तयति - एषां मांसैः मासत्रयं मे सुखेन भोजनं गमिष्यति। नरः नाम व्याधः एकं मासं भोजनाय पर्याप्तः भवति। मृगः च, शूकरः च उभौ, द्वौ मासौ पर्याप्तौ भवतः। अहिः एकं दिनं याति। अद्य तु धनुषः गुणः भक्ष्यः भवति।

**दीर्घरावस्य मरणम्**

ततः 'प्रथमबुभुक्षायाम् इदं स्वादुरहितं कोदण्डलग्नं स्नायुबन्धनं खादामि' इति चिन्तयति।

तथा करोति। स्नायुबन्धनं छिन्नं भवति। धनुः उत्पतितः भवति। तेन दीर्घरावस्य शिरः भिन्नः भवति। दीर्घरावः च मृतः भवति।

**कथायाः नीतिः**

एवम् अस्यां कथायां महान् आहारस्य सञ्चयः, महति सञ्चये सत्यपि दीर्घकर्णस्य लुब्धता, तेन च प्राण- हरणम् इति एते विषयाः कथिताः। एते च ' कर्तव्यः सञ्चयः नित्यम्,कर्तव्यः न अतिसञ्चयः 'इति अमुं च सन्देशं पाठकानां दातुं प्रभवन्ति।

**११.१०.उपसंहारः**

एवम् अस्मिन् पाठ्यांशे १).चित्रग्रीववृत्तान्तम्, २).वृद्धव्याघ्र-पथिकयोः कथा, ३).मृग-काक-जम्बुक-कथा ४).जरद्गव -दीर्घकर्णयोः कथा, ५).काक-मूषिकायोः मैत्री, ६).हिरण्यकस्य वृत्तान्तम्, ७).चूडाकर्ण-वीणाकर्णयोः संवादः, ८).लीलावती चन्दनदासयोः वृत्तान्तम्, ९).लुब्धशृगालकथा इति एते विषयाः व्यासात्मक-प्रश्नान्स समा- धातुम् उपनिबद्धाः। तत्र च, सुलभतया विषयस्य धारणाय च शीर्षकाश्च स्थापिताः। तेन च परीक्षासु विषयस्य उपस्थापनं सुकरं भवति।

**११.११.अभ्यासः**

**व्यासात्मकाः प्रश्नाः**

१. चित्रग्रीवादयः कपोताः हिरण्यकेन कथं रक्षिताः ?

२. 'कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा' -- कथं, विशदयत ?

३. वृद्धव्याघ्र -पथिककथां लिखत ?

४. काक - मूषिकयोः मैत्री कथं सञ्जाता ?

५. हिरण्यकस्य वृत्तान्तं लिखत ?

६. चूडाकर्ण - वीणाकर्णयोः संवादं संक्षिपत?

७. अकस्माद्युवती वृद्धं केशेष्वाकृष्य चुम्बति।
पति निर्दयमालिङ्ग्य हेतुरत्र भविष्यति।। - विवृणुत ?

अथवा

चन्दनदास - लीलावत्योः कथां संक्षिपत ?

८. कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसञ्चयः।
पश्य सञ्चयशीलोऽसौ धनुषा जम्बुकोहतः।।-कथम् विशदयत ?

अथवा

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ।
अहिरोकं दिनं याति अद्य भक्ष्यो धनुर्गुणः।। - कथं, विशदयत ?

अथवा

लुब्धशृगालकथां सङ्क्षिपत ?

# १२. पद्यानां / श्लोकानां भावाः

**संरचना**

१२.०.परिचयः
१२.१.लक्ष्याणि
१२.२.पद्यानां / श्लोकानां भावाः
१२.२.१ चित्रग्रीववृत्तान्तम्
१२.२.२.वृद्धव्याघ्र-पथिकयोः कथा
१२.२.३.मृग-काक-जम्बुक-कथा
१२.२.४. जरद्गव-दीर्घकर्णयोः कथा
१२.२ ५.काक-मूषिकायोः मैत्री
१२.२.६.हिरण्यकस्य वृत्तान्तम्
१२.२.७.मन्थरकवृत्तान्तम्
१२.२.८.लुब्धशृगालकथा
१२.२.९.कर्पूरतिलकवृत्तान्तम्
१२.३.उपसंहारः
१२.४.अभ्यासः

## १२.०.परिचयः

Diploma in Sanskrit Examination मध्ये , आहत्य पञ्च पत्राणि सन्ति।तत्र इदं प्रथमं परीक्षापत्रम्। अस्य च शतं १००अङ्काः भवन्ति। अत्र च विषयद्वयं भवति। 'हितोपदेशे-मित्रलाभः' इत्ययम् एको विषयः। अयं च प्राचीनगद्यं परिचयं करोति। कथाप्रक्रियां प्रति अवगाहनां ददाति। एतस्य कृते पञ्चाशत् ५०अङ्काः भवन्ति। त्रयः प्रश्नाः वर्तन्ते। तेषु पद्यानां भावलेखनम् अन्यतमः प्रश्नः। अस्य च दश अङ्काः विद्यन्ते। तदर्थं विद्यार्थिनां कृते अत्र अभ्यास सम्पादनं भवति। यद्यपि इदं च पत्रं गद्यपठनं प्रति परिचयस्य सम्पादनाय निर्दिष्टम् अस्ति, तथापि महाकवीनां बहूनि महनीयानि पद्यानि उपनिबद्धानि वर्तन्ते। ते सन्दर्भस्य उचिततया तेषां ग्रथनं, पद्यानां सन्दर्भस्य च शोभां वितरति।

## १२.१.लक्ष्याणि

सामान्यतः पाठ्यांशस्य अध्ययने कोणद्वयं भवति। जीवनोपयोगित्वम् एकः कोणः। सः वैयक्तिक-जीव-लक्ष्यं साधयितुं समर्थं भवति।द्वितीयः कोणः परीक्षादृक्पथम् (क्ङ्खश्र्त्दङ्क- द्यत्दृद घ्दृत्दद्य ग्ढ ज्ङ्कध्) । प्रस्तुतं पाठ्यांशं परीक्षार्थं पठति। कथं वा प्रश्नानां समाधानम् इति मनसि निधाय पाठ्यांशं परीक्षादृष्ट्या अपि प्रणालिकाबद्धंपठति। प्रश्न-पत्रे पद्यानां भावलेखनम् इति अन्यतमः प्रश्नः। तस्य समाधानाय आवश्यकः सन्नाहः अत्र सम्पाद्यते। अत्र प्रथमतः हितोहदेशे मित्रलाभम् अनुसृत्य पद्यस्य परिचयः दीयते। तत्र पाठकैः, इदं पद्यं कस्यां कथायां वर्तते, कस्मिन् सन्दर्भे वर्तते, कः वदति, कं प्रति वदति इति एते अंशाः विद्यन्ते। अनन्तरं विश्लेषणपुरस्सरं पद्यस्य तात्पर्यं च दीयते। एतत् पाठ्यांशस्य अध्ययनेन -

- संस्कृतभाषायां पद्यानां पठनाय कौशलं वर्धितं भवति।
- संस्कृतभाषायां पद्यानाम् अवगमनाय कौशलम् अधिगतं भवति।
- संस्कृतभाषायां पद्यानां धारणाय कौशलं अभ्यसितं भवति।
- संस्कृतभाषायां पद्यानाम् उचितसन्दर्भकल्पनकौशलं सम्पादितं भवति।
- संस्कृतभाषायां पद्यानाम् भावव्यक्तीकरणकौशलम् आर्जितं भवति।
- संस्कृतभाषायां वाक्यरचनाद्द्वारा लेखनकौशलं सम्पादितं भवति।
- संस्कृतभाषायाम् आलोचनां कर्तुं प्रेरणं दत्तं भवति।
- परीक्षादृक्पथं अभ्यसितं भवति,आर्जितं च भवति।

## १२.२.पद्यानां / श्लोकानां भावाः

१२.२.१ चित्रग्रीववृत्तान्तम्-पद्यानां भावाः

### १२.२.१.१.काव्यपठनं सतां लक्षणम्

काव्य-शास्त्र-विनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा।।

परिचयः हितोपदेशस्य मित्रलाभे अयं प्रथमः श्लोकः। राजपुत्रान् प्रति नारायणपण्डितस्य वचनम् इदम्। विवेकिनः पठनेन कालं सदुपयोगं कुर्वन्ति। अलसास्तु मूढतया दुरुपयोगं कुर्वन्ति इत्यंशस्य बोधकः अयं श्लोकः।

भावः काव्यं नाम (भाषाअकला) कलात्मकभाषा, तदेव प्रायशः कवित्वं भवति। अस्य पठनं विनोदाय कल्पते। अतः विनोदार्थिनः बुद्धिमन्तः काव्यं पठन्ति। प्रतिपादितनियमानां सूत्राणां वा परिधौ, क्रमेण विषयाणाम् उपस्थापकं हि शास्त्रम्। शास्त्रस्यपठनं विज्ञानाय कल्पते, विश्लेषणाय च उपकुरुते। विज्ञानिनां शास्त्रपठनेन कालं गच्छति। अलसाः एव जनाः मूर्खाः भवन्ति। अलसतया आलोचनाहीनाः विवेकरहिताश्च भवन्ति। ते तु व्यसनेन निद्रया कलहेन वा कालं यापयन्ति।

व्यसनशब्देन मद्यपान-द्यूत-स्त्रीप्रसङ्गादिकं गृह्यते। एवञ्च मूर्खाः व्यर्थं कालं गमयन्ति। बुद्धिमन्तस्तु पुस्तकपठनेन कालं सद्विनियोगं कुर्वन्ति इति भावः।

**१२.२.१.२.मैत्रीकरणस्य प्रयोजनम्**

असाधना वित्तहीना बुद्दिमन्तः सुहृत्तमाः
साधयन्त्याशु कार्याणि काककूमिमृगाखुवत्।।

परिचयः अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। विष्णुशर्मा अनेन श्लोकेन राजपुत्राणाम् आभिमुख्यं सावधानतां च सम्पादयितुं प्रयत्नं करोति इति नारायणपण्डितः कथयति।

भावः यत्किमपि कार्यं कर्तुम् अस्माकम् धनम् आवश्यकं भवति, यतः धनमूलम् इदं जगत्। साधनानि अपि अपेक्षितानि। यतः क्रियायां प्रकृष्टानि उपकरणानि तानि। अतः धनं वा,साधनानि वा विना कार्यं कर्तुं न प्रभवामः। तथापि यदि मित्राणि वहामः (त्तऋह्ङ्क)तदा वयं विवेकशीलाः बुद्धिमन्तः भवामः। तदा साधनरहिताः अपि,धनहीनाः अपि काक-कूर्म-मृग-आखुवत् शीघ्रं कार्याणि साधयितुं पारयामः इति पद्यस्य भावः।

**१२.२.१.३.भयशीलस्य दुरवस्था**

शोकस्थानसहस्राणि भयस्थानशतानि च।
दिवसे दिवसे मूढम् आविशन्ति, न पण्डितम्।।

परिचयः हितोपदेशस्य मित्रलाभे अयं श्लोकः वर्तते। चित्रग्रीवोपख्याने वायसः व्याधं पश्यति।'किमपिअन- भिमतं भवेत्' सर्वमपि धैर्येण सोढव्यम् एव खलु,इति एवं चिन्तयति। अत्र च भयशीलिनः दुरवस्था वर्णिता अस्ति।

भावः मूढः नाम धैर्यहीनः भयशीलः,स्वल्पस्य अपि विषयस्य कृते महत् भयम् मनस्सु आवाहयति। पण्डितः नाम भयहीनः धैर्यशाली। महत् भयम् अपि आत्मविश्वासेन अपनोत्तुं सिद्धः भवति। दुःखात् शोकः जायते। अतः शोकस्थानं दुःखं भवति। विपदः भयम् आयाति। अतः विपत् भयस्थानं भवति। प्रतिनित्यं मूढं नाम अज्ञानिनम् अविवेकिनम् धैर्यहीनं भयशीलिनं सहस्त्रशः शोकानि, शतशः विपदः आविशन्ति। पण्डितः तु विवेकी ज्ञानसम्पन्नः खलु, ज्ञानदृष्ट्या प्रवर्तते इति शोकानि वा,भयानि वा तं न आवेष्टुं पारयन्ति। दुःखं वा भयं वा तस्य मनःबलहीनं कर्तुं न समर्थ भवति, इति पद्यस्य आशयः।

**१२.२.१.४.उपस्थितं भयं ज्ञातव्यम्**

उत्थाय उत्थाय बोद्धव्यम्, महद्भयम् उपस्थितम्।
मरण-व्याधि-शोकानाम् किम् अद्य निपतिष्यति।।

परिचयः; हितोपदेशस्य मित्रलाभे ,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते। वायसः व्याधं पश्यति। किमपि अनभिमतं भवेत्,इति भयम् आप्नोति। तत् भयस्य अपनोदनाय सर्वैः संसिद्धैः भाव्यम् इति एवं चिन्तयति।

भावः;नरः प्रतिनित्यं शय्यातः उत्थानानन्तरम् अनुपदमेव मरण-व्याधि-दुःखेभ्यः त्रिभ्यः कस्मात् कीदृशं भयम् आयाति, तन्निवारणं कथं स्यात् इति तान् जानीयात्। तान् च

निवारयेत्। ततः निश्चिन्ततया भवेत्। तावत् पर्यन्तं सुखं नैव अपेक्षेत इति पद्यस्य भावः।

**१२.२.१.५.सर्वत्र विचारः अनर्थकः**

वृद्धस्य वचनं ग्राह्यम् आपत्काले ह्युस्थिते।
सर्वत्रैवं विचारे च भोजनेऽपि अप्रवर्तनम्।।

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यमिदं वर्तते। युवकपोतः कश्चन चित्रग्रीवस्य वारणवचांसि शृणोति।युवकत्वेन आवेशम् आवेगं च वहति।असहनं प्रकटयति।तदा कपोतान् सदर्पं एवं वदति।

भावः;आपत्काले एव वृद्धस्य वचनं स्वीकर्तव्यम्।न तु सर्वदा। अल्पस्य विषयेऽपि एवं विचारपूर्वकं वृद्धस्य वचनं यदि स्वीक्रियते, तदा आहारस्य अपि स्वीकरणं न सम्भवति। भोजने बहवो दोषाः विद्यन्ते इति न तत् त्यजामः खलु इति अस्य पद्यस्य आशयः।

**१२.२.१.६.शङ्काकरणम् अयुक्तम्**

शङ्काभिः सर्वम् आक्रान्तम् अन्नं पानं च भूतले।
प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ।।

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं वर्तते।युवकपोतः कश्चन चित्रग्रीवस्य वारणवचांसि शृणोति। युवकत्वेन आवेशम् आवेगं च वहति। असहनं प्रकटयति। तदा कपोतान् सदर्पं वदति।

भावः; भुवि कीदृशम् अन्नं भोक्तव्यम् ? कीदृशम् अन्नं न भोक्तव्यम् ? कीदृशं पातुं शक्यम् ? कीदृशं पातुं न शक्यम् ? इति एवम् अन्नं पानं च सर्वं शङ्काभिः आक्रान्तम् एव। यदि सर्वत्र शङ्का क्रियते जीवितं कष्टम् एव भवति। कुत्र प्रवृत्तिः कर्तव्या ? कथं जीवितव्यम् ? इति पदे पदे शङ्का उदेति। अतः अवसरे विषये एव शङ्का कर्तव्या, न तु सर्वत्र इति भावः।

**१२.२.१.७.दुःखभागिनः षट्**

ईर्ष्यी, घृणी, त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः।
परभाग्योपजीवी च षडेते दुःखभागिनः।।

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं वर्तते।युवकपोतः कश्चन चित्रग्रीवस्य वारणवचांसि शृणोति। युवकत्वेन आवेशं वहति। असहनं प्रकटयति। तदा कपोतान् सदर्पं एवं वदति।

भावः; असूयावान्, घृणा नाम आशा तद्वान् नाम आशावान्, सन्तोषरहितः, क्रोधनः, नित्यशङ्कितः, परभाग्योपजीवी नाम इतरेषां सम्पदाधारेण यः जीवनं यापयति सः, Bi Éa'Éb Ân ÜÉ ÉÉMÉxÉ&= दुःखदायिनः भवन्ति।

**१२.२.१.८.लोभेन मोहितानां क्लेशाः**

**सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः।**
**छेत्तारः संशयानाञ्च क्लिश्यन्ते लोभमोहिताः।।**

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते।युवकपोतः कश्चन कपोतान् तण्डुलकणान् भक्षितुं प्रोत्साहयति। तण्डुलकणलोभेन सर्वे कपोताः गगनात् अवतरन्ति। जाले बद्धाः भवन्ति। तदा तत्समर्थनावसरे इदं पद्यम् अस्ति।

भावः;महान्ति शास्त्राणि प्रपठन्ति, बहु ज्ञानं सम्पादयन्ति, परेषां संशयान् उच्छिद्यन्ति, तादृशाः महान्तः अपि दुराशया मोहिताः सन्तः, आपदः प्राप्नुवन्ति। शास्त्रज्ञानं लोभप्रवृत्तिम् अपसारयितुं नैव समर्थम् अस्ति। मानवः महता प्रयत्नेन अभ्यासयोगेन स्वयमेव दुराशां त्यजेत् इति पद्यस्य आशयः।

**१२.२.१.९.विपत्तिकाले महताम् अपि धियः मलिनीभवन्ति**

**असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय।**
**प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिनीभवन्ति।।**

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते। युवकपोतः कश्चन कपोतान् तण्डुलकणान् खादितुं प्रोत्साहयति। तण्डुलकणलोभेन सर्वे कपोताः गगनात् अवतरन्ति। जाले बद्धाः भवन्ति। तदा तत् समर्थनावसरे इदं पद्यम् अस्ति।

भावः;हेममृगस्य जन्म लोके कदापि कुत्रापि न सम्भवति। परं श्रीरामः सीतायाः कामनां पूरयितुं मृगाय लोभम् आप्तः। एतत् रामस्य दुराशैव। श्रीरामः अवतारमूर्तिः किल। किमर्थं तस्य दुराशा भवति इति शङ्का उदेति। आपदाम् आगमनकाले धीमतां बुद्धयः अपि मलिनीभवन्ति। नाम विपत्तिकाले दुराशया उपहतचेतसां सताम् आलोचनाशक्तिः अपि नाशम् एति इति पद्यस्य भावः।

**१२.२.१.१०.नायकत्वं क्लेशकरम्**

**न गणस्याग्रतो गच्छेत्, सिद्धे कार्ये समं फलम्।**
**यदि कार्यविपत्तिः स्यात् मुखरः तत्र हन्यते।।**

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते। युवकपोतः कश्चन कपोतान् तण्डुलकणान् खादितुं प्रोत्साहयति।तण्डुलकणलोभेन सर्वे कपोताः गगनात् अवतरन्ति।जाले च बद्धाः भवन्ति। जालबद्धाः च ते,प्रोत्साहितवन्तं कपोतं निन्दन्ति। तत् समर्थनावसरे इदं पद्यं विद्यते।

भावः;यः कोऽपि गणस्य अग्रतः न गच्छेत्। यदि कार्यं सिद्धम् = फलवत् , भवति तदा नायकस्य= अग्रे गतवतः सामान्यस्य च उभयोः फलं समम् एव भवति।यदि कार्यं न सिध्यति तदा गणे प्रविष्टाः सर्वे नायकं निन्द न्ति।फलमपि न आयाति। अतः नायकत्वं उभयोः पक्षयोः अपि क्लेशकरमेव इति पद्यस्य आशयः।

**१२.२.१.११.हितः अपि विपदः हेतुतां भजते**

**आपदाम् आपतन्तीनां हितोऽप्यायाति हेतुताम्।**
**मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने।।**

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते।युवकपोतः कश्चन कपोतान् तण्डुलकणान् खादितुं प्रोत्साहयति।तण्डुलकणलोभेन सर्वे कपोताः गगनात् अवतरन्ति।जाले च बद्धाः भवन्ति। जालबद्धाः च ते,प्रोत्साहितवन्तं कपोतं निन्दन्ति।चित्रग्रीवः कपोतैः कृतं प्रोत्साहितवतः दूषणं खण्डयति। तदा इदं पद्यं विद्यते।

भावः;न अयम् अस्य दोषः ।आपत्काले हितः अपि जनः समासन्नानां आपदां कारणं भवति।वस्तुतः तस्य दोषः नास्ति। कालस्वभावश्च अयम्।मातृजङ्घा वस्तुतः शिशोः आधारः भवति। परम्, अदृष्टे नष्टे, सैव मातृ- जङ्घा शिशोः स्तम्भः सन् प्रमादम् अपि जनयति।

**१२.२.१.१२.आपत् उद्धरणक्षमः बन्धुः**

**स बन्धुर्यो विपन्नानाम् आपत् उद्धरणक्षमः।**
**न तु भीतपरित्राणवस्तूपालम्भपण्डितः।।**

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते।युवकपोतः कश्चन कपोतान् तण्डुलकणान् खादितुं प्रोत्साहयति।तण्डुलकणलोभेन सर्वे कपोताः गगनात् अवतरन्ति।जाले च बद्धाः भवन्ति। जालबद्धाः च ते,प्रोत्साहितवन्तं कपोतं निन्दन्ति।चित्रग्रीवः'न अयम् अस्य दोषः'इति कपोतैः कृतं, प्रोत्साहितवतः दूषणं, खण्डयति। तदा कपोतान् कर्तव्योन्मुखान् कर्तुं चित्रग्रीवः इति एवं वदति।

भावः;आपत्काले यः रक्षकः भवति सः एव बन्धुः भवति। भीतपरित्राणं विहाय यः उपालम्भनं नाम निन्दां करोति सः कदापि बन्धुः न भवति। सः शत्रुः एव भवति। अतः परस्परनिन्दनं विहाय तरणोपायम् चिन्तनीयम् इति पद्यस्य आशयः।

**१२.२.१.१३.विरलाः पुरुषाः**

**सम्पदि यस्य न हर्षो विपदि विषादो रणे च भीरूत्वम् ।**
**तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्।।**

परिचयः;हितोपदेशस्य मित्रलाभे,तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते।तण्डुलकणलोभेन सर्वेकपोताः गगनात् अवतरन्ति।जाले च बद्धाः भवन्ति।जालबद्धाः सूचितवन्तं कपोतं निन्दन्ति।चित्रग्रीवः'न अयम् अस्य दोषः' विपत्काले विस्मयः एव कापुरुषलक्षणम्। धैर्यम् अवलम्ब्य उपायः चिन्तनीयः इति चित्रग्रीवः एवम् उपदिशति।

भावः;संपत्सु यस्य पुरुषस्य हर्षः नास्ति, आपत्सु विषादः अपि नास्ति, रणे भीरुत्वमपि नास्ति, सः पुरुषः लोकत्रये ख्यातिं प्राप्नोति। जननी तादृशं सुतं विरलतया प्रसूते। अर्थात् प्रख्यातः तादृशः पुरुषः यदा कदाचित् सम्भवति, न तु सर्वदा इति भावः।

**१२.२.१.१४.ऐकमत्यं कार्यसाधकम्**

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैः गृणत्वम् आपन्नैः बध्यन्ते मत्तदन्तिनः ।।**
**संहतिः श्रेयसी पुंसाम्, स्वकुलैः अल्पकैः अपि।**
**तुषेण अपि परित्यक्ता न प्ररोहन्ति तण्डुलाः।।**

परिचयः;हितोपदेश-मित्रलाभे, तत्रापि चित्रग्रीवोपाख्याने पद्यम् इदं विद्यते।तण्डुलकणलोभेन सर्वे कपोताः गगनात् अवतरन्ति।जाले च बद्धाः भवन्ति।जालबद्धाः सूचितवन्तं कपोतं निन्दन्ति।विपत्काले विस्मयःएव कापुरुष लक्षणम्। धैर्यमवलम्ब्य, अस्माभिः ऐकमत्येन भाव्यमिति चित्रग्रीवः ऐकमत्यस्य प्रयोजनं वदति। तदा इदं पद्यम्।

भावः;सर्वैः एकचित्तीभूय जालम् आदाय अस्माभिः उड्डयिव्यम्। तेन रक्षणं भविष्यति। अल्पानाम् अपि वस्तूनां समूहः कार्यस्य साधको भवति। तृणानि सङ्घीभूय गुणरूपेण परिणामं प्राप्य,तेन मदगजमपि बद्धुं शक्नुवन्ति खलु। न हि एकेन तृणेन किमपि कर्तुं न शक्यते। स्वकुलैः= एकजातीयैः, अल्पकैः संहतिः पुंसां श्रेयसी। धान्यस्य प्ररोहणाय तुषापि आवश्यकी। अल्पं वस्तु एतत् इति परित्यक्तुं न शक्यते। तुषपरित्यक्ताः तण्डुलाः प्ररोहणे न समर्थाः भवन्ति।

**१२.२.१.१५.प्राज्ञ धनानि परार्थम् उत्सृजति**

**धनानि जीवितं चैव परार्थ प्राज्ञ उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति।।**

परिचयः;अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। तत्रापि चित्रग्रीवोपाख्याने वर्तते। ऐकमत्यस्य प्रयोजनम् अत्र अभिवर्णितम्। जाले बद्धान् कपोतान् रक्षणाय चित्रग्रीवः स्वमित्रस्य हिरण्यकस्य समीपं नयति। कपोतान् रक्षितुं हिरण्यकं प्रार्थयति। मूषिकस्तु प्रथमतः चित्रग्रीवं पाशात् मोचयितुं इच्छति। तदा चित्रग्रीवः मूषिकम् एवं वदति।

भावः; 'सखे! नीतिसरिणिः एतादृशी एव। परम्, अस्मत्-आश्रितानां दुःखं सोढुम् अहम् असमर्थः। धनानि,जीवितं च प्राज्ञः परार्थे उत्सृजति। सर्वेषां प्राणिनां 'जातस्य हि ध्रुवो मृत्युः' इति सरण्या मृत्युः अनिवार्यः। अतः विनाशे नियते सति, सत्कार्यनिमित्तं प्राणत्यागः वरं भवति खलु, इति अस्य पद्यस्य आशयः।

**१२.२.१.१६.गुणाः शाश्वताः**

**शरीरस्य गुणानां च दूरम् अत्यन्तम् अन्तरम्।**
**शरीरं क्षणविध्वंसि कल्पान्तरस्थायिनो गुणाः।।**

परिचयः; अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। तत्रापि चित्रग्रीवोपाख्याने वर्तते। जाले बद्धान् कपोतान् रक्षितुं हिरण्यकं (मूषिकम्) प्रार्थयति। मूषिकस्तु प्रथमतः चित्रग्रीवं पाशात् मोचयितुम् इच्छति। तदा चित्रग्रीवः हिरण्यकम् एवं वदति -

भावः; शरीरे आस्थां विहाय प्रतिष्ठां सम्पादय, कीर्तिं पालय। शरीरस्य गुणानां च अत्यन्तं अन्तरं दूरम् अस्ति। शरीरं क्षणविध्वंसि भवति। धर्मादिगुणाः कल्पान्तस्थायिनः भवन्ति।

अतः कीर्तिप्रदं इतरकपोतरक्षणम् एव प्रथमं करोतु, ततः एव मम रक्षणं भवतु, इति अस्य पद्यस्य भावः।

**१२.२.२.वृद्धव्याघ्र-पथिकयोः कथा**

१२.२.२.१.अवाञ्छनीयात् इष्टलाभः प्रमादकरः

**अनिष्टात् इष्टलाभे अपि न गतिः जायते शुभा।**
**यत्रास्ते विषसंसर्गः अमृतं तदपि मृत्यवे।।**

परिचयः;अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। इयं च द्वितीया कथा। तत्र वृद्धव्याघ्र-पथिकयोः वृत्तान्तं वर्णितम् । तस्यां कथायां व्याघ्रहस्तगतं स्वर्णकङ्कणं दृष्ट्वा पथिकः एवं चिन्तयति।

भावः; भाग्येन एतत् सम्भवति इति। परम्, प्राणहानिकरे साहस-प्रवृत्तिः न विधातव्या। न इष्टम् अनिष्टम्, अनभिमतम्, अनपेक्षितम्, परिहृतम् परिहरणीयं च इत्यर्थः। अनिष्टात् इष्टवस्तुनः नाम अपेक्षितस्य, अभिमतस्य, लाभे अपि तदर्थं प्रयत्नः न कर्तव्यः। तत्र प्रयत्ने कृते मानवः हानिम् एव प्राप्नोति। अमृतम् अपि विषसम्बद्धं चेत् मृत्यवे कारणं भवति। अतः कङ्कणे प्रवृत्तिः न कर्तव्या, इति पथिकस्य आशयः अत्र वर्णितः।

**१२.२.२.२.सन्देहात् विशेषप्रतिपत्तिः**

**न संशयम् अनारुह्य नरः भद्राणि पश्यति।**
**संशयं पुनः आरुह्य यदि जीवति पश्यति।।**

परिचयः; अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। इयं च द्वितीया कथा। तत्र वृद्धव्याघ्र-पथिकयोः वृत्तान्तं वर्णितम्। पान्थः व्याघ्रस्य हस्तगतं कङ्कणम् अभिलषति। परम् अयं व्याघ्रः क्रूरजन्तुः। अत्र विश्वासः कर्तव्यः वा न कर्तव्यः वा इति सन्दिह्यति। तदा पान्थः सन्देहस्य श्रेयोदायकतां प्रति मनसि एवं चिन्तयति।

भावः;नरः संशयम् अप्राप्य भद्राणि न पश्यति। सर्वत्र संशयेन= संशयस्य कारणतः, विचारः प्रवर्तते। विचारणद्वारा विशेषप्रतिप्रतिपत्तिःउ तद्विषयकं विशिष्टज्ञानम्, अधिगच्छति। एवं संशये जाते,जातं संशयम् अपनुद्य, सुस्पष्ट-अवगाहनापुरस्सरं यः कार्यं करोति, सः आजीवितं मङ्गलानि प्राप्नोति। अतः सर्वत्र सन्देहः विशेषप्रति- प्रतिपत्तिकरः इति विश्लेषणाय संशयोत्थापनं श्रेष्ठतमं साधनम् एव इति पद्यस्य आशयः।

**१२.२.२.३.प्रवादः दुर्निवारः**

**गतानुगतिकः लोकः, कुट्टिनीम् उपदेशिनीम्।**
**प्रमाणयति नो धर्मे यथा गोध्नम् अपि द्विजम्।।**

परिचयः;अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। तत्र इयं च द्वितीया कथा। तत्र वृद्धव्याघ्र-पथिकयोः वृत्तान्तं वर्णितम्। व्याघ्रः पान्थं प्रति स्वसौशील्यं प्रकटयति। तदा 'व्याघ्रः मानुषं खादति, इति प्रवादः दुर्निवारः खलु, प्रवादः सर्वैः विश्वस्यते' इति कथयति तदा वृद्धव्याघ्रः पान्थम् एवं अभिभाषते।

भावः;पूर्वं कदाचित् एका स्त्री परिस्थितिकारणतः वेश्याजीवनं यापिता स्यात्। सैव इदानीं शुभ्रजीवनेन शुद्धा अपि जाता। परम्'अहम् उत्तमा सती'इति सा यदि इदानीम् अन्येषाम् धर्मविषयकम् उपदेशं करोति, लोकः तम् उपदेशं न स्वीकरोति। तस्याः गतं चरितम् एव अनुचिन्त्य तस्यां प्रामाण्यं नैव स्थापयन्ति।एवं लोकः गतमेव अनुसृत्य, गतभावनया एव प्रवर्तते। एवं विप्रः कालप्रभात् गोघ्नः जातः, पश्चात्तापम् अनुभूय शुद्धस्वभावः जातः। एवं सः पवित्रवर्तनः अपि, जनाः तं साधुशीलं न मन्वते। तस्य पूर्वचरितं गोघ्नत्वम् एव मनसि निधाय तस्मिन् विषये प्रवर्तन्ते। लोकनिन्दा अनिवार्या खलु इति अस्य पद्यस्य आशयः।

**१२.२.२.४.जन्मनैव स्वभावः तादृशः**

**न धर्मशास्त्रं पठतीति कारणं, न चापि वेदाध्ययनं दुरात्मनः।**
**स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः।।**

परिचयः;अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। तत्र इयं च द्वितीया कथा। तत्र वृद्धव्याघ्र-पथिकयोः वृत्तान्तं वर्णितम्। पान्थः लोभकारणतः स्नातुं सरः प्रविशति। तत्र महापङ्के निमग्नः भवति। व्याघ्रश्च तं धरति। तदा पान्थः एवं चिन्तयति।

भावः; गवां पयः स्वभावतः एव मधुरं भवति। तत्र शर्करामिश्रेण एव माधुर्यं न आयाति खलु। एवं दुरात्मनः अपि स्वभावात् एव दुष्टबुद्धिः सम्भवति। धर्मशास्त्राणाम् अनध्ययनस्य कारणतः वा, वेदानाम् अनध्ययकारणतः वा सः दुष्टः न जायते, परं जन्मनैव स्वभावः तादृशः भवति इति पद्यस्य आशयः।

**१२.२.२.५.ज्ञानं भारः क्रियां विना।**

**अवशेन्द्रियचित्तानां हस्तिस्नानम् इव क्रिया।**
**दुर्भगाभरणप्रायः ज्ञानं भारः क्रियां विना।।**

परिचयः;अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते।तत्र इयं च द्वितीया कथा। तत्र वृद्धव्याघ्र-पथिकयोः वृत्तान्तं वर्णितम्।पान्थः लोभकारणतः स्नातुं सरः प्रविशति।तत्र महापङ्के निमग्नः भवति। व्याघ्रश्च तं धरति। तदा पान्थः एवं चिन्तयति।

भावः;अत्र क्रिया नाम आचरणम्। ज्ञानं नाम पुस्तकपठनेन समागतं वा,सम्पादितं वा बौद्धिकं सिद्धान्त- ज्ञानम्। सदा सर्वत्र ज्ञानस्य परमलक्ष्यम् आचरणम्। तच्च प्रयोजनसाधकम् एव च भवेत्। एवं स्थिते, गजस्य स्नानाचरणं व्यर्थम्। गजः स्नानं कृत्वापि पुनः पङ्के एव निपतति। एवं गजस्य स्नानं देहस्य शुद्ध्यै न भवति। यथा वा गजस्य स्नानं शुभ्रतायै समर्थं न भवति,तथैव चञ्चलचित्तानां वेदशास्त्रादिज्ञानम् परिशुद्धम् आचरणम् शिक्षितुं न समर्थं भवति। एवं आचरणहीनं सत्, वेदशास्त्रादिज्ञानं चञ्चलचित्तानां भारं भवति। एवं निरर्थकम् एव सम्पद्यते। दुर्भगा नाम विधवा इत्यर्थः। धवः नाम भर्ता। विगतः धवः यस्याः सा विधवाउ भर्तृहीना स्त्री इति अर्थः। भर्तरि सति आभरणधारणं भर्तृतृप्त्यै भवति, गते भर्तरि जातायाः विधवायाः स्वर्णालङ्कारधारणं न सौन्दर्याय कल्पते। प्रत्युत परेषां मनो विकाराणां प्रकोपाय, आत्मनः प्रमादाय च भवति।तथाच यथा वा गजस्य स्नानक्रिया,

विधवायाः स्वर्णालङ्कारधारणं च निरुपयोगम् एव, तथैव आचरणं विना ज्ञानम् अपि निरुपयोगमेव इति पद्यस्य आशयः।

**१२.२.२.६.विश्वासः नैव कर्तव्यः**

**नदीनां शस्त्रपाणिनां नखिनां शृङ्गिणां तथा।**
**विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ।।**

परिचयः;अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। तत्र इयं च द्वितीया कथा। तत्र वृद्धव्याघ्र-पथिकयोः वृत्तान्तं वर्णितम्। पान्थः लोभकारणतः स्नातुं सरः प्रविशति। तत्र महापङ्के निमग्नः भवति। व्याघ्रश्च तं धरति। तदा पान्थः एवं चिन्तयति।

भावः;मया मारत्मेक विश्वासः कृतः । तत् न युक्तम्। वर्षेषु सत्सु नद्यः उद्धततया प्रवहन्ति। प्रवाहस्य उद्धृतिः च यदा कदापि वा वर्धते। प्रमादाय कल्पते। अतः नदीनां विषये विश्वासः नैव कर्तव्यः। आयुधधारिणः प्रमादवशात् वा, उन्मादवशाद्वा, उत्पातं जनयन्ति। अतः आयुधधारिणां विषये अपि विश्वासः न तथा समीचीनः। नखिनः इतरान् नखैः छिन्दन्ति। एवं शृङ्गिणः अपि शृङ्गैः क्षोभां जनयन्ति। अतः नखिनां सिंहव्याघ्रादीनाम्, शृङ्गिणां वृषभादि जन्तूनां विषये वा विश्वासः प्रमादकरः। स्त्रियः चपलचित्ताः। कदा, कम्, किं, किमर्थं, भाषन्ते इति नैव अवगतः भवति। राजानः नाम अधिकारिणः। ते अपि कदाचित् एकम् एकथा कथयन्ति। तदेव अन्यं प्रति अन्यथा ब्रुवन्ति। किं प्रमाणत्वेन स्वीकार्यम् इत्यत्र संशयः। अतः स्त्रीषु वा राजसु वा विश्वासः न श्रेयस्करः। एते कदाचित् उपकारं कुर्वन्ति। कदाचित् अपकारमपि कुर्वन्ति, इति पद्यस्य भावः।

**१२.२.२.७.स्वभावः**

**सर्वस्य हि परीक्ष्यन्ते स्वभावाः,नेतरे गुणाः।**
**अतीत्य हि गुणान् सर्वान्,स्वभावः मूर्ध्नि वर्तते।।**

परिचयः;अयं श्लोकः हितोपदेशस्य मित्रलाभे वर्तते। तत्र इयं च द्वितीया कथा। तत्र वृद्धव्याघ्र-पथिकयोः वृत्तान्तं वर्णितम्।पान्थः लोभकारणतः स्नातुं सरः प्रविशति। तत्र महापङ्के निमग्नः भवति। व्याघ्रश्च तं धरति। तदा पान्थः एवं चिन्तयति।

भावः; विज्ञाः प्राणिनां सर्वेषां सहजातानां गुणानामेव परीक्षणम्उ विश्लेषणं कुर्वन्ति। अन्यान् तात्कालिकान् गुणान् न गणयन्ति। सर्वान् गुणान् अतीत्य सहजः स्वभावः पुरोवर्ती वर्तते। सः च मानवस्य प्रधानभूतः। सः दुरतिक्रमश्च। तात्कालिकाः तत्काले एव नश्यन्ति। सहजातास्तु, यावज्जीवं तिष्ठन्ति, इति अस्य पद्यस्य भावः।

**१२.२ ३. काक-मृग-जम्बुकानां कथा -पद्यानां भावाः**

१२.२ ३.१.एरण्डः द्रुमायते

**यत्र विद्वज्जनः नास्ति, श्लाध्यः तत्राल्पधीरपि।**
**निरस्तपादपे देशे, एरण्डोऽपि द्रुमायते।।**

परिचयः; अयं श्लोकः मित्रलाभस्य द्वितीयकथायां विद्यते।तत्र च काक-मृग-जम्बुकानां

कथा वर्ण्यते।अज्ञा तकुल- शीलस्य वासो न देयः इति काकः मृगं बोधयति ।तस्मिन् सन्दर्भे इदं पद्यं वर्तते।

भावः; जम्बुकः एवं स्पन्दते - मृगस्य प्रथम दर्शने भवान् (काकः) अपि अज्ञातकुलशीलः एव।परं भवतः स्नेहस्य उत्तरोत्तरम् अभिवृद्धिः दृश्यते एव खलु। अनवसरप्रसङ्गः वा, अधिक प्रसङ्गः वा नैव कर्तव्यः। यत्र प्रदेशे श्लाघ्यः विद्वान् नास्ति तत्र भवादृशः अल्पधीः अपि पूज्यते। निरस्तपादपे देशे एरण्डवृक्षोऽपि महावृक्षः भवति। अतः भवान् एरण्डसदृशस्सन् महावृक्षः इव आचरसि, तत् न तथा समीचीनम् इति पद्यस्य आशयः।

**१२.२ ३.२.उदारचरितः**

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

परिचयः;अयं श्लोकः मित्रलाभस्य द्वितीयकथायां विद्यते। तत्र च काक-मृग-जम्बुकानां कथा वर्ण्यते। अज्ञातकुलशीलस्य वासो न देयः इति काकः मृगं बोधयति। तदा जम्बुकः एवं स्पन्दते ।

भावः;मृगस्य प्रथमदर्शने भवान् अपि अज्ञातकुलशीलः एव। परं भवतः स्नेहस्य उत्तरोत्तरं अत्रिवृद्धिः दृश्यते एव खलु। अयम् आत्मीयः अयं परः इति अल्पबुद्धयः चिन्तयन्ति। विशालमनस्कानां तु समस्तं जगत् एकमेव कुटुम्बम् इति भावना भवति। त्वं अल्पबुद्धिः। अतः एवं चिन्तयसि। मृगस्तु उदारबुद्धिः। अत एव मम सख्यम् अभिलषति।

**१२.२ ३.३.व्यवहारेण मित्राणि रिपवश्च भवन्ति**

**न कश्चित् कस्यचित् मित्रम्, न कश्चित् कस्यचित् रिपुः।**
**व्यवहारेण मित्राणि जायन्ते रिपवः तथा।।**

परिचयः;अयं श्लोकः मित्रलाभस्य द्वितीयकथायां विद्यते।तत्र च काक-मृग-जम्बुकानां कथा वर्ण्यते। अज्ञा तकुलशील स्य वासो न देयः इति काकः जम्बुकस्य स्नेहं निवारयति। तदा मृगः एवं स्पन्दते।

भावः;मृगस्य प्रथमदर्शने भवान् अपि अज्ञातकुलशीलः एव।परं भवतः स्नेहस्य उत्तरोत्तरं अभिवृद्धिः दृश्यते एव खलु। अतः यथा अयं (मृगः) मम बन्धुः तथा भवान् अपि बन्धुः भव, इति प्रत्युत्तरं ददाति। तदा मध्ये कल्प- यित्वा मृगः काक-जम्बुकौ उद्दिश्य एवं वदति। किमनेन उत्तर-प्रत्युत्तरसम्भाषणेन। सर्वत्र एकीभूय विस्रम्भालापैः सुखं कालं यापयामः। कश्चित्, कस्यचित्,जन्मतः मित्रं न भवति,एवं कश्चित् कस्यचित् रिपुः अपि न भवति। व्यवहारेण मित्राणि वा, शत्रवः वा भवन्ति इति पद्यस्य आशयः।

**१२.२ ३.४.सः बान्धवः**

**उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः।।**

परिचयः; अयं श्लोकः मित्रलाभस्य द्वितीयकथायां विद्यते। तत्र च काक-मृग-जम्बुकानां

कथा वर्णिता अस्ति। मृगः क्षेत्रपतिना प्रसारिते पाशे बद्धः। जम्बुकः स्वकपटोपायः फलितः इति सन्तुष्टः। मृगः तु समागतं जम्बुकं विलोक्य सन्तुष्यति। उल्लसितश्च भवति। तदा मृगः जम्बुकम् एवं वदति।

भावः;'सखे बन्धनात् सत्वरं मां त्रायस्व। मित्रम् आपत्सु एव जानन्ति। उत्सवे यः आनन्दस्य भागं स्वीकरोति, व्यसने नाम कष्टकाले यः अनुसृत्य तिष्ठति, दुर्भिक्षे नाम क्षामसमये, यः धनेन धान्येन वा सहायम् आचरति, राष्ट्रे संक्षोभे सम्प्राप्ते यः सहनं वहति, यः राजद्वारे नाम अधिकारलाभे तुष्यति, श्मशाने नाम मरणान्ते दहनपर्यन्तं यः अनुसरति, सः एव बन्धुः भवति। अर्थात् सुख-दुःखयोः यः सह तिष्ठति सः एव बन्धुः भवति, त्वं मम बन्धुः असि, अतः माम् रक्षस्व ' इति जम्बुकं वदति।

**१२.२ ३.५.गतायुषां चिह्नानि**

**दीपनिर्वाणगन्धं च सुहृद् वाक्यम् अरुन्धतीम्।**
**न जिघ्रन्ति, न शृण्वन्ति, न पश्यन्ति, गतायुषः।।**

परिचयः; अयं श्लोकः मित्रलाभस्य द्वितीयकथायां विद्यते। तत्र काक-मृग-जम्बुकानां कथा वर्णिता अस्ति। मृगः पाशे बद्धः भवति। प्रार्थितोऽपि जम्बुकः मृगं रक्षितुं न सिद्धः भवति। अत्रान्तरे काकः आगत्य सर्वं वृत्तान्तं जानाति। तदा काकः मृगम् उद्दिश्य एवं वदति।

भावः;'सखे उक्तमेव मया पूर्वम्। गतायुषः नाम आसन्नमृत्यवः दीपनिर्वाणगन्धं न जिघ्रन्ति। सुहृद्वाक्यं न शृण्वन्ति। अरुन्धतीमपि न पश्यन्ति। एतस्मात् कारणादेव मम वचनं न श्रुतवान्। न अयं तव दोषः' इति मृगं समाश्वसिति।

**१२.२ ३.६.तादृशं मित्रं वर्जयेत्**

**परोक्षे कार्यहन्तारम्, प्रत्यक्षे प्रियवादिनम्।**
**वर्जयेत् तादृशं मित्रम्, विषकुम्भं पयोमुखम्।।**

परिचयः;अयं श्लोकः मित्रलाभ-द्वितीयकथायां विद्यते। तत्र च काक-मृग-जम्बुकानां कथा वर्णिता अस्ति। मृगः पाशबद्धः भवति। काकः अन्वेषयन् मृगं पाशबद्धं पश्यति। जम्बुकस्य कपटतां सम्बन्धयन् काकः मृगम् एवं वदति।

भावः;'सखे ! मित्रं द्विविधम्; सज्जनः दुर्जनश्च। तत्र द्वितीयः दुर्जनः परोक्षे कार्यं हन्ति। प्रत्यक्षे प्रियं वदति। तत् मित्रं विषकुम्भं पयोमुखं जानीहि। सः प्रमादकरः। यथा हि घटस्य अन्तः विषेण पूर्णं भवति। घटस्य मुखं तु पयसा युक्तं भवति। परम्,जनः अयं पयः पूर्णः घटः इति भ्रमति। पानानन्तरं विषप्रभावेण जानाति क्षीरं विषपूर्णम् इति। एवं प्रियवाक्यैः प्रथमं सन्तोषयति। परं पश्चात्काले दुर्जनस्य दौष्ट्यं बहिर्गतं भवति। अतः एतादृशं मित्रं पयोमुखविषकुम्भं व्यवहरन्ति। तं तु सर्वथा वर्जयेत् एव, इति पद्यस्य आशयः।

**१२.२.४. जरद्गव-दीर्घकर्णयोः कथा- पद्यानां भावाः**

१२.२.४.१. आगतं भयं वीक्ष्य नरः यथोचितं कुर्यात्

**तावत् भयस्य भेतव्यम्,यावत् भयम् अनागतम्।**

**आगतं तु भयं वीक्ष्य,नरः कुर्यात् यथोचितम्।।**

परिचयः;अयं श्लोकः मित्रलाभस्य तृतीयकथायां विद्यते। तृतीयकथायां च जरद्गववृत्तान्तं वर्ण्यते। तत्र मार्जालः पक्षिशाबकान् भक्षितुं आगच्छति। तदा गृध्रः 'दूरम् अपसर, नोचेत् हन्तव्योऽसि मया' इति भीषयति।तदा मार्जालः तत्र गृध्रं दृष्ट्वा एवं चिन्तमति।

भावः;यावत् भयस्य कारणं सम्यक् दृष्टौ न पतति, तावत्पर्यन्तम् एव भयस्य कारणं किम् ? इति भेतव्यं भवति। भयस्य हेतौ ज्ञातेउ अवगते सति, अवगतं वा आगतं वा भयं वीक्ष्य तत्कालोचितम् आत्मरक्षणं कार्यम् एव । तेनैव प्रयोजनं भवति, तत् अतीत्य चिन्तनेन किम् अपि प्रयोजनं न भवति इति पद्यस्य आशयः।

**१२.२.४.२.जातिमात्रेण वध्यः पूज्यः वा भवति**

**जातिमात्रेण किं कश्चित्, वध्यते पूज्यते क्वचित्।**
**व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत्।।**

परिचयः;अयं श्लोकः मित्रलाभस्य तृतीयकथायां विद्यते। तृतीयकथायां च जरद्गववृत्तान्तः वर्ण्यते। तत्र मार्जालः पक्षि शाबकान् भक्षितुं आगच्छति। तदा गृध्रः 'दूरम् अपसर, नोचेत् हन्तव्योऽसि मया'इति भीषयति। तदा मार्जालः गृध्रम् एवं वदति।

भावः;आर्य मम वचनं श्रूयताम्। श्रवणानन्तरम् अपि यदि अहं वध्यः तदा हन्तव्यः एव। यः कोऽपि जनः जातिमात्रेण पूज्यः वा, वध्यः वा न भवति। तस्य व्यवहारं परिज्ञाय क्रूरबुद्ध्या अयं वध्यः इति निश्चीयते। एवं सुगुणसम्पत्त्या अयं पूज्य इति निश्चीयते। अतः वध्य-पूज्यभावयोः व्यक्तेः व्यवहारः एव कारणम्, इति अस्य पद्यस्य आशयः।

**१२.२.४.३.आतिथ्यम्**

**अरौ अपि उचितं कार्यम् आतिथ्यं गृहम् आगते।**
**छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः।।**

परिचयः;अयं श्लोकः मित्रलाभस्य तृतीयकथायां विद्यते। तृतीयकथायां च जरद्गवस्य वृत्तान्तं वर्णितम् अस्ति। तत्र मार्जालः पक्षिशाबकान् भक्षितुम् आगच्छति। तदा गृध्रः 'दूरम् अपसर,नोचेत् हन्तव्योऽसि मया' इति भीषयति। तदा मार्जालः गृध्रम् मार्जालः स्वस्य सौशील्यं गृध्रस्य ख्यापयन् अतिथिधर्मम् एवं बोधयति।

भावः; स्वयं शत्रुः अपि अतिथिरूपेण गृहम् यदि आगच्छति, तदा तस्य अपि आतिथ्यं कर्तव्यम् एव इति शास्त्रसरणिः। वृक्षः स्वस्य छेत्तुः अपि नीडां ददाति एव खलु,मम छेदकः अयम् इति वृक्षः छेत्तुः छायां न उप- संहरते खलु। हन्तुः अपि छायां प्रददाति एव। अयं धर्मः स्थावरे वृक्षे अपि दृश्यते। ज्ञानिषु प्राणिषु अयं धर्मः ततः अपि अधिकतया अवश्यं वर्तते इति पृथक्-तया नैव वक्तव्यं भवति,इति अस्य पद्यस्य इति आशयः।

**१२.२.४.४.साधवः क्रूरेषु अपि दयां कुर्वन्ति**

**निर्गुणेषु अपि सत्वेषु दयां कुर्वन्ति साधवः।**
**न हि संहरते ज्योत्स्नां चन्द्रः चण्जालवेश्मनः।।**

परिचयः; अयं श्लोकः मित्रलाभस्य तृतीयकथायां विद्यते। तत्र च जरद्गवकथा वर्णिता अस्ति। मार्जालः पक्षिशाबकान् भक्षितुं आगच्छति। तदा गृध्रः 'दूरम् अपसर,नोचेत् हन्तव्योऽसि मया' इति तर्जयति। तदा मार्जालः स्वस्य सौशील्यं गृध्रस्य एवं ख्यापयति।

भावः; अहं तावत् न कुत्सितः, किन्तु उदारः। विशालहृदयाः उदारचरिताः साधवः, गुणरहितेषु असाधुषु क्रूरेष्वपि जन्तुषु, दयां कुर्वन्ति। तथाहि-(साधवः क्रूरेष्वपि जन्तुषु दयां कुर्वन्ति इत्ययं विषयः वास्तव एव अत्र उदाहरणम् अपि भवति) चन्द्रः ज्योत्स्नां वितनोति। सर्वत्र ज्योत्स्नां प्रसारयति। चण्डालः अपरिशुभ्रः। सर्वदा कलेबर-आधारित-कर्म अनुतिष्ठति। एवम् अपरिशुभ्रे अपि तस्य गृहे चन्द्रः ज्योत्स्नां न उपसंहरते खलु, तत्रापि सर्वातीततया चन्द्रः चन्द्रिकां तनोति एव , इति अस्य पद्यस्य आशयः।

**१२.२.४.५.सर्वदेवमयः अतिथिः**

**उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः।**
**पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः।।**

परिचयः; अयं श्लोकः मित्रलाभस्य तृतीयकथायां विद्यते। तत्र च जरद्गवकथा वर्णिता अस्ति। मार्जालः पक्षिशाबकान् भक्षितुं आगच्छति। तदा गृध्रः'दूरम् अपसर,नोचेत् हन्तव्योऽसि मया' इति तर्जयति। तदा मार्जालः स्वस्य सौशील्यं ख्यापयन् अतिथेः प्राशस्त्यम् एवं वदति।

**भावः**-उत्तमस्य ब्राह्मणस्य गृहम् आगतः नीचोऽपि मानवः पूजनीयः एव। अभ्यागतः स्वयं विष्णुः इति सूक्तिम् अनुसृत्य अतिथिः देवदेवस्वरूपः। अतः यथायोग्यं तस्य पूजा कर्तव्या। प्रकृते भवतः गृहं अहं स्वयम् आगतः अतिथिः। अतः मम पूजनम् एव भवतः युक्तम्, न तु तर्जनम्, इति अस्य पद्यस्य आशयः।

**१२.२.४.६.दग्धोदरस्यार्थे पातकं कः कुर्यात् ?**

**स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते।**
**अस्य दग्धोदरस्यार्थे कः कुर्यात् पातकं महत् ।।**

परिचयः;अयं श्लोकः मित्रलाभस्य तृतीयकथायां विद्यते। तत्र जरद्गवकथा वर्णिता अस्ति। मार्जालः पक्षिशाबकान् भक्षितुं आगच्छति। तदा गृध्रः 'त्वं माजारः, मांसरुचिः, द्रुतम् अपसर,नोचेत् हन्तव्योऽसि मया' इति तर्जयति।तस्य वचसः प्रतिस्पन्दतया माजारः एवं वदति।

**भावः**- स्वच्छन्दतया वने जातं शाकादिकं भक्षयित्वा अपि उदरपोषणं कर्तुं शक्यते। तदर्थं कः पक्षिहनन - रूपं महत् पापं करोति। उदरपोषणार्थं पापकरणम् अनावश्यकम् एव। अत्र दग्धोदरस्य इति निन्दावचनेन उदर- पोषणार्थम् पापस्य करणं,नीचातिनीचम् इति कविः सूचयति।

**१२.२.५.काक-मूषिकयोः मैत्री - पद्यानां भावाः**

१२.२.५.१.साधोः मनः न विक्रियां याति

**साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम्।**
**न हि तापयितुं शक्या सागराम्भः तृणोल्कया।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे द्वितीयकथायां वर्तते। अत्र काक-मूषिकयोः कथा वर्णिता अस्ति। चित्रग्रीववृत्तान्तं दृष्ट्वा काकः मूषिकेण स्नेहम् इच्छति।भक्ष्य-भक्षकयोः स्नेहः प्रमादकरः इति मूषिकः तद्वारयति। तदा हिरण्यकं प्रति काकस्य वचनम् एतत्।
भावः;साधुः प्रकुपितः अपि, तस्य मनः विकारं नायाति। उल्का नाम अग्निकणः तृणे दग्धे यः अग्निकणः सम्भवति सा तृणोल्का भवति। तृणोल्कया सागरस्य जलं तापयितुं शक्यं न भवति खलु। तृणं प्रज्वलितम् अपि सागरजलं, यथा तापयितुंउ विकारं प्रापयितुं, न समर्थ भवति, तथा साधुः पुरुषः कुपितः अपि इतरेषां प्राणानां हानिं न जनयति। अतः मया स्नेहकरणं न प्रमादकरम्, इति अस्य पद्यस्य आशयः।

**१२.२.५.२.शत्रुणा स्नेहः प्रमादकरः**

**शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना।**
**सुतप्तमपि पानीयं शमयत्मेव पावकम्।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे द्वितीयकथायां वर्तते। अत्र काक-मूषिकयोः मैत्री वर्णिता अस्ति। काकः हिरण्यकेन मैत्रीं वाञ्छति। शत्रुपक्षः भवान् अस्माकम्। शत्रुणा स्नेहः न युक्तः इति निराकरोति। तदा हिरण्यकः काकम् एवं वदति।
भावः;सम्पूर्णेन, समग्रेणापि अङ्गीकारेण, शत्रुणा सन्धिःउ स्नेहः न कार्यः एव। सामान्यतः पानीयं शीतलं भवति। शीतलं पानीयं पावकं शमयतु नाम। परं सुतप्ते पानीये उष्णकणाः भवन्ति, उष्णाः कणाः औष्ण्यस्य वर्धनायैव भवन्ति, अग्निः अपि उष्णः, सुतप्तं पानीयं तम् अग्निं वर्धयितुं एव उपकुरुते,न तु शमनाय इति अस्माभिः चिन्त्यते खलु, परं तत् विरुद्धतया, सुतप्तम् अपि पानीयम्, पावकम् नाम अग्निम्, शमयति इति सक्षात् वयं पश्यामः। यतः एवं भवति,ततः शत्रुणा स्नेहः न करणीयः इति अवगन्तव्यमिति अस्य पद्यस्य आशयः।

**१२.२.५.३.सर्वथा दुर्जनः परिहर्तव्यः**

**दुर्जनः परिहर्तव्यः विद्ययालंकृतोऽपि सन्।**
**मणिना भूषितः सर्पः किमसौ न भयंकरः।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे द्वितीयकथायां वर्तते।अत्र काक-मूषिकयोः मैत्री वर्णिता अस्ति। काकः हिरण्यकेन मैत्रीं वाञ्छति। शत्रुपक्षः भवान् अस्माकम्। शत्रुणा स्नेहः न युक्तः इति निराकरोति। तदा हिरण्यकः काकम् एवं वदति।
भावः; दुर्जनः, विद्यया अलङ्कृतोऽपिउ पण्डितः अपि, शास्त्रज्ञः अपि, परिहरणीयःउ अस्वीकरणीयः एव। तथाहि – सर्पः विषजन्तुः। सः मूर्धसु मणीन् धरति। यद्यपि अयं मणिना भूषितः, तथा अपि मणिसङ्ग्रहणाय न कोऽपि सर्पस्य अन्तिकम् एति। दशतीति

हेतोः भयम् आशङ्क्य, कोऽपि सर्पम् न उपसर्पति। प्रकृते भवान् अपि दुष्टः। त्वया सह मम मैत्री परहरणीया, न युक्ता एव इति हिरण्यकस्य अभिप्रायः।

**१२.२.५.४.शत्रुषु , विरक्तासु भार्यासु च विश्वासः प्रमादकरः**

**महताऽपि अर्थसारेण यो विश्वसिति शत्रुषु।**
**भार्यासु च विरक्तासु तदन्तं तस्य जीवनम्।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे द्वितीयकथायां वर्तते। अत्र काक-मूषिकयोः मैत्री वर्णिता अस्ति। काकः हिरण्यकेन मैत्रीं वाञ्छति। शत्रुणा स्नेहः न युक्तः इति हिरण्यकः निराकुर्वन्, एवं वदति।

भावः; यः शत्रून् विश्वसिति सः, तथैव, यः विरक्तासु भार्यासु विश्वासं क्षिपति सः च, एतौ द्वौ अपि शीघ्रम् एव मरणम् आप्नुतः । तयोः उभयोः अपि जीवने पदेपदे कष्टान्येव भवन्ति, इति पद्यस्य आशयः।

**१२.२.५.५.दुर्जन- सुजनयोः मैत्री**

**मृद्-घटवत् सुखभेद्यः, दुस्सन्धानश्च दुर्जनो भवति।**
**सुजनस्तु कनकघटवत् ,दुर्भेद्यश्च, आशु सन्धेयः।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे द्वितीयकथायां वर्तते। अत्र काक-मूषिकयोः मैत्री वर्णिता अस्ति। हिरण्यकः लघुपतनकेन मैत्रीं न वाञ्छति। यदि त्वंउ हिरण्यकः, मैत्रीं न करोषि,तदा तव द्वारि अत्मानं व्यापादयिष्यामि  इति लघुपतनकः शपथम् आचरति। तत्सन्दर्भे काकः सुजन-दुर्जनयोः मैत्रीस्वरूपं एवं वर्णयति।

भावः;दुर्जनस्य स्नेहः मृत्-घटेन तुल्यः। सुजनस्य स्नेहः कनकघटेन सदृशः। मृद्-घटः सुखभेद्यः सुलभ- तया भिन्नः भवति। पुनः सन्धातुम् अपि न शक्यते। दुर्जनस्य मैत्री अपि सुखं भिद्यते। केनापि उपायेन सन्धातुम्
अपि अशक्यं भवति। सुजनस्य मैत्री कनकघटसदृशः। कनकघटः दुर्भेद्यः, सुलभतया भिन्नः अपि न भवति। सुखेन सन्धातुं योग्यश्च भवति। येन केनापि उपायेन सुलभतया सन्धातुम् अपि शक्यं भवति। मम मैत्री सज्जनमैत्री कनकघटतुल्या, इति अस्य पद्यस्य आशयः।

**१२.२.५.६.दुर्जन - सुजनयोः स्वभावः**

**नारिकैलसमाकाराः दृश्यन्ते हि सुहृज्जनाः।**
**अन्ये बदरिकाकाराः बहिरेव मनोहराः।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे द्वितीयकथायां वर्तते। अत्र काक-मूषिकयोः मैत्री वर्णिता अस्ति। हिरण्यकः लघुपतनकेन मैत्रीं न वाञ्छति। यदि त्वं(हिरण्यकः)मैत्रीं न करोषि, तदा तव द्वारि अत्मानं व्यापाद- यिष्यामि इति लघुपतनकः शपथम् आचरति। तत्सन्दर्भे काकः सुहृज्जनानां स्वभावम् एवं वर्णयति।

**भावः**-सुहृज्जनाः स्वभावेन नारिकेलफलैः समानाः । दुर्जनाः बदरिकाफलैः समानाः ।

तथा हि- नारिकेलाः बहिः कठिनाः। अन्तः मधुरं पदार्थं जलं च वहन्ति। एवं सज्जानां मैत्री प्रथमतः कठिना भवति। अन्ततः श्रेयोदायकं भवति। बदरीफलं बहिः दर्शनाय मनोहरं भवति। अन्तः बीजानि कठिनानि भवन्ति। तानि च खादनसमये दन्तानां पारुष्यं जनयन्ति। एवं दुर्जनानां मैत्री मनोहरतया, अल्पैनैव कालेन, आडम्बरतया सुलभतया एव जायते। सा मैत्री अचिरात् एव नाशं च गच्छति। आजीवितं न तिष्ठति। मध्ये एव विच्छिन्ना भवति। दुर्जनमैत्री सुलभा विच्छिन्नान्ता च भवति, इति अस्य पद्यस्य भावः।

**१२.२.५.७.दुरात्मनः-महात्मनश्च भेदः**

**मनसि अन्यत् वचसि अन्यत् कर्मणि अन्यत् दुरात्मनाम्।**
**मनसि एकम्, वचसि एकम्, कर्मणि एकं महात्मनाम्।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे द्वितीयकथायां वर्तते। अत्र काक-मूषिकयोः मैत्री वर्णिता अस्ति। हिरण्यकः लघुपतनकेन मैत्रीं न वाञ्छति। यदि त्वं (हिरण्यकः)मैत्रीं न करोषि, तदा तव द्वारि अत्मानं व्यापाद- यिष्यामि इति लघुपतनकः शपथम् आचरति। तत्सन्दर्भे काकः महात्मनां दुरात्मनां च स्वभावम् एवं वर्णयति।

भावः; दुरात्मानः अन्यत् वदन्ति। अन्यत् मनसि चिन्तयन्ति । अन्यत् कुर्वन्ति। मनो-वाक्-काय-कर्मसु ऐक्यं न भवति। मनो-वाक्-कायानि त्रिकरणानि इति उच्यन्ते। तेषुउ त्रिकरणेषु,एक्यम्उ शुद्धिः, त्रिकरणशुद्धिः भवति।तथा च दुरात्मनः कुत्रापि त्रिकरणशुद्धिः न भवति। महात्मा तु न तथा। महात्मा यत् वदति तदेव चिन्तयति। यत् चिन्तयन्ति तदेव कर्मसु अनुतिष्ठति। एवं महात्मनः मनो-वाक्-काय-कर्मसु नाम त्रिकरणेषु, ऐक्यम्उ शुद्धिः, भवति। अतः एव महात्मानः सर्वत्र त्रिकरणशुद्ध्या प्रवर्तन्ते। दुरात्मनां त्रिकरणशुद्धिः न भवति। महात्मनां त्रिकरणशुद्धिः भवति। अनयोः अयम् अपि कश्चन भेदः।

**१२.२.६. हिरण्यकस्य वृत्तान्तम्**

१२.२.६.१.मनस्विनां स्वभावः

**मनस्वी म्रियते कामम्, कार्पण्यं तु न गच्छति।**
**अपि निर्वाणम् आयाति, नानलः याति शीतताम् ।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते।अत्र मूषिकवृत्तान्तं वर्णितम् अस्ति।चूडाकर्णः हिरण्यक स्य विवरं नाशयति। धनं च गृह्णाति।तेन हिरण्यकः नष्टाश्रयः धनहीनश्च भवति। तथाविधं च हिरण्यकं दृष्ट्वा चूडाकर्णः परिहसति। अभिमानधनः हिरण्यकः बाधते। तत्सन्दर्भे हिरण्यकः मनस्विनः स्वभावम् एवं वर्णयति।

भावः;मनस्वी नाम अभिमानधनः । अभिमानैकधनाः मनस्विनः मरणाय अपि सिद्धाः भवन्ति। नाम मरणम् अपि स्वेच्छया स्वीकुर्वन्ति। परं यदा कदापि वा दैन्यं तु न आश्रयति,

न अङ्गीकरोति च। तथाहि -सम्पन्नहीनः अनलः स्वच्छन्दं निर्वाणम् अपि, नाम मरणमपि गन्तुं इच्छति। परं शैत्यं तु दातुं वा, शीतलं भवितुं वा नेच्छति। इयं हि मनस्विनां प्रकृतिः, इति अस्य पद्यस्य आशयः।

**१२.२.६.२.मनस्विनः द्वयी वृत्तिः**

**कुसुमस्तबकस्येव, द्वयी वृत्तिः मनस्विनः**
**सर्वेषां मूर्ध्नि वा तिष्ठेत्, विशीर्येत वनेऽथवा।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते। अत्र हिरण्यकवृत्तान्तं वर्णितम् अस्ति। चूडा कर्णः हिरण्यकस्य विवरं नाशयति। धनं च गृह्णाति। तेन हिरण्यकः नष्टाश्रयः धनहीनश्च भवति। तथाविधं च हिरण्यकं दृष्ट्वा चूडाकर्णः परिहसति। अभिमानधनः हिरण्यकः बाधते। तदा मूषकः मनस्विनः स्वभावम् एवं वर्णयति।

भावः; मनः अस्य अस्ति इति मनस्वी। मनस्वी नाम अत्र अभिमानधनः। मनस्विनः कुसुमस्तवकस्य इव द्वयी वृत्तिः भवति। कुसुमस्तवकस्य द्वे मार्गे स्तः तत्र, सर्वासां शिरांसि अधिरुह्य सम्मानस्य अधिगमनं प्रथमः,येषां केषाम् अपि दृष्टौ अपतित्वा सिक्तस्सन्,शुष्कश्च सन्,वने एव विशीरणं द्वितीयः। एवं अभिमानवतः जनस्य अपि द्वयी वृत्तिः यदि अवकाशः, सम्मानम् अधिगत्य सर्वैः सम्मानम् अवाप्नोति। सर्वेषां नायकमणिः भवति। यदि अवकाशः न भवति अज्ञातः सन् एव शीर्यते। अप्रसिद्धस्सन् एव तनुं त्यजति, परं दैन्यं तु न गच्छति, इति पद्यस्य आशयः।

**१२.२.६.३.विवेकिनां स्वभावः**

**न अप्राप्यम् अभिवाच्छन्ति, नष्टं नेच्छन्ति शोचितुम्।**
**आपत्सु अपि न मुह्यन्ति, नराः पण्डितबुद्धयः।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते। अत्र हिरण्यकवृत्तान्तं वर्णितम् अस्ति। हिरण्यकः मन्थरक-लघुपतनकयोः स्ववृत्तान्तं कथयति। तदा मन्थरकश्च नित्यसञ्चयस्य आवश्यकताम्, अतिसञ्चयस्य अनर्थकतां च हिरण्यकाय बोधयति। तदा एव प्रसङ्गवशात् पण्डितबुद्धीनां स्वभावम् एवंवर्णयति।

भावः; पण्डिताः नाम विवेकिनः। ते अलब्धे वस्तुनि आसक्ताः न भवन्ति। नष्टस्य वस्तुनः विषये विचारं न कुर्वन्ति। आपत्सु अपि भ्रान्ताः न भवन्ति। अतः एव ते भद्राणि पश्यन्ति। विवेकशीलाश्च भवन्ति,इति भावः।

**१२.२.६.४.पठनमात्रेण कार्याणि न सिद्ध्यन्ति - क्रियाशालिना भाव्यम्**

**शास्त्राणि अधीत्यापि भवन्ति मूर्खाः, यस्तु क्रियावान् पुरुषः सः विद्वान्।**
**सुचिन्तितं च औषधम् आतुराणाम्, न नाममात्रेण करोति अरोगम्।।**

परिचयः; अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते। अत्र हिरण्यकवृत्तान्तं वर्णितम् अस्ति। हिरण्यकः मन्थरक-लघुपतनकयोः स्ववृत्तान्तं कथयति। तदा मन्थरकश्च

हिरण्यकाय धैर्यं बोधयति। तदा एव उत्साहस्य प्रामुख्यं वर्णयति।

भावः; 'सखे! सर्वदा त्वया सोत्साहेन भवितव्यम्' केचन शास्त्राणि पठन्ति। शास्त्राणि जानन्ति। शास्त्र- ज्ञानम् आप्नुवन्ति। परं नैव आचरन्ति। आचरणहीनाः भवन्ति। आचरणताहीनेन मूर्खाश्च भवन्ति। एवं तेषां शास्त्रज्ञानं निरुपयोगम् एव भवति। अतः केवलशास्त्रज्ञानं न पर्याप्तं भवति। किन्तु आचरणात्मकता उ क्रिया- शीलकताउ उत्साहशीलता आवश्यकी भवति। यः क्रियाशीली भवति सः विद्वान् भवति। तथा हि -केवलं नामस्म- रणमात्रेण औषधं रोगिणम् अरोगं कर्तुं न प्रभवति। किन्तु सुचिन्तितम् एव औषधं रोगिणां रोगम् अपनुदति खलु। अतः अभ्युदयस्य सम्पादकम्, आचरणम् एव, इति पद्यस्य आशयः।

**१२.२.६.५.सुखं दुःखं च सनानतया स्वीकर्तव्यम्,**

**सुखम् आपतितं सेव्यम्, दुःखम् आपतितं तथा।**
**चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।।**

परिचयः; अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते। अत्र हिरण्यकवृत्तान्तं वर्णितम् अस्ति। हिरण्यकः मन्थरक-लघुपतनकयोः स्ववृत्तान्तं कथयति। तदा मन्थरकश्च हिरण्यकाय धैर्यं बोधयति। तदा एव सुख-दुःखयोः समानतया स्वीकरणस्य च प्रामुख्यं वर्णयति।

भावः; आपतितम्उ कालतः लब्धं सुखम्, सेव्यम्उस्वीकरणीयम्, नाम अनुभोक्तव्यम्। तथैव अदृष्टवशात् परापतितं दुःखम् अपि सह्यम्, अनुभोक्तव्यम् एव। सुखं दुःखम् एतत् उभयं चक्रवत्उ चक्रारपङ्क्तिः इव, परिवर्ततेउ नीचैः, उपरि च गच्छति। चक्रं गच्छत् सत् कदाचित् अधः, कदाचित् उच्चैः च याति। एवम् एव कदाचित् सुखम् आयाति। तदनु दुःखम् आगच्छति। दुःखानन्तरं पुनः सुखम् आयाति। सर्वदा दुःखम् एव वा , सर्वदा सुखम् एव वा न सम्भवति। अतः दुःखकाले धैर्येण स्थातव्यम्, इति इयं जीवनपद्धतिः अस्मिन् श्लोके वर्णिता अस्ति।

**१२.२.६.६.वितरणाय धनसम्पादनम् अनावश्यकम्**

**धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता।**
**प्रक्षालनात् हि पङ्कस्य दूरात् अस्पर्शनं वरम्।।**

परिचयः; अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते। अत्र हिरण्यकवृत्तान्तं वर्णितम् अस्ति। हिरण्यकः मन्थरक-लघुपतनकयोः स्ववृत्तान्तं कथयति। तदा मन्थरकश्च हिरण्यकाय धैर्यं बोधयति। तदा एव अनुभवायैवउ भोगायैव, धनम् आर्जनीयं, न तु वितरणाय इति धनभोगस्य प्रामुख्यम् एवं वर्णयति। इदं च न पारमार्थिकं वचः। किन्तु लुब्धस्वभावबोधकम्।

भावः;वित्तेहा नाम वित्तं प्रति,ईह उ आकाङ्क्षा, धनाकङ्क्षा इत्यर्थः। धर्मकार्याचरणाय यदि धनाकाङ्क्षा अस्ति तदपेक्षया धने निरीहताउ अनभिलाषः, एव वरम्।

सम्पाद्य,वितरणकरणापेक्षया धनस्य असम्पादन्म् एव वरम् । वितरणाय सम्पादनम् अयुक्तम् इति भावः। तथा हि- पङ्के पादप्रक्षेपणं, तस्य जलेन शुद्धीकरणं इति कार्यद्वयापेक्षया दूरात् पङ्कस्य अस्पर्शनम् एव वरम्। अतः भवतः धर्माचरणाय धनाकाङ्क्षा अनावश्यकी एव, इति पद्यस्य आशयः।

**१२.२.६.७.अभीष्टं न सम्पाद्यते - इच्छा अपि न निवर्तते**

**जन्मनि क्लेशबहुले किं नु दुःखमतः परम्।**
**इच्छा सम्पत् यतो नास्ति यच्चेच्छा न निवर्तते।।**

परिचयः; अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते।अत्र हिरण्यकवृत्तान्तं वर्णितम् अस्ति। हिरण्यकः मन्थरक-लघुपतनकयोः स्ववृत्तान्तं कथयति। तदा मन्थरकश्च हिरण्यकाय धैर्यं बोधयति। तदा एव इच्छायाः दुःखकारकत्वं एवं वर्णयति।

भावः;कष्टबहुलः अयं संसारः। अत्र इच्छानुसारं सम्पत् न लभ्यते। इच्छापि न निवर्तते। अतः परं दुःखं किं विद्यते ? दुःखाय कारणभूतां सम्पदं विहाय, कालः यापयितव्यः। तदैव सुखं भवति, इति पद्यस्य आशयः।

**१२.२.६.८.सन्तः एव सतः उद्धरन्ति**

**सन्त एव सतां नित्यं आपत् उद्धरणक्षमाः।**
**गजानां पङ्कमग्नानां गजाः एव धुरन्धराः।।**

परिचयः; अयं श्लोकः हितोपदेशमित्रलाभे चतुर्थकथायां वर्तते। अत्र हिरण्यकवृत्तान्तं वर्णितम् अस्ति। हिर ण्यकः मन्थरक-लघुपतनकयोः स्ववृत्तान्तं कथयति। तदा हिरण्यकस्य दुःखापनोदनाय मन्थरः धैर्यं उपादिशति। हिरण्यकं प्रति मन्थरकस्य प्रोत्साहनं धैर्यकथनं च प्रशंसन् लघुपतनकः एवं वदति।

भावः; 'हे मन्थर भवान् धन्यः, सर्वथा श्लाघ्यः असि। सताम्, आपदः उद्धर्तुं, सज्जनाः एव समर्थाः भवन्ति, न तु इतरे नीचाः। तथा हि--गजाः महाबलशालिनः,गम्भीराश्च। पङ्के निमज्य,आपदम् आप्तानां तादृशानां गजानाम् उद्धारणाय गजा एव समर्थाः भवन्ति। न तु अन्ये व्याघ्र-भल्लूकादयः' इति अस्य पद्यस्य आशयः।

**१२.२.७.मन्थकवृत्तान्तम् -पद्यानां भावाः**

१२.२.७.१.मित्रं चतुर्विधं ज्ञेयम्

**औरसं कृतसम्बन्धम्, तथा वंशक्रमागतम्।**
**रक्षकं व्यसनेभ्यश्च, मित्रं ज्ञेयं चतुर्विधम्।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे सप्तमकथायां वर्तते। अत्र मन्थकवृत्तान्तं वर्णितम् अस्ति। मृगः मन्थरक-लघुपतनक-हिरण्यकान् मिलति। तैः सह स्नेहं वाञ्छति। सर्वप्रतिनिधिः भूत्वा हिरण्यकः मृगेण सख्यम् अङ्गीकरोति। तदा हिरण्यकस्य वचनम् एतत्।

भावः; भवतः मित्रत्वम् अस्माभिः अप्रयत्नेन निष्पन्नम्। मैत्री चतुर्विधा भवति। पुत्र पौत्रादिकृतसम्बन्धेन सम्प्राप्तम् आद्यम्। विवाहादिसम्बन्धद्वारा सम्प्राप्तं द्वितीयम्। वंशक्रमागतं

तृतीयम्। आपद्भ्यः रक्षकं मित्रं चतुर्थम्। एवं मैत्रीबन्धः चतुर्विधः भवति इति अस्य पद्यस्य भावः।

**१२.२.७.२.सुरक्षितानि प्रान्तानि**

**अम्भांसि जलजन्तूनाम्, दुर्गं दुर्गनिवासिनाम्।**
**स्वभूमिः श्वापदादीनाम्, शज्ञां मन्त्री परं बलम्।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे सप्तमकथायां वर्तते। अत्र मन्थकवृत्तान्तं वर्णितम् अस्ति। मृगः मन्थरक-लघुपतनक-हिरण्यकान् मिलति। तैः सह स्नेहं वाञ्छति। सर्वप्रतिनिधिः भूत्वा हिरण्यकः मृगेण सख्यम् अङ्गीकरोति। मृगश्च व्याधात् भयं सूचयति। तं श्रुत्वा मन्थरकः रक्षणाय जलाशयं प्रविशामि इति कथयति। तदा हिरण्यकस्य वचनम् एतत्।

भावः;मृग-काक-मूषिक-मन्थराः अन्यत्र जलाशयं गन्तुं उद्युक्ताः। तदा मूषिकः एवं वदति- जलाशयान्तरे प्राप्ते मन्थरस्य कुशलं भवति। परं स्थले गच्छतः कः प्रतीकारः। जलजन्तूनां, जले निवासः, बलं भवति। दुर्गनि वासिनां राजादीनां दुर्गं रक्षकं भवति। जन्तूनां स्वभूमिः अटवी, रक्षणाय कल्पते। राज्ञां सैन्यं परं बलं भवति।

**१२.२.७.३.कष्टकाले अवान्तराणि अधिकाधिकं सम्भवन्ति**

**एकस्य दुःखस्य न यावत् अन्तं गच्छाम्यहं पारम् इवार्णवस्य।**
**तावत् द्वितीयं समुपस्थितं मे छिद्रेषु अनर्थाः बहुलीभवन्ति।।**

परिचयः; अयं श्लोकः हितोपदेशमित्रलाभे सप्तमकथायां वर्तते। अत्र मन्थरकवृत्तान्तं वर्णितम् अस्ति। मन्थरकः सुलभकोपी। स्थले गच्छतः कः प्रतीकारः इति प्रश्नेनैव रुष्टः भवति। जलशयान्तरं गन्तुम् इच्छति। मित्राणि तम् अनुसरन्ति। तत्र च सः व्याधेन गृहीतः भवति। मन्थरः व्याधेन प्राप्तः धनुषि बद्धश्च। तदा मृग- वायस-मूषिकाः परं विषादम् उपागताः। तदा हिरण्यकः विलपन् एवं वदति।

भावः;अर्णवः समुद्रः। तत्र तरङ्गाः बहवः भवन्ति। यावत् एकः तरङ्गः तीरं प्राप्नोति, तावत् एव अपरः जायते। एवं अर्णवः अनन्ततरङ्गयुक्तः सन् तरङ्गानाम् अन्तंउ पारं गन्तुम् अशक्यः भवति। एवं दुःखस्य अन्तं यावता गच्छामि तावता द्वितीयं दुःखं समापतति। जलाभावात् अन्यत्र गमनं दुःखदायकं भवति। तत् तर्तुं यदा वयं प्रयत्नं कुर्मः तावता मन्थरः व्याधेन बद्धः इति अन्यत्दुःखं परापतति, तथाहि- कष्टकाले सम्प्राप्ते अवा- न्तराणि अधिकाधिकं सम्भवन्ति खलु ,इति पद्यस्य आशयः।

**१२.२.७.४.उभयतः भ्रष्टत्वम्**

**यो ध्रुवाणि परित्यज्य, अध्रुवाणि निषेवते।**
**ध्रुवाणि तस्य नश्यन्ति, अध्रुवं नष्टमेव हि ।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे सप्तमकथायां वर्तते। अत्र मन्थरकवृत्तान्तं वर्णितम् अस्ति। व्याधस्य उभयभ्रष्टुत्वं समर्थयति अयं श्लोकः। मन्थरकः सुलभकोपी। सः च व्याधेन गृहीतः भवति। मन्थरः व्याधेन प्राप्तः धनुषि बद्धश्च। तदा मृग-वायस-मूषिकाः परं

विषादम् उपागताः। तं रक्षितुं उपायं कुर्वन्ति। तेन उपायेन व्याधः हस्तगतं मन्थरम् अपगच्छति, अभिलषितं च न अधिगच्छति ।तथा हि- उपायानुसारं मृगः मृतवत् पतति। तम् आप्तुं कर्तारिकाम् आदाय व्याधः गच्छति। हिरण्यकः मन्थरस्य बन्धनच्छेदनं करोति। मन्थरः जलं प्रविशति। व्याधं दृष्ट्वा मृगः पलायितः भवति। मन्थरं,मृगं च अपवहति ।एवं व्याधः उभयतः भ्रष्टः भवति । असमीक्ष्यकारिणः मम व्याधस्य ,एतत् उचितमेव इति सः एवं चिन्तयति।

भावः यः अनश्वरं सिद्धं, वस्तुजातं परित्यज्य, नश्वराणि असिद्धानि वस्तूनि स्वीकर्तुं अभिलषति,तादृशस्य, परित्यागात् ध्रुवं= सिद्धं, नश्यति। असिद्धं च वस्तु अनवधानात् वा अविवेकात् वा स्वयमेव नश्यति इति तदपि न

अधिगच्छति। अहम् अपि सिद्धं हस्तागतं कूर्मं विहाय अनिश्चितं मृगं प्रति चिन्तितवान्। तदपि नष्टम् आसीत्। अतः अहं अविवेकी एव इति पश्चात्तापम् अनुभवति ,इति अस्य पद्यस्य आशयः।

### १२.२.८.लुब्धशृगालकथा - पद्यानां भावाः

१२.२.८.१.दैवम् अत्र कारणम्

**अचिन्तितानि दुःखानि यथैव आयान्ति देहिनाम्।**
**सुखानि अपि तथा मन्ये दैवम् अत्र अतिरिच्यते।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे षष्ठकथायां वर्तते। अत्र लुब्धशृगालवृत्तान्तं वर्णितम् अस्ति। दीर्घरावः कश्चन जम्बुकः। सः आहारार्थं गच्छति। तत्र मृतान् मृग-व्याध-सर्प-शूकरान् पश्यति।'महत् भोज्यं मे समुपस्थितम्' इति सन्तुष्टः सन् तत्कारणम् एवं चिन्तयति।

भावः; प्राणिनां दुःखानि सम्भवन्ति। सुखानि अपि सम्भवन्ति। दुःखानि अचिन्तितानि एव (UN-EXPECTEDLY) परापतन्ति। तथा एव सुखानि अपि अतर्कित-उपनतानि एव भवन्ति। तथा च,यथा दुःखानि अचिन्तितानि जायन्ते तथा सुखानि अपि अचिन्तितानि एव आयान्ति। परम्, तत्र दुःखानां कल्पने वा, सुखानां प्रदाने वा दैवम् एव मुख्यं कारणं भवति इति भावः।

### १२.२.९. कर्पूरतिलकवृत्तान्तम् -पद्यानां भावाः

१२.२.९.१.स्वामिनः (राज्ञः) लक्षणानि

**यः कुलाभिजनाचारैः अतिशुद्धः प्रतापवान्।**
**धार्मिकः नीतिकुशलः सः स्वामी युज्यते भुवि ।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे अष्टमकथायां वर्तते। अत्र कर्पूरतिलकवृत्तान्तं वर्णितम् अस्ति। प्रकृते वृद्धशृगालः कर्पूरतिलकं गजम् उद्दिश्य राज्ञः लक्षणानि एवं वदति।

भावः;शृगालः कर्पूरतिलकस्य समीपं गच्छति। तम् 'स्वामिन्! वननिवासिनः सर्वे मिलित्वा

मां भवतः सकाशं प्रेषितवन्तः। राज्ञा विना अवस्थानं न युक्तम्। भवान् सर्व-स्वामिगुणोपेतः। अतः भवन्तं अटवीराज्ये अभिषेक्तुं प्रार्थयन्ति। राजा कुलाचारेण पवित्रः भवेत्। लोकाचारेण च पवित्रः भवेत्। प्रतापवान् भवेत्। धार्मिकः च भवेत्। नीतिनिपुणः च भवेत्। तादृशः जनः प्रभुः भवितुम् अर्हति ' इति एवं निवेदयति।

**१२.२.९.२.राज्ञः प्रामुख्यम्**

**पर्जन्यः इव भूतानाम् आधारः पृथिवीपतिः।**
**विकलेऽपि हि पर्जन्ये जीव्यते, न तु भूपतौ ।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे अष्टमकथायां वर्तते। अत्र कर्पूरतिलकवृत्तान्तं वर्णितम् अस्ति। प्रकृते वृद्धशृगालः कर्पूरतिलकं गजम् उद्दिश्य राज्ञःप्राशस्त्यम् एवं वदति।

भावः;शृगालः कर्पूरतिलकस्य समीपं गच्छति। राज्ञः आवश्यकतां प्रामुख्यं च एवं कथयति – पर्जन्यः नाम वर्षः। वर्षः प्राणिनां पानाय जलं ददाति। सस्याय नदीः जलेन पूरयति। एवं वर्षः भूतानाम् आधारः।जलं विना प्राणिनां जीवनं कष्टम्। राजा अपि रक्षणात् भरणात् च प्रजानाम् आधारः। भूतानां पर्जन्य इव राजा अपि आधारः भूतः आवश्यकश्च । कदाचित् वर्षस्य अभावे अपि जीवनं प्रचलति, यथाकथञ्चित् जीवनं यापयितुं शक्यते, परं यदि प्रभुः नास्ति जीवनं दुष्करमेव भवति। राजा सर्वेषां प्रजानां जीवनदायकः, इति अस्य पद्यस्य आशयः।

**१२.२.९.३.दुष्टसाङ्गत्यं पतनाय कल्पते**

**यदा सत्सङ्गरहितः भविष्यसि भविष्यसि।**
**यदाऽसज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ।।**

परिचयः;अयं श्लोकः हितोपदेशमित्रलाभे अष्टमकथायां वर्तते। अत्र कर्पूरतिलकवृत्तान्तं वर्णितम् अस्ति। प्रकृते वृद्धशृगालः महापङ्के निमग्नं कर्पूरतिलकं गजं परिहसति। एवं वदति।

भावः; हस्ती शृगालस्य वचने जातविश्वासः भवति। तम् अनुसरति। महापङ्के च पतति। तदा शृगालः हस्तिनं पश्यति। परिहसति। तदा एवं वदति, तथा हि – लोके यः कोऽपि, यदा सतां सङ्गेन सहितः भविष्यति, तदा सः आपदः आत्मानम् उद्धर्तुं समर्थः भविष्यति। यः असताम्उ दुर्जनानां सङ्गे पतिष्यति, तदा सः आपदः अधः पतिष्यति। त्वम् इदानीं मम दुष्टस्य वचः विश्वस्य आपदिउ महापङ्के निमग्नः। उपरि आगन्तुम् असमर्थः च भवसि, इति वृद्धशृगालः कर्पूरतिलकं स्वभाग्याय विसृजति, इति अस्य पद्यस्य आशयः।

## १२.३.उपसंहारः

एवम् अस्मिन् पाठ्यांशे चित्रग्रीववृत्तान्तम्, वृद्धव्याघ्र-पथिकयोः वृत्तान्तम्, मृग-काक-जम्बुकानां वृत्तान्तम्, जरद्गव-दीर्घकर्णयोः वृत्तान्तम्, हिरण्यकस्य वृत्तान्तम्,चन्दनदास-लीलावत्योः वृत्तान्तम्,मन्थरकवृत्तान्तम् , लुब्ध शृगालवृत्तान्तम्, तुङ्गबलवृत्तान्तम्, कर्पूरतिलकवृत्तान्तम्, एषु विद्यमानानां केषाञ्चन पद्यानां भावाः, मार्गदर्शनाय परिचयपुरस्सरम् उपस्थापिताः। विद्यार्थिनश्च एतान् भावान् सम्यक् पठित्वा ,अवशिष्टानाम् अन्येषाम् अपि भावलेखनाय प्रयत्नशीलाः भवन्ति।

## १२.४.अभ्यासः

(अ) अधोनिर्दिष्टानां पद्यानां परिचयपुरस्सरं भावं लिखत?

१).यदा सत्सङ्गरहितः भविष्यसि भविष्यसि।
यदाऽसज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ।।

२).यो ध्रुवाणि परित्यज्य, अध्रुवाणि निषेवते।
ध्रुवाणि तस्य नश्यन्ति, अध्रुवं नष्टमेव हि ।।

३).शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना।
सुतप्तमपि पानीयं शमयत्मेव पावकम्।।

* * *

# १३.गद्यानां भावाः

संरचना

१३.०.परिचयः
१३.१.लक्ष्याणि
१३.२.गद्यानां भावाः
१३.२.१ चित्रग्रीववृत्तान्तम्
१३.२.२.वृद्धव्याघ्र-पथिकयोः कथा
१३.२.३.मृग-काक-जम्बुक-कथा
१३.२.४. जरद्गव-दीर्घकर्णयोः कथा
१३.२ ५.हिरण्यकस्य वृत्तान्तम्
१३.२.६.चन्दनदास-लीलावत्योः वृत्तान्तम्
१३.२.७.मन्थरकवृत्तान्तम्
१३.२.८.लुब्धशृगालकथा
१३.२.९.तुङ्गबलवृत्तान्तम्
१३.२.१०.कर्पूरतिलकवृत्तान्तम्
१३.३.उपसंहारः
१३.४.अभ्यासः

## १३.०. परिचयः

काव्यानि छन्दसम् आधारीकृत्य त्रिविधानि भवन्ति। पद्यकाव्यानि, गद्यकाव्यानि चम्पूकाव्यानि चेति। तत्र गद्यं नाम अपादपदसङ्घातः।एतच्च गद्यं कवीनां निकषं वदन्ति।तादृशम् अपि गद्यं स्वीकृत्य कवनं कुर्वन्ति। प्रतिष्ठां च प्राप्नुवन्ति। प्रकृते Diploma in Sanskrit Examination मध्ये आहत्य पञ्च पत्राणि सन्ति। तत्र इदं प्रथमं पत्रम्। अस्य च शतं १००अङ्काः भवन्ति। अत्र च विषयद्वयं भवति। 'हितोपदेशे-मित्रलाभः' इत्ययम् एको विषयः। अयं च प्राचीनगद्यं परिचयं करोति।कथाप्रक्रियां प्रति अवगाहनां ददाति। एतस्य कृते पञ्चाशत् ५० अङ्काः भवन्ति। त्रयः प्रश्नाः वर्तन्ते।तेषु गद्यानां भावलेखनम् अन्यतमः प्रश्नः।अस्य च दश अङ्काः विद्यन्ते। तदर्थं विद्यार्थिनां कृते अत्र अभ्याससम्पादनं भवति।

## १२.१.लक्ष्याणि

आंग्लभाषायां Para phrase इति किञ्चित्पदं विद्यते। इतरपदानि उपयुज्य निर्दिष्टपङ्क्तीनां भावज्ञापनं (Re wording of a passage/Expression of using different words) तस्य अर्थः। इयम् एव प्रक्रिया गद्यांशानां भावलेखनम् इति नाम्ना अत्र व्यवह्रियते। निर्दिष्टपङ्क्तीनां सम्पूर्णार्थ-अवगमनाय इदम् उपकुरुते। सामान्यतः पाठ्यांशस्य अध्ययने

कोणद्वयं भवति। जीवनोपयोगित्वम् एकः कोणः। सः वैयक्तिक-जीवन-लक्ष्यं साधयितुं समर्थं भवति। द्वितीयः कोणः परीक्षादृक्पथम् (Examination Point Of View)। प्रस्तुतं पाठ्यांशं परीक्षार्थं पठति। कथं वा प्रश्नानां समाधानम् इति मनसि निधाय पाठ्यांशं परीक्षादृष्ट्या अपि प्रणालिकाबद्धं पठति। प्रश्न- पत्रे गद्यानां भावलेखनम् इति अन्यतमः प्रश्नः। तस्य समाधानाय आवश्यकः सन्नाहः अत्र सम्पाद्यते। अत्र प्रथमतः हितोहदेशे-मित्रलाभम् अनुसृत्य गद्यस्य परिचयः दीयते। तत्र पाठकैः,इदं गद्यं कस्यां कथायां वर्तते,कस्मिन्सन्दर्भे वर्तते,कः वदति,कं प्रति वदति इति एते अंशाः विद्यन्ते। अनन्तरं विश्लेषणपुरस्सरं गद्यस्य तात्पर्यं च दीयते। एतत् पाठ्यांशस्य अध्ययनेन -

- संस्कृतभाषायां गद्यस्य पठने कौशलं वर्धितं भवति।
- संस्कृतभाषायां गद्यस्य अवगमनाय कौशलम् आर्जितं भवति।
- संस्कृतभाषायां गद्यस्य अन्वयसाधनाय कौशलम् अधिगतं भवति।
- संस्कृतभाषायां गद्यमाध्यमेन सम्भाषणे कौशलं सम्पादितं भवति।
- संस्कृतभाषायां गद्ये भावव्यक्तीकरणकौशलं समधिगतं भवति।
- संस्कृतभाषायां वाक्यरचनाद्वारा लेखनकौशलं सम्पादितं भवति।
- संस्कृतभाषायाम् आलोचनां कर्तुं प्रेरणं दत्तं भवति।
- परीक्षादृक्पथं अभ्यसितं भवति, आर्जितं च भवति।

## १३.२. गद्यांशस्य भावाः

१३.२.१. चित्रग्रीववृत्तान्तम्

१३.२.२.१.व्याधस्य दर्शनम्

(गद्यम्)अस्ति गोदावरी तीरे विशालः शाल्मलीतरुः। तत्र नानादेशात् आगत्य रात्रौ पक्षिणः निवसन्ति। अथ कदाचित् अवसन्नायां रात्रौ, अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि, लघुपतनक नाम वायसः प्रबुद्धः कृतान्तमिव द्वितीयम् आयान्तं व्याधम् अपश्यत्। भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे प्रथमकथायां, चित्रग्रीववृत्तान्ते वर्तते।काकः व्याधं पश्यति इति अस्य प्रधानविषयः।गोदावरी तीरे विशालः शाल्मलीतरुः अस्ति।नानादेशात् पक्षिणः आगच्छन्ति।रात्रौ तस्मिन् वृक्षे निवसन्ति।कदाचित्- एकदा रात्रौ गतायां भगवान् कुमुदिनी नायकः= चन्द्रः, पश्चिमाद्रिं गतवान्उअस्तम् एति। उदयसन्ध्या सञ्जायते।तदा लघुपतनक नाम वायसः प्रबुद्धः भवति। सः अपरं यममिव भयंकरतया स्थितं कञ्चन व्याधम् पश्यति।

**१३.२.२.२. हिरण्यकस्य जागरूकता**

(गद्यम्) ततः हिरण्यकः कपोतानां अवपातभयात् चकितः अन्तः गतः तूष्णीं स्थितःच। चित्रग्रीव उवाच- 'सखे! हिरण्यक! कथम् अस्मान् न सम्भाषसे'।ततः हिरण्यकः तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं बहिः निस्सृत्य ब्रवीति- 'आः पुण्यवान् अस्मि। प्रियसुहृत्, मे

चित्रग्रीवः समायातः'।

भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे प्रथमकथायां,चित्रग्रीववृत्तान्ते वर्तते।चित्रग्रीव-हिरण्यकयोः परस्प र-सन्दर्शनम् अत्र वर्णितम्। चित्रग्रीवः जालबद्धान् कपोतान् हिरण्यकस्य समीपं नयति। हिरण्यकः पक्षिणाम् अवपातशब्दं श्रुत्वा भयात् चकितः किञ्चित् कालं तूष्णीं तिष्ठति। तदा चित्रग्रीवः स्वसखायं-'मित्र! हिरण्यक! किमर्थं न सम्भाषणं करोषि' इति पृच्छति। ततः हिरण्यकः-चित्रग्रीवस्य वचनम् एतत् इति विजानाति। साश्चर्यं सोल्लासं बहिः आगच्छति। एवम् वदति च-'अहो! अहं पुण्यवान् अस्मि। मे प्रियमित्रं चित्रग्रीवः समागतः'इति। एवम् इदं गद्यं चित्रग्रीव-हिरण्यकयोः परस्पर-सन्दर्शनेन जनितम् आनन्दं वर्णयति।

**१३.२.२.३.चित्रग्रीवस्य कृते हिरण्यकस्य परीक्षणम्**

(गद्यम्)अहम् अल्पशक्तिः, दन्ताश्च मे कोमलाः, तदेतेषां पाशान् छेत्तुं कथं समर्थः। तत् यावत् मे दन्ता न त्रुट्यन्ति तावत् तव पाशान् छिन्दि्म। तदनन्तरम् एतेषाम् अपि बन्धनं यावत् शक्यं छेत्स्यामि।

भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे प्रथमकथायां, चित्रग्रीववृत्तान्ते वर्तते। चित्रग्रीवस्य आश्रितवा- त्सल्यं ज्ञातुं हिरण्यकस्य प्रयत्नं बोधयति इदं गद्यम्। चित्रग्रीवं प्रति मित्रस्य हिरण्यकस्य वचनमेतत्।'सखे अहं बलहीनः, मे दन्ताः कोमलाः, सुकुमाराः च। अतः एतेषां सर्वेषां पक्षिणां पाशान् छेत्तुं कथम् अहं समर्थः भवामि। यावत् मे दन्ताः शक्तिहीनाः न भवन्ति तावत् प्रथमं तव पाशान् छिन्दि्म। तदनन्तरम् एषाम् अपि बन्धनं यथाशक्ति छेत्स्यामि ' इति वदति।

**१३.२.२.वृद्धव्याघ्र-पथिकयोः कथा**

१३.२.२.१.पान्थस्य लुब्धता

(गद्यम्)१.एकः वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते-भोः भोः पान्थाः इदं सुवर्णकङ्कणं गृह्यताम्। ततः लोभ-कृष्टेन केनचित् पान्थेन आलोचितम्-भाग्येन एतत् सम्भवति। किन्तु अस्मिन् आत्मसन्देहे प्रवृत्तिर्न विधेया।

भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे द्वितीयकथायां, वृद्धव्याघ्र-पान्थवृत्तान्ते वर्तते। व्याघ्रः पान्थान् दुराशापरान् करोति इति अस्य प्रधानविषयः। एकः वृद्धव्याघ्रः स्नानं करोति। कुशान्उ दर्भान् हस्ते गृह्णाति सरसः तीरे उपविशति। पान्थान् एवं प्ररोचयति ' भोः भोः पथिकाः! इदं सुवर्णकङ्कणम्। गृह्यताम् ' इति। अनन्तरं लोभेनाकृष्टः कश्चित् पान्थः तत् दृष्ट्वा एवं आलोचनापरः भवति, सुवर्णकङ्कणप्राप्तिः भाग्येन सम्भवति। परम्, अयं व्याघ्रः प्राणहारकः। अतः, आत्मनः स्थितिसन्देहेउ प्राणानाम् अपायकारिणि, अस्मिन् कङ्कणस्य लाभे प्रवृत्तिः न कर्तव्या ' इति चिन्तयति।

**१३.२.२.२.पान्थस्य दुर्दशा**

(गद्यम्) ततः यावत् असौ तद्वचः प्रतीतः लोभात् सरः स्नातुं प्रविशति तावत् पङ्के निमग्नः पलायितुम् अक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रः अवदत् 'अहह! महापङ्के पतितोऽसि (पतितः असि)। अतः त्वाम् उत्थापयामि इति उक्त्वा शनैः शनैः उपगम्य तेन व्याघ्रेण धृतः स पान्थः।

भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे द्वितीयकथायां, वृद्धव्याघ्र-पान्थवृत्तान्ते वर्तते। दुराशापीडितः पान्थः व्यापादयितुं व्याघ्रेण धृतः इति अस्य प्रधानविषयः। पथिकः व्याघ्रस्य वचनं श्रुत्वा 'अयं सज्जनः इति विश्वस्य दुराशया स्नातुं सरः प्रविशति। तत्र सरसि महापङ्के पान्थः निमज्जति। पलायितुम् अक्षमः भवति। महापङ्के पतितं पान्थं दृष्ट्वा व्याघ्रः एवं वदति - अहो त्वं महापङ्के पतितः असि। अतः त्वाम् अहं सहायं कृत्वा उत्थापयामि' इति। व्याघ्रः एवम् उक्त्वा शनैः शनैः पथिकं उपगच्छति। तस्य कन्धरं धरति।

**१३.२.३.मृग-काक-जम्बुक-कथा**

१३.२.३.१.शृगालस्य मृगदर्शनम्

(गद्यम्)अस्ति मगधदेशे चम्पकवती नाम अरण्यानी। तस्यां चिरात् महता स्नेहेन मृग-काकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेन अवलोकितः।

भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे द्वितीयकथायां,काक-मृग-जम्बुकवृत्तान्ते वर्तते। इदं गद्यं जम्बुकस्य दृष्टिः मृगे प्रसरति इत्यंशं बोधयति। मगधदेशे चम्पकवती नाम महत् अरण्यम् किञ्चित् अस्ति। तत्र बहोः कालात् महता स्नेहेन मृगः काकश्च निवसतः। तयोः च मृगः सन्तुष्टान्तरङ्गः पुष्टशरीरः च दृश्यते । लीलया विनोदेन च स्वेच्छया वने विहरति। तादृशं मृगम् एकम्, कश्चन शृगालः कदाचित् पश्यति।

**१३.२.३.२.जम्बुकस्य वञ्चकता**

(गद्यम्) क्षुद्रबुद्धिः नाम जम्बुकोऽहम्। अत्र अरण्ये बन्धुहीनः मृतवत् एकाकी निवसामि। इदानीं त्वां मित्रम् आसाद्य पुनः सबन्धुः जीवलोकं प्रविष्टोऽस्मि। अधुना तव अनुचरेण मया भवितव्यम्।

भावः इदं च गद्यं हितोपदेशस्य मित्रलाभे द्वितीयकथायां, काक-मृग-जम्बुकवृत्तान्ते वर्तते। जम्बुकस्य परिचयस्य प्रदायकानि इमानि वाक्यानि। चित्राङ्गं (मृगम्) प्रति जम्बुकस्य वचनम् एतत्।'सखे! अहं जम्बुकः। मम नाम क्षुद्रबुद्धिः। बन्धुहीनः अहं अत्र अरण्ये एकाकी मृतः इव निवसामि। इदानीं मित्रं त्वां प्राप्य पुनः बन्धु- सहितः जीवलोकं प्रविष्टः अस्मि। अधुना तव अनुचरः भवामि। मम कृते एतत् भाग्यं कल्पयतु' इति जम्बुकः स्ववञ्चना प्रकारं प्रारभते।

**१३.२.३.३.जम्बुकस्य कपटमनस्तत्वम्**

(गद्यम्) फलिता तावत् अस्माकं कपटप्रबन्धेन मनोरथसिद्धिः। एतस्य उत्कृत्यमानस्य मांस-असृक्-लिप्तानि अस्थीनि मया अवश्यं प्राप्तव्यानि। तानि बाहुल्येन भोजनानि भविष्यन्ति।
भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे द्वितीयकथायां, काक-मृग-जम्बुकानां वृत्तान्ते वर्तते। इमानि वाक्यानि मृगस्य वञ्चनास्वभावं बोधयन्ति। शृगालः मनसि चिन्तयति। कपटेन मया आरचितः उपायः सिद्धः , फलितः एव। मम, कामनाउ वाञ्छा साधितप्राया एव। मृगस्य मरणानन्तरं खण्डशः कृत्वा मृगस्य मांस- रक्त- लिप्तानि अस्थीनि अवश्यं प्रीत्या आस्वादयामि। तानि च आधिक्येन मम भोजनानि भविष्यन्ति, इति शृगालः ऊहालोके विहरति।

## १३.२.४. जरद्गव-दीर्घकर्णयोः कथा

१३.२.४.१.जरद्गवस्य जीवनम्

(गद्यम्) अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः। तस्य कोटरे दैवदुर्विपाकात् गलित- नख- नयनः जरद्गव नाम गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चित् उद्धृत्य ददति। तेन असौ जीवति।
भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे तृतीयकथायां,जरद्गव-दीर्घकर्णवृत्तान्ते वर्तते। जरद्गवस्य परिचयप्रदायकानि इमानि वाक्यानि। भागीरथीतीरे गृध्रकूटनामकः कश्चन पर्वतः अस्ति। तत्र पर्वते महान् पर्कटीवृक्षः विद्यते। तस्य वृक्षस्य कोटरे एकः गृध्रः अस्ति। तस्य नाम जरद्गवः इति। दैवस्य दुर्विपाकात्उ दुरद्रुष्टवशात् तस्य नखाः गलिताः। नयने च अपगते स्तः। तद्वृक्षवासिनः पक्षिणः च सहृदयाः कारुणिकाः। स्वसम्पादितात् किञ्चित् किञ्चित् आहारं स्वीकृत्य, गृध्रस्य यच्छन्ति। तेन गृध्रः जीवति इति इमानि वाक्यानि जरद्गवस्य अवस्थां ख्यापयन्ति।

## १३.२.४.२.दीर्घकर्णस्य कपटवचनानि

(गद्यम्) अहम् अत्र गङ्गतीरे नित्यस्नायी, निरामिषाशी, ब्रह्मचारी, चान्द्रायणव्रतम् आचरन् तिष्ठामि। यूयं धर्म-ज्ञान-रताः विश्वासभूमयः इति पक्षिणः सर्वे सर्वदा मम अग्रे प्रस्तुवन्ति। अतः भवद्भ्यः विद्या-वयो-वृद्धेभ्यः-धर्मं श्रोतुम् इच्छामि।
भावः;इदं च गद्यं हितोपदेशस्य मित्रलाभे तृतीयकथायां,जरद्गव-दीर्घकर्णवृत्तान्ते वर्तते। मार्जारस्य वञ्चनां बोधयन्ति इमानि वाक्यानि। जरद्गवं प्रति मार्जारस्य वचनम् एतत्। 'अहं मार्जारः। मम नाम दीर्घकर्णः। गङ्गातीरे प्रतिदिनं स्नानं करोमि। मांसाहारं न खादामि। ब्रह्मचर्यं पालयामि। चान्द्रायणव्रतम् अनुतिष्ठामि। चन्द्रस्य वृद्धेः क्षयस्य च अनुगुणतया आहारस्वीकरणविधानस्य चान्द्रायणम् इति व्यवहारः। पापपरिहाराय प्रायश्चित्तरूपेण चान्द्रायणं कर्तव्यम् इति धर्मशास्त्रकाराः वदन्ति। भवन्तः विद्यावन्तः, वयसा वृद्धाश्च। अतः भवतां सकाशात् धर्मं श्रोतुम् अहम् आगतः ' इति गृध्रस्य विश्वासं जनयितुं मार्जारः

वदति।

**१३.२.५.हिरण्यकस्य वृत्तान्तम्**

१३.२.५.१.हिरण्यकवृत्तान्तस्य उपक्रमः

(गद्यम्) अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः। तत्र चूडाकर्णः नाम परिव्राट् प्रतिवसति। सः च भोजन-अवशिष्ट-भिक्षान्न-सहितं भिक्षापात्रं नागदन्तके अवस्थाप्य स्वपिति। अहं च तदन्नं उत्प्लुत्य प्रत्यहं भक्षयामि। अनन्तरं तस्य प्रियसुहृत् वीणाकर्णः नाम परिव्राजकः समायातः । भावः इदं च गद्यं हितोपदेशस्य मित्रलाभात् स्वीकृतम्। तत्र च चतुर्था कथा हिरण्यकवृत्तान्तं वर्णयति। तस्य च उपक्रमबोधकं च इदं गद्यम्। चम्पकनगर्यां एकः परिव्राजकमठः (संन्यासिमठः) अस्ति। तत्र चूडाकर्णः नाम संन्यासी प्रतिवसति। सः च प्रतिदिनं भोजनानन्तरं शिष्टम् अन्नम् एकस्मिन् पात्रे निक्षिपति। तत् भिक्षापात्रं नागदन्तके स्थापयति। सुखं च स्वपिति स्म। अहं (हिरण्यकः) उत्प्लुत्यउ उल्लङ्घ्य (JUMP) नागदन्तके भिक्षापात्रस्थम् अन्नं प्रतिदिनं भक्षयामि। एवं प्रचलति सति कदाचित् तस्य प्रियमित्रं वीणाकर्णः नाम संन्यासी तत्र समागच्छति।

**१३.२.५.२.हिरण्यकस्य परचयः**

(गद्यम्) मन्थर ! सविशेषम् अस्मै पूजां विधेहि। यतः अयं पुण्यकर्मणा धूरीणः, कारुण्यरत्नाकरः, हिरण्यको नाम मूषिकराजः। एतस्य गुणस्तुतिं जिह्वा-सहस्रद्वयेन अपि सर्पराजः न कदाचित् कथयितुं समर्थः स्यात्।

भावःइदं च गद्यं हितोपदेशस्य मित्रलाभात् स्वीकृतम्। तत्र च चतुर्था कथा हिरण्यकवृत्तान्तं वर्णयति। इदं च गद्यं हिरण्यकस्य परिचयं बोधयति। मन्थरं प्रति काकस्य वचनम् एतत्। 'मन्थर ! अस्मै विशेषां पूजां कुरु। अयं पक्षिणां पाशच्छेदादिना पुण्यकर्मणा समर्थः। कारुण्यसागरः। अस्य नाम हिरण्यकः । अयं मूषिकराजः। एतस्य गुणस्तुतिं कर्तुं जिह्वासहस्रद्वयेन सर्पराजः आदिशेषोऽपि न समर्थः भवति , इति अस्य गद्यस्य आशयः।

**१३.२.६.चन्दनदास-लीलावत्योः वृत्तान्तम् -गद्यानां भावः**

१३.२.६.१.चन्दनदासः - लीलावती

(गद्यम्) अस्ति गौडीये कौशाम्बी नाम नगरी। तस्यां चन्दनदासः नाम वणिक् महाधनः निवसति। तेन पश्चिमे वयसि वर्तमानेन कामाधिष्ठितचेतसा धनदर्पात् लीलावती नाम वणिक्पुत्री परिणीता। सा च मकरकेतोः विजयवैजयन्ती इव यौवनवती बभूव। सः च वृद्धपतिः तस्याः सन्तोषाय न अभवत्।

**भावः-** इदं च गद्यं हितोपदेशस्य मित्रलाभात् स्वीकृतम्।तत्र च पञ्चमकथा चन्दनदासवृत्तान्तं वर्णयति। चू डाकर्णं प्रति वीणाकर्णस्य वचनम् एतत्। इदं च चन्दनदासस्य परिचयं बोधयति। गौडदेशे कौशाम्बी नाम नगरी अस्ति।तस्यां चन्दनदासनाम वणिक् वसति।सः

महाधनः।सः वृद्धवयस्कः भवति।तस्मिन् वयसि धन-अहङ्कारात् मनसि सञ्जातैः कामैः लीलावती नाम्नीं वणिक् पुत्रीं परिणीतवान्। सा च यौवनदशायां भवति। मन्मथस्य विजय पताका इव सा यौवनाद्रेके स्थिता। अतः सः वृद्धपतिः तस्याः सन्तोषाय न समर्थः भवतीति अस्य गद्यस्य भावः।

**१३.२.७.मन्थरकवृत्तान्तम्**

१३.२.७.१.काक-कूर्म.-आखुभिः मृगस्य मेलनम्

(गद्यम्) अथ कदाचित् - चित्राङ्गनाम मृगः केन अपि त्रासितः, तत्र आगत्य मिलितः। ततः पश्चात् आयान्तं मृगम् अवलोक्य, भयं सञ्चिन्त्य, मन्थरः जलं प्रविष्टः मूषिकश्च विवरं गतः। काकोऽपि उड्डीय वृक्षम् आरूढः। ततः लघुपतनकेन सुदूरं निरूप्य, भयहेतुः न कोऽपि आयाति इति आलोचितम्।पश्चात् तद्वचनात् आगत्य, पुनः सर्वे मिलित्वा तत्रैव उपविष्टाः।

**भावः** - इदं च गद्यं हितोपदेशस्य मित्रलाभात् स्वीकृतम्। तत्र च अष्टमकथा मन्थरकवृत्तान्तं वर्णयति। मृगः वायस-मूषक-मन्थरकान् मिलति इति एतत् विषयबोधकम् इदं गद्यम्। वायसः,मूषकः,मन्थरकश्च एते त्रयः स्वेच्छा-आहार-विहारं कुर्वाणाः, सन्तुष्टाः निवसन्ति। एवं स्थिते कदाचित् चित्राङ्गः नामकः मृगः यं कञ्चन पश्यति। भयं प्राप्नोति। तत्र आगत्य काक-कूर्म-आखून् मिलति। आगच्छन्तं मृगं दृष्ट्वा भयं सम्प्राप्तम् इति आलोच्य मन्थरः जले प्रविशति। मूषिकः च विवरं गच्छति। काकः अपि उड्डीय वृक्षम् आरोहति। ततः लघुपतनकः सुदूरं परिशील्य भयकारणं किमपि नास्ति इति काक-कूर्मयोः वदति। पश्चात् तद्वचने विश्वासं प्राप्य सर्वे आगत्य मिलित्वा पुनः तत्रैव उपविष्टाः, इति अस्य गद्यस्य भावः।

**१३.२.७.२.मृगेण भयकारणस्य कथनम्**

(गद्यम्)अस्ति कलिङ्गविषये रुक्माङ्गदः नाम नरपतिः। सः च दिग्विजयव्यापारक्रमेण आगत्य चन्द्रभागनदी तीरे समावासितकटकः वर्तते। प्रातश्च तेन अत्र आगत्य कर्पूरसरः समीपे भवितव्यम् इति व्याधानां मुखात् किंवदन्ती श्रूयते। तत् अत्रापि प्रातः अस्थानं भयहेतुकं इति आलोच्य यथावसरकार्यम् आरभ्यताम्।

**भावः** - कलिङ्गदेशे रुक्माङ्गदः नाम नरपतिः अस्ति। स च दिग्विजययात्रां कुर्वन् चन्द्रभागानदीतीरे कटकं निर्माय तस्थौ। प्रातः सः अत्र आगत्य कर्पूरसरः समीपे स्थास्यति इति व्याधानां मुखात् जनश्रुतिः आगता। अतः अत्रापि प्रातः अवस्थानं भयहेतुकम् इति आलोच्य यथावसरं कार्यम् आरम्भणीयम्।

**१३.२.७.३. मन्थरकस्य रक्षणोपायः**

(गद्यम्)चित्राङ्गः जलसमीपं गत्वा मृतम् इव आत्मानम् अदर्शयत्। काकश्च तस्य उपरि स्थित्वा चञ्च्वा किमपि विलिखतु। नूनम् अनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना सत्वरं गन्तव्यम्। ततः अहं मन्थरस्य बन्धनं छेत्स्यामि। सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम्। भावः हिरण्यकस्य वचनम् एतत्। चित्राङ्गः जलसमीपं गच्छति। तत्र तटे मृतः इव शरीरं प्रसारयति। काकः मृगस्य उपरि तिष्ठति। नासिकया किमपि विलिखति। अत्रान्तरे लुबधकः शरीरं प्रसार्य मृतम् इव स्थितं मृगं पश्यति। कच्छपं वृक्षच्छायायां निक्षिपति। मृगमांसम् अभिलष्य मृगस्य सकाशं सत्वरं गच्छति। अहं अत्र मन्थरस्य बन्धनं छेत्स्यामि। यदा लुब्धकः समीपस्थः भवति तदा युवाम् उत्थाय धावताम् ,इति अस्य गद्यस्य भावः।

### **१३.२.८.लुब्धशृगालकथा**

१३.२.८.१.दीर्घरावस्य समुपस्थितः कलेबराणां सञ्चयः

(गद्यम्) आसीत् कल्याणकटकवास्तव्यः भैरवः नाम व्याधः। सः च एकदा मृगम् अन्विष्यमाणः विन्ध्याटवीं गत वान्। तेन, व्यापादितं मृगम् आदाय गच्छता, घोराकृतिः शूकरः दृष्टः।तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेण आहतः। शूकरेण अपि घनघोरगर्जनं कृत्वा,सः व्याधः मुष्कदेशे हतः,सच्छिन्नद्रुमः इव भूमौ निपपात।

भावः इदं च गद्यं हितोपदेशस्य मित्रलाभात् स्वीकृतम्। तत्र च षष्ठकथा लुब्धशृगालवृत्तान्तं वर्णयति। हिरण्यकं प्रति मन्थरकस्य वचनम् एतत्। अत्र महान् कलेबराणां सञ्चयः प्रदर्शितः विद्यते। कटकः नाम पर्वतस्य मध्यप्रदेशः। वास्तव्यः नाम निवासी। कल्याणनामकः कश्चन पर्वतः। तस्य मध्यप्रान्ते भैरवः नाम कश्चन व्याधः निवसति। सः च कदाचित् मृगम् अन्विष्यन् विन्ध्याटवीं गच्छति। तत्र एकं मृगं व्यापादयति। तम् आदाय गच्छन् सः एकं वराहं पश्यति। सः वराहश्च भयङ्कराकारः वर्तते। व्याधः मृगं भूमौ निक्षिपति। शूकरं शरेण हन्ति। शूकरः अपि मेघवत् घोरगर्जनं करोति। व्याधं मर्मस्थाने प्रहरति। सद्यः व्याधः अपि छिन्नवृक्षः इव भूमौ निपतति, इति अस्य गद्यस्य भावः।

### **१३.२.९.तुङ्गबलवृत्तान्तम्**

१३.२.९.१.लावण्यवत्याः कृते दूतीप्रेषणम्

**(गद्यम्)** अस्ति कान्यकुब्जविषये वीरसेनो नाम राजा। तेन वीरपुरनाम्नि नगरे तुङ्गबलः नाम राजपुत्रः भोगपतिः कृतः। सः च महाधनः तरुणः। एकदा स्वनगरे भ्राम्यन् अतिप्रौढयौवनां लावण्यवतीं नाम वणिक्पुत्रवधूम् आलोकयामास। ततः स्वहर्म्ये गत्वा स्मराकुलमतिः तस्याः कृते दूतिं प्रेषितवान्। भावः कान्यकुब्जदेशे वीरसेनः नाम राजा अस्ति। सः वीरपुरनगरे तुङ्गबलनामानं राजपुत्रं भोगपतिं करोति। तुङ्गबलः महाधनः तरुणश्च। सः एकदा स्वनगरे सञ्चरति। अतिप्रौढयौवनां लावण्यवतीं नाम वणिक् पुत्रस्य भार्यां पश्यति।

अनन्तरं सः स्वभवनं गच्छति। मदनपीडितः भवति। अतः तस्याः कृते दूतिं प्रेषयति।

**१३.२.९.२.अभीष्टसाधनाय तुङ्गबलस्य मायोपायः**

(गद्यम्) एकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकरत्नालङ्कारधारिणा प्रोक्तम् - अद्य आरभ्य मासम् एकं गौरीव्रतं कर्तव्यम्। तत् अत्र प्रतिरात्रं एकां कुलीनां युवतिम् आनीय समर्पय। सा मया यथोचितेन विधिना पूजयितव्या। ततः स चारुतदत्तः तथाविधां नवयुवतीम् आनीय समर्पयति।

**भावः -** एकदा सः राजपुत्रः स्नाति। अनुलिप्तः भवति। स्वर्णरत्नालङ्कारं धरति। एवं वदति। अद्य आरभ्य एकं मासं अहं गौरीव्रतं करोमि। त्वं प्रतिरात्रं एकां उत्तमकुलसञ्जातां युवतिम् आनयतु। समर्पयतु। ताम् अहं यथाविधि पूजमिष्यामि ,यथोचितं सत्करोमि इति। ततः सः चारुदत्तः उक्तलक्षणां नवयुवतीं आनयति।तुङ्गबलाय समर्पयति।

**१३.२.१०.कर्पूरतिलकवृत्तान्तम्**

१३.२.१०.१.वृद्धशृगालस्य प्रतिज्ञा

(गद्यम्) अस्ति ब्रह्मारण्ये कर्पूरतिलकः नाम हस्ती। तम् अवलोक्य सर्वे शृगालाः चिन्तयन्ति स्म -यदि अयं केनापि उपायेन म्रियते तदा अस्माकम् एतत् देहेन मासचतुष्टयस्य भोजनं भविष्यति। तत्र एकेन वृद्धशृगालेन प्रतिज्ञातम्, मया बुद्धिप्रभावात् अस्य मरणं साधयितव्यम्।

भावः; ब्रह्मारण्ये कर्पूरतिलकः नाम हस्ती अस्ति। तं दृष्ट्वा शृगालाः सर्वे एवं चिन्तयन्ति। अयं हस्ती येन कैनापि उपायेन हन्तव्यः। तदा एतत् देहेन अस्माकं चतुर्णां मासानां कृते भोजनं भविष्यति। तत्र एकः वृद्धशृगालः 'अहं मम बुद्धि प्रभावात् अस्य मरणं साधयिष्यामि ' इति प्रतिज्ञां करोति ।

## १३.३. उपसंहारः

एवम् अस्मिन् पाठ्यांशे, चित्रग्रीववृत्तान्तम्, वृद्धव्याघ्र-पथिकयोः वृत्तान्तम्, मृग-काक-जम्बुकानां वृत्तान्तम्, जरद्गव-दीर्घकर्णयोः वृत्तान्तम्, हिरण्यकस्य वृत्तान्तम्, चन्दनदास-लीलावत्योः वृत्तान्तम्,मन्थरकवृत्तान्तम्, लुब्ध शृगालवृत्तान्तम् ,तुङ्गबलवृत्तान्तम् ,कर्पूरतिलकवृत्तान्तम् - एषु स्थितानां केषाञ्चन गद्यानां भावलेखनं कृतम्। तच्च मार्गदर्शनाय उपकुरुते। गद्यानां भावलेखनाय निरिदिष्टगद्यस्य सम्पूर्णाध्ययनम् आवश्यकं भवति ।

## १३.४. अभ्यासः

अ). अधोनिर्दिष्टानां गद्यभागानाम् इतरपदानि उपयुज्य भावं लिखत?

(गद्यम्) ततः हिरण्यकः कपोतानां अवपातभयात् चकितः अन्तः गतः तूष्णीं स्थितःच। चित्रग्रीव उवाच- 'सखे हिरण्यक कथम् अस्मान् न सम्भाषसे' ।ततः हिरण्यकः तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं बहिः निस्सृत्य ब्रवीति- 'आः पुण्यवान् अस्मि। प्रियसुहृत् मे चित्रग्रीवः समायातः'।

**(गद्यम्)** अहम् त्र गङ्गतीरे नित्यस्नायी,निरामिषाशी,ब्रह्मचार,चान्द्रायणव्रतम् आचरन्

तिष्ठामि।यूयं धर्मज्ञानरताः विश्वासभूमयः इति पक्षिणः सर्वे सर्वदा मम अग्रे प्रस्तुवन्ति।अतः भवद्भ्यः विद्या-वयो-वृद्धेभ्यः-धर्मं श्रोतुम् इच्छामि।

**(गद्यम्)** अथ कदाचित् - चित्राङ्गनाम मृगः केन अपि त्रासितः तत्र आगत्य मिलितः।ततः पश्चात् आयान्तं मृगम् अवलोक्य भयं सञ्चिन्त्य मन्थरः जलं प्रविष्टः मूषिकश्च विवरं गतः। काकोऽपि उड्डीय वृक्षम् आरूढः ततः लघुपतनकेन सुदूरं निरूप्य भयहेतुः न कोऽपि आयाति इति आलोचितम्।पश्चात् तद्वचनात् आगत्य पुनः सर्वे मिलित्वा तत्रैव उपविष्टाः।

* * *